वृतः ॥ अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्न्नोरयिमाकृधि ॥
॥८॥ पुनरूर्ज्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नःपाह्यंहसः
॥९॥ सहरय्या । निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्याविश्व
तस्परि ॥ १० ॥ आत्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ॥

संहि· विशस्त्वासर्व्वाव्वाञ्छन्तुमात्वद्द्राष्ट्रमधिभ्रशत् ॥ ११ ॥ उदुत्तमम् ॥ पू·अ·
॥९४॥ उदुत्तमम्व्वरुणपाशमस्म्मदवाधमंव्विमध्यमꣳश्श्रथाय ॥ अथाव्वय ॥१२॥
मादित्यव्व्रतेतवानागसोऽअदितयेस्याम ॥ १२ ॥ अग्नेबृहन् ॥ अग्ने
बृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्जगन्वान्तमसोज्ज्योतिषागात् ॥ अ
ग्निर्भानुनारुशतास्वङ्गऽआजातोव्विश्वासद्मान्यप्प्राः ॥ १३ ॥ हꣳ
सःशुचिषत् ॥ हꣳसःशुचिषद्वसुरन्तरिक्षसद्धोताव्वेदिषदतिथिर्द्दुरो ॥९४॥
णसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽ

ऋतंबृहत्॥१५॥ सीदुत्त्वम्॥ सीदुत्त्वम्मातुरस्याऽउपस्त्थेविश्वान्न्य
ग्ग्नेव्वयुनानिव्विद्द्वान्॥ मैनान्तपसामार्च्चिषाभिशोचीरन्तरस्या७ं
शुक्रज्ज्योतिर्व्विभाहि॥१५॥अन्तरग्ग्ने। रुचात्त्वमुखायाऽंसदनेस्वे॥
तस्यास्त्वᳩहरसातपञ्ञातवेदᳩशिवोभव॥१६॥शिवोभूत्त्वा। मह्यं
मग्ग्नेअथोसीदशिवस्त्त्वम्॥ शिवाᳩकृत्त्वादिशᳩसर्व्वाᳩस्वंय्योनिमि
हासदᳩ॥ १७॥ [१७] दिवस्प्परि। प्प्रथमञ्ञज्ञेऽअग्निरस्म्मद्द्वितीय
यम्परिजातवेदाᳩ॥ तृतीयमप्सुनृमणाऽअजस्त्रमिन्धानऽएनञ्जर

संहि· तेस्वाधीः ॥ १८ ॥ विद्माते । अग्नेत्रेधात्रयाणिंविद्मातेधामविभृ पू·अ·
॥९५॥ तापुरुत्रा ॥ विद्मातेनामंपरमङ्गुहायद्विद्मातमुत्संयतंऽआजगन्थ ॥१२॥
॥ १९ ॥ समुद्रेत्त्वां । नृमणांऽअप्प्स्वन्तर्नृचक्षांईधेदिवोअग्नऊधं
न् ॥ तृतीयेत्त्वारजंसितस्त्थिवांꣳसमपामुपस्त्थेमहिषाऽअवर्द्धन्
॥ २० ॥ अक्रन्ददग्निः ॥ अक्रन्ददग्निस्तनयंन्निवद्यौःक्षामारेरिह
द्वीरुधंःसमञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअक्ख्यदारोदंसीभा ॥९५॥
नुनांभात्यन्तः ॥ २१ ॥ श्रीणामुंदारः ॥ श्रीणामुंदारोधरुणोरयी

णाम्मनीषाणाम्प्रार्प्पणःसोमगोपाः ॥ व्वसुःसूनुःसहसोऽअप्प्सु
राजाव्विभात्यग्ग्रऽउषसामिधानः ॥ २२ ॥ व्विश्श्वस्यकेतुः ॥ व्विश्श्व
स्यकेतुर्ब्भुवनस्यगर्ब्भऽआरोदसीऽअपृणाज्जायमानः ॥ व्वीडुञ्चि
दद्रिमभिनत्परायञ्जनायदग्ग्निमयजन्तपञ्च ॥ २३ ॥ उशिक्पाव
कः ॥ उशिक्पावकोऽअरतिःसुमेधामर्तेष्ष्वग्ग्निरमृतोनिधायि ॥
इयर्त्तिधूममरुषम्भरिब्भ्रदुच्छुक्क्रेणशोचिषाद्यामिनक्षन् ॥ २४ ॥
दृशानोरुक्मः ॥ दृशानोरुक्मऽउर्व्याव्व्यद्यौद्दुर्म्मर्षमायुःश्रियेरु

संहि· चा॒नः ॥ अ॒ग्निर॒मृतो॑ऽअभव॒द्वयो॑भि॒र्य्यदे॑नु॒न्द्यौरज॑नयत्सु॒रेता॑ᳫं पू·अ·
॥९६॥ ॥ २५ ॥ यस्ते॑ । अ॒द्यकृ॒णव॑द्भद्रशो॒चेपू॒पन्दे॑वघृ॒तव॑न्तमग्ने ॥ प्रत॑न्नं ॥१२॥
य॒प्प्रत॒रं॑व्वस्यो॒ऽअच्छा॒भिसु॒म्नन्दे॒वभ॑क्तंय्यविष्ठ ॥२६॥ आतम् ॥
आतम्भ॑जसौ॒श्रव॒सेष्व॑ग्न॒ऽउ॒क्थऽउ॑क्थ॒ऽआभ॑जश॒स्यमा॑ने ॥ प्प्रि॒
यः॒सू॒र्य्यै॑प्प्रि॒यो॒ऽअ॒ग्ना॒भ॑वा॒त्त्यु॒ज्जा॒तेन॑भि॒नद॒दु॒ज्जनि॑त्त्वैः ॥ २७ ॥
त्त्वाम॑ग्ने॥त्त्वाम॑ग्ने॒यज॑माना॒ऽअनु॒द्यून्वि॒श्वा॒व॒सु॒द॑धि॒रे॒व्वा॒र्य्या॑णि ॥ ॥९६॥
त्त्वयाऽस॒हद्र॒वि॑णमि॒च्छमा॑ना॒व्व्र॒जङ्गो॒म॑न्तमु॒शिजो॒व्विव॑व्रुः ॥ २८ ॥

अस्ताव्यग्निः ॥ अस्ताव्यग्निर्न्नराᳪंसुशेवोवैश्वानरऽऋषिभिःसो
मंगोपाः ॥ अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्म्मेसुवीरम् ॥
॥ २९ ॥ [१२] समिधाग्निम् ॥ समिधाग्निन्दुवस्यतघृतैर्बोधयता
तिथिम् ॥ आस्मिन्हव्याजुहोतन ॥ ३० ॥ उदुत्त्वा ॥ उदुत्त्वाव्वि
श्वेदेवाऽअग्नेभरन्तुचित्तिभिः ॥ सनोभवशिवस्त्वᳪंसुप्प्रतीको
व्विभावसुः ॥ ३१ ॥ प्रेत् ॥ प्रेदग्नेज्ज्योतिष्म्मान्याहिशिवेभिरर्चि
भिष्ट्वम् ॥ बृहद्भिर्भानुभिर्भासन्माहिᳪंसीस्तन्वाप्प्रजाः ॥ ३२ ॥

संहि· अक्रंन्ददग्निः ॥ अक्रंन्ददग्निस्तनयंन्निवद्यौःक्षामारेरिंहद्वीरुधः पू· अ·
॥१७॥ समञ्जन् ॥ सद्योजंज्ञानोविहीमिद्धोऽअख्यदारोदंसीभानुनाभा ॥१२॥
त्यन्तः ॥३३॥ प्रप्प्रायम् ॥ प्रप्प्रायमग्निर्भरतस्यंशृण्वेवियत्सूर्य्यो
नरोचंतेबृहद्भाः ॥ अभियःपूरुम्पृतंनासुतस्त्थौदीदायदैव्योऽअति
थिःशिवोनंः ॥३४॥ आपोदेवीः ॥ आपोदेवीःप्प्रतिगृभ्णणीतभस्म्मै
तत्स्योनेकृंणुद्ध्वःसुरभाऽउंलोके ॥ तस्म्मैनमन्ताञ्जनंयःसुपत्क्नी ॥१७॥
म्मातेवंपुत्रम्बिभृताप्प्स्वेनत ॥३५॥ अप्प्स्वग्ग्ने ॥ अप्प्स्वग्ग्नेसधि

ष्ट्वसौषधीरनुरुध्यसे ॥ गर्भेसञ्जायसेपुनः ॥ ३६ ॥ गर्भोऽअसि ॥ गर्भोऽअस्योषधीनाङ्गर्भोवनस्पतीनाम् ॥ गर्भोविश्वस्य भूतस्याग्नेगर्भोऽअपामसि ॥ ३७ ॥ प्रसद्यभस्मना ॥ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥ सःसृज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ॥ ३८ ॥ पुनरासद्य । पुनरासद्यसदनमपश्चपृथिवीमग्ने ॥ शेषेमातुर्यथोपस्थेन्तरस्याꣳशिवतमः ॥ ३९ ॥ पुनरूर्जा । निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नःपाह्यꣳहसः ॥ ४० ॥ सहरय्या ।

संहि· निवर्त्तस्वाग्ग्नेपिन्न्वस्वधारया ॥ व्विश्वप्प्स्न्याव्विश्वतस्प्परि॥४१॥ पू. अ.
॥१८॥ बोधामे । ऽअस्यव्वर्चसोयविष्ठमꣳहिष्ठस्यप्प्रभृतस्यस्वधावः ॥ पीय ॥१२॥
तित्त्वोऽअनुत्त्वोगृणातिव्वन्दारुष्टेतन्न्वंवन्देऽअग्ग्ने ॥४२॥ सबोधि।
सूरिर्म्मघवाव्वसुपतेव्वसुदावन् ॥ युयोद्ध्यस्म्मद्द्वेषाꣳसिव्विश्वकर्म्म
णेस्वाहा॥४३॥पुनस्त्वा । दित्त्यारुद्द्राव्वसवःसमिन्धताम्पुनर्ब्ब्रह्मा
णोव्वसुनीथयज्ञैः ॥ घृतेनन्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याःसन्तुयजमान ॥१८॥
स्यकामाः॥४४॥[१५]अपेत ॥ अपेतव्वीतव्विचसर्प्पतातोयेत्रस्त्थपु

राणायेचनूतंनाः ॥ अदाद्यमोवसानम्पृथिव्याऽअक्रन्निमम्पितरो
लोकमस्म्मै ॥४५॥ सँज्ञानमसि । कामधरणम्मयितेकामधरणम्भू
यात् ॥ अग्नेर्भस्म्मास्यग्नेः पुरीषमसिचितस्त्थपरिचितऽऊर्द्ध्व
चितः श्रयद्ध्वम् ॥४६॥ अयꣳसः ॥ अयꣳसोऽअग्निर्य्यस्म्मिन्त्सोम
मिन्द्रः सुतन्दधेजठरेवावशानः ॥ सहस्रियम्वाजमत्त्यन्नसप्प्तिꣳ
ससवान्त्सन्त्स्तूयसेजातवेदः ॥ ४७॥ अग्नेयत् ॥ अग्नेयत्तेदि
विवर्च्चः पृथिव्यांयदोषधीष्ष्वप्प्स्वायजत्र ॥ येनान्तरिक्षमुर्व्वात

तन्थ्वंत्त्वेषःसभानुरंण्णर्वोनृचक्षाः ॥४८॥ अग्नेदिवः ॥ अग्नेदिवो
ऽअर्ण्णमच्छाजिगास्यच्छादेवाँ२ऽऊंचिषेधिष्ण्यायेये ॥ याराचने
परस्तात्सूर्यस्ययाश्चावस्तादुपतिष्ठन्तऽआपः ॥४९॥ पुरीष्या
सोऽअग्नयः । प्रावणेभिःसजोषसः ॥ जुषन्ताँ यज्ञमद्रुहोन
मीवाऽइषोमहीः ॥५०॥ इडामग्ने । पुरुदंसंसनिंगोःशश्व
त्तमंहवमानायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुम
तिर्भूत्त्वस्मे ॥५१॥ अयन्ते ॥ अयन्तेयोनिर्ऋत्त्वियोयतोजातो ॥९९॥

ऽअरोचथाः ॥ तज्ज्ञानन्नेग्नऽआरोहाथानोवर्द्धयारयिम् ॥ ५२ ॥
चिदसि ॥ चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादे
वतयाङ्गिरस्वद्ध्रुवासीद ॥५३॥ लोकम्पृण । च्छिद्रम्पृणाथोसीदद्ध्रु
वात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिरस्म्मिन्न्योनावसीषदन् ॥ ५४ ॥
ताऽअस्य । सूददोहसःसोमंꣳश्रीणन्तिपृश्न्नयः ॥ जन्म्मन्देवानां
व्विशस्त्रिष्ष्वारोचनेदिवः ॥ ५५ ॥ इन्द्रंव्विश्वाः ॥ इन्द्रंव्विश्वाऽअ
वीवृधन्त्समुद्रव्व्यचसङ्गिरः ॥ रथीतमꣳरथीनांव्वाजानाꣳसत्प

संहि· तिम्पतिम् ॥ ५६ ॥ समितम् ॥ समितꣳसङ्कल्पेथाꣳसम्प्रियौरोचि पू· अ·
॥१००॥ ष्णूसुमनस्यमानौ ॥ इषमूर्ज्जमभिसंवसानौ ॥५७॥ संवाम् ॥ संवा ॥१२॥
म्मनाꣳसिसंव्रतासमुचित्तान्याकरम् ॥ अग्नेपुरीष्याधिपाभव
त्वन्नऽइषमूर्ज्जँयजमानायधेहि ॥५८॥ अग्नेत्त्वम् ॥ अग्नेत्त्वम्पु
रीष्योरयिमान्पुष्टिमाँ२ऽअसि ॥ शिवाःकृत्त्वादिशःसर्वाःस्वंयो
निमिहासदः ॥५९॥ भवतन्नः ॥ भवतन्नःसमनसौसचेतसावरेप ॥१००॥
सौ ॥ मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्य

नं÷ ॥ ६० ॥ मातेवंपुत्रम् ॥ मातेवंपुत्रम्पृथिवीपुरीष्यमग्निꣳस्वे
योनांवभारुषा ॥ तांविश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्व
कर्म्मांविमुञ्चतु ॥ ६१ ॥ [७] असुन्वन्तमयजमानम् ॥ असुन्वन्त
मयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदि
च्छसातंऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ६२ ॥ नमꣳसुतेनिर्ऋ
तेतिग्मतेजोयस्मयंविचृताबन्धमेतम् ॥ यमेनत्त्वंयम्म्यासंवि
दानोत्तमेनाकेऽअधिरोहयैनम् ॥ ६३ ॥ यस्यांस्ते । घोरऽआसञ्जुहो

म्म्येषाम्बन्धानामवसर्ज्जनाय ॥ यान्त्वाजनोभूमिरितिप्प्रमदन्ते
॥१०१॥ निर्ऋतिन्त्वाहम्परिवेदव्विश्वतः ॥ ६४ ॥ यन्तेदेवीनिर्ऋतिराबबन्ध ॥१२॥
पाशङ्ग्रीवास्वविचृत्त्यम् ॥ तन्तेविष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितु
मद्धिप्प्रसूतः ॥ नमोभूत्त्यैयेदञ्चकार ॥ ६५ ॥ निवेशनः सङ्गमनः ॥
निवेशनः सङ्गमनोव्वसूनांविश्वारूपाभिचष्टेशचीभिः ॥ देवऽइवस
वितासत्त्यधर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम् ॥ ६६ ॥ सीरायुञ्जन्ति । ॥१०१॥
कवयोयुगाव्वितन्वतेपृथक् ॥ धीरादेवेषुसुम्म्नया ॥ ६७ ॥ युनक्तसी

रां ॥ युनक्तसीराविवियुगातनुध्वङ्कृतेयोनौवपतेहबीजम् ॥ गिराचश्श्रु
ष्टिस्सभंराऽअसन्नोनेदीयऽइत्सृण्यः पक्कमेयात् ॥ ६८ ॥ शुनꣳसु ।
फालाविकृषन्तुभूमिꣳशुनङ्कीनाशाऽअभियन्तुवाहैः ॥ शुनासी
राहविषातोशमानासुपिप्पलाऽओषधीःकर्त्तनास्म्मे ॥ ६९ ॥ घृते
नसीता ॥ घृतेनसीतामधुनासमज्यतांविश्श्वैर्द्देवैरनुमतामरुद्भिः ॥
ऊर्ज्जस्वतीपयसापिन्न्वमानास्म्मान्त्सीतेपयसाब्भ्यावंवृत्स्व ॥ ७० ॥
लाङ्गलम्पवीरवत् ॥ लाङ्गलम्पवीरवत्सुशेवꣳसोमपित्सरु ॥ तदु

द्धंपतिगामविंम्प्रफुर्व्यञ्चपीवंरीम्प्रस्त्थावंद्रथवाहंणम् ॥७१॥ कामं
ङ्कामदुघे । धुक्ष्वमित्त्रायवव्वरुंणायच ॥ इन्द्रांयाश्श्विभ्याम्पूष्णेप्प्र
जाभ्य्यऽओषंधीभ्य्यः ॥ ७२ ॥ व्विमुंञ्चयद्ध्मम् ॥ व्विमुंञ्चयद्ध्मगंघ्न्यादे
वयानाऽअगंन्मतमंसस्पारमस्य॥ज्योतिंरापाम॥७३॥सजूरब्दः॥
सजूरब्दोऽअयंवोभिःसजूरुषाऽअरुंणीभिः ॥ सजोषंसावश्श्विना
दꣳसोंभिःसजूःसूरऽएतंशेनसजूर्वैंश्वानर ऽइडंयाघृतेनस्वाहा ॥
॥७४॥ [१३] याऽओषंधीः ॥ याऽओषंधीःपूर्व्वाजातादेवेभ्य्यस्त्रि

युगम्पुरा ॥ मनैनुबभ्रूणामहᳪंशतन्धामानिसप्तच ॥ ७५ ॥ शतं
वं÷ ॥ शतंव्वोऽअम्बधामानिसहस्रमुतवोरुहं÷ ॥ अधाशतक्रत्वो
यूयमिमम्मेऽअगदङ्कृत ॥ ७६ ॥ ओषधीःप्प्रति । मोदद्धम्पुष्पवं
तीःप्प्रसूवरीः ॥ अश्वाऽइवसजित्त्वरीर्व्वीरुधं÷पारयिष्णवं÷ ॥ ७७ ॥
ओषधीरिति । मातरस्तद्धोदेवीरुपब्रुवे ॥ सनेयमश्वङ्गाव्वासंऽआ
त्मानन्तवंपूरुष ॥ ७८ ॥ अश्वत्थेवं÷ ॥ अश्वत्थेवोनिषदनम्पर्णे
वोव्वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवंथपूरुषम् ॥ ७९ ॥

संहि· यत्रौषधीः । समग्ग्मत्राजानःसमिताविव ॥ विप्प्रःसऽउच्च्यतेभि पू· अ·
॥१०३॥ षग्रक्षोहामीवचातनः ॥ ८० ॥ अश्श्वावतीꣳसोमावतीम् ॥ अश्श्वा ॥१२॥
वतीꣳसोमावतीमूर्ज्जयन्तीमुदोजसम् ॥ आवित्सिसर्व्वाऽओषधी
रस्म्माऽअरिष्टतातये ॥ ८१ ॥ उच्छुष्माः ॥ उच्छुष्म्माऽओषधी
नाङ्गावोगोष्ठादिवेरते ॥ धनꣳसनिष्ष्यन्तीनामात्मानन्तवपूरुष
॥ ८२ ॥ इष्कृतिर्न्नाम । वोमाताथोयूयꣳस्थनिष्कृतीः ॥ सीराः ॥१०३॥
पतत्रिणीस्थनयदामयतिनिष्कृथ ॥ ८३ ॥ अतिविश्श्वाः । परिष्ठा

स्तेनऽइवव्व्रजमक्रमुः ॥ ओषधीः प्प्राचुच्च्यवुर्य्यत्किञ्चतन्न्वोरपः
॥ ८४ ॥ यदिमाः ॥ यदिमाव्वाजयन्नहमोषधीर्हस्तऽआदधे ॥ आ
त्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा ॥ ८५ ॥ यस्यौषधीः । प्प्र
सर्प्पथाङ्गमङ्गम्परुष्षपरुः ॥ ततोयक्ष्मंव्विबाधद्धऽउग्ग्रोमध्यमशी
रिव ॥ ८६ ॥ साकंयक्ष्म ॥ साकंयक्ष्मप्प्रपतचाषेणकिकिदीविना ॥
साकंव्वातस्यध्राज्ज्यासाकन्नश्यनिहाकया ॥ ८७ ॥ अन्यावः ॥ अ
न्न्यावोऽअन्न्यामवत्त्वन्न्यान्न्यस्याऽउपावत ॥ ताःसर्व्वाःसंव्विदाना

संहि· ऽइदम्मेप्प्रावंताव्वचं÷ ॥ ८८ ॥ याःफलिनीः ॥ याःफलिनीर्य्याऽ पू· अ·
॥१०४॥ अफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्तानोमु ॥१२॥
ञ्चन्त्वꣳहसः॥८९॥मुञ्चन्तुमा । शपत्थ्यादथोव्वरुण्यादुत ॥ अथो
यमस्यपड्वीशात्सर्व्वस्म्मादेवकिल्ब्बिषात्॥९०॥अवपतन्तीरवदन् ॥
अवपतन्तीरवदन्दिवऽओषधयस्परि ॥ यञ्जीवमश्नवामहैनसरि
ष्यातिपूरुषः ॥ ९१ ॥ याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्ब ॥१०४॥
ह्वीःशतविचक्षणाः॥तासामसित्त्वमुत्तमारङ्कामायशꣳहृदे ॥९२॥

याऽओषधीः ॥ याऽओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ॥ बृह

स्प्पतिप्प्रसूताऽअस्यैसन्दत्तवीर्य्यम् ॥९३॥ याश्चेदं ॥ याश्चेदमुप

शृण्वन्तियाश्चदूरम्परागताः ॥ सर्वाः सङ्गत्यवीरुधोस्यैसन्दत्तवी

र्य्यम् ॥ ९४ ॥ मावः ॥ मावोरिषत्खनितायस्मैचाहङ्खनामिवः॥

द्विपाच्चतुष्पादस्माकं सर्वमस्त्वनातुरम् ॥ ९५ ॥ ओषधयः सम्॥

ओषधयः समवदन्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तं

राजन्पारयामसि ॥ ९६ ॥ नाशयित्रीबलासस्यार्शसऽउपचितांम

सि ॥ अथोशतस्ययक्ष्माणाम्पाकारोरसिनाशनी ॥९७॥ त्वाङ्गन्ध
॥१०५॥ र्व्वाः ॥ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामो ॥१२॥
षधेसोमोराजाव्विद्वान्यक्ष्मादमुच्यत ॥९८॥ सहस्वमे ॥ सहस्वमेऽ
अरातीꣳसहस्वपृतनायतः ॥ सहस्वसर्व्वम्पाप्मानꣳसहमानास्योषधे
॥९९॥ दीर्ग्घायुस्ते ॥ दीर्ग्घायुस्तऽओषधेखनितायस्मैचत्वाखना
म्म्यहम् ॥ अथोत्त्वन्दीर्ग्घायुर्भूत्वाशतवल्शाव्विरोहतात् ॥१००॥ ॥१०५॥
त्वमुत्तमा । स्योषधेतवव्वृक्षाऽउपस्तयः ॥ उपस्तिरस्तुसोस्म्माकं

ऽयोऽअस्म्माँ २ ऽअभिदासति ॥१०१॥ [२७] मामाहिᳬसीज्ज
नितायःपृथिव्यायोवादिवᳬसत्यधर्म्मीव्यानट् ॥ यश्चापश्चन्द्राः
प्प्रथमोजजानकस्म्मैदेवायहविषाविधेम ॥ १०२ ॥ अभ्यावर्त्त
स्व । पृथिवियज्ञेनपयसासह ॥ वपान्तेऽअग्निरिषितोऽअरोहत् ॥
॥ १०३ ॥ अग्नेयत् ॥ अग्नेयत्तेशुक्रंऽयच्चन्द्रंऽयत्पूतंऽयच्चयज्ञियं
म् ॥ तद्देवेभ्योभरामसि ॥ १०४॥ इषमूर्ज्जम् ॥ इषमूर्ज्जमहमितऽ
आदमृतस्ययोनिम्महिषस्यधाराम् ॥ आमागोषुविशत्त्वातनूषुज

हा॑मिसेदिमानि॑रा॒ममी॑वाम् ॥ १०५ ॥ अग्नेतव॑ ॥ अग्ने॒तव॒श्श्रवो॒व

॥१०६॥ यो॒मर्हि॑भ्राजन्ते॒ऽअ॒र्च्चयो॑विभावसो ॥ बृ॒हद्भा॑नो॒शव॑सा॒वाज॑मु ॥१२॥

क्थ्यु॒न्दधा॑सिदु॒ाशुषे॑कवे ॥ १०६ ॥ पा॒वकव॑र्च्चा॒ᳲशु॒क्रव॑र्च्चा॒ᳲ ॥ पा॒व

कव॑र्च्चा॒ᳲशु॒क्रव॑र्च्चा॒ऽअनू॑नवर्च्चा॒ऽउदि॑यर्षि॒भा॒नुना॑ ॥ पु॒त्रोमा॒तरा॑वि

च॒रन्नु॒पा॑वसिपृ॒णक्षि॒रो॒द॑सीऽउभे ॥ १०७ ॥ ऊर्ज्जौनपात् ॥ ऊर्ज्जौन

पा॒ज्जा॒तवे॑दᳲसुश॒स्तिभि॒र्म्मन्द॑स्वधी॒तिभि॒र्हि॒तः ॥ त्वेऽइष॒ᳲसन्द॑धु ॥१०६॥

र्भूरि॑वर्प्पस॒श्चि॒त्रो॒तय॒ो॒वा॒मजा॑ताᳲ ॥ १०८ ॥ इ॒रज्ज्यन्न॑ग्ने॰ प्प्रथ

यस्वजन्तुभिरस्मेरायोऽअमर्त्त्यं ॥ सदर्शंतस्यवपुषोविराजसिपृ
णाक्षिंसानुसिङ्क्तुम् ॥ १०९ ॥ इष्कर्त्तारमध्वरस्यं ॥ इष्कर्त्तारमध्वर
स्यप्रचेतसङ्क्षयन्तङ्गराधसोमहः ॥ रातिंव्वामस्यसुभगाम्महीमिष
न्दधासिसानसिᳫरयिम् ॥ ११० ॥ ऋतावानम्महिषं । व्विश्वदर्शत
मग्निᳫसुम्नायदधिरेपुरोजनाः ॥ श्रुत्कर्णᳫसप्रथस्तमन्त्वागिरा
दैव्यम्मानुषायुगा ॥ १११ ॥ आप्प्यायस्व । समेतुतेव्विश्वतः सोम
वृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ ११२ ॥ सन्ते ॥ सन्तेपयाᳫसि

संहि· समंयन्तुत्वाजाꣳसंवृष्ण्यान्यभिमातिषाहः ॥ आप्यायमानोऽ पू·अ·
॥१०७॥ अमृतायसोमदिविश्रवाꣳस्युत्तमानिधिष्व ॥ ११३ ॥ आप्याय ॥१२॥
स्व ॥ मदिन्तमसोमविश्वेभिरꣳशुभिः ॥ भवानꣳसुप्रथस्तमꣳस
खावृधे ॥ ११४ ॥ आते । वत्सोमनोयमत्परमाच्चित्सधस्थात् ॥
अग्नेत्वाङ्कामयागिरा ॥ ११५ ॥ तुभ्यन्ताः ॥ तुभ्यन्ताऽअङ्गि
रस्तमविश्वाꣳसुक्षितयःपृथक् ॥ अग्नेकामाययेमिरे ॥ ११६ ॥ अ ॥१०७॥
ग्निःप्रियेषु ॥ अग्निःप्रियेषुधामसुकामोभूतस्यभव्यस्य ॥ सम्रा

डेकोविराजति ॥ ११७॥ [१६] इतिश्रीवाजसनेयसंहितायांद्वाद
शोऽध्यायः ॥ १२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ मयि
गृह्णामिपंचदशध्रुवासिमधुवाताएकादशकौसम्यक्स्रवंतिनवेमं
माषडपांत्वैकाऽयंपुरःपंचसप्ताष्टापंचाशत् ॥ मयिगृह्णामि ॥ मयि
गृह्णाम्म्यग्ग्रेऽअग्निᳪरायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ मा
मुंदेवताऽसचन्ताम् ॥१॥ अपाम्पृष्ठम् ॥ अपाम्पृष्ठमसियोनिरग्नेः
समुद्रमभितऽपिन्वमानम् ॥ वर्द्धमानोमहाँ२ ऽआचपुष्करेदिवो

संहि· मात्त्रंयाव्वरिम्म्णाप्प्रथस्व ॥ २ ॥ ब्रह्मंयज्ज्ञानम् ॥ ब्रह्मंयज्ज्ञानम्प्र पू·अ·
॥१०८॥ थमम्पुरस्ताद्विसीमतःसुरुचोव्वेनऽआवः ॥ सबुध्न्न्याऽउपमाऽअ ॥१३॥
स्यविष्ठाःसतश्चयोनिमसंतश्चविवः ॥३॥ हिरण्यगर्भःसमवर्त्त
ताग्ग्रेभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमा
ङ्कस्मैदेवायहविषांविधेम ॥४॥ द्रप्प्सश्चंस्कन्द । पृथिवीमनुद्या
मिमञ्चयोनिमनुयश्चपूर्व्वः ॥ समानंय्योनिमनुंसञ्चरन्तन्द्रप्प्स ॥१०८॥
ञ्जुहोम्म्यनुंसप्तहोत्त्राः ॥५॥ नमोस्तुसर्प्पेब्भ्योयेकेचपृथिवीमनु ॥

येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ ६ ॥ याऽइषवः ॥
याऽइषवोयातुधानानांॅयेवावनस्पतीँ १ रनु ॥ येवावटेषुशेरते
तेभ्यः सर्प्पेभ्योनमः ॥ ७ ॥ येवा । मीरोचनेदिवोयेवासूर्य्यं
स्यरश्मिषु ॥ येषामप्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः ॥ ८ ॥
कृणुष्वपाजः ॥ कृणुष्वपाजःप्रसितिन्नपृथ्वींॅयाहिराजेवाम
वाँ २ ऽइभेन ॥ तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्त
पिष्ठैः ॥ ९ ॥ तवभ्रमासः ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृ

संहि· शध्रृषताशोशुंचानः ॥ तपूᳬंष्यग्नेजुह्वापतङ्गानसंन्दितोविसृंज पू· अ·

॥१०९॥ विष्ष्वंगुल्काः ॥ १० ॥ प्रतिस्प्पशंः ॥ प्रतिस्प्पशोविसृंजतूर्णिंत ॥१३॥

मोभवांपायुर्व्विशोऽअस्याऽअदंब्धः ॥ योनोदूरेऽअघशंᳬसोयोऽ

अन्त्यग्नेमाकिंष्टेव्यथिरादंधर्षीत् ॥ ११ ॥ उदंग्ने । तिष्ठप्प्रत्यातं

नुष्ष्वन्न्यमित्राँ२ ऽओषतातिग्ग्महेते ॥ योनोऽअरांतिᳬंसमिधा

नचक्केनीचातन्धक्ष्यतसन्नशुष्क्कम् ॥ १२ ॥ ऊर्द्ध्वोभंव ॥ ऊर्द्ध्वोभं ॥१०९॥

वप्प्रतिंविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्वदैव्व्यांन्न्यग्ने ॥ अवंस्थिरातंनु

हियातुजूनांऽऽमिममजांमिम्प्रमृंणीहिशत्रून् ॥ अग्नेष्ट्वातेजंसासा
दयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवःककुत्पतिः पृथिव्याअयम् ॥
अपाᳪरेताᳪसिजिन्वति ॥ इन्द्रंस्यत्त्वौजंसासादयामि ॥ १४ ॥
भुवोयज्ञस्यं ॥ भुवोयज्ञस्यरजंसश्चनेतायत्रांनियुद्भिःसचंसेशि
वाभिः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षांजिह्वामंग्नेचकृषेहव्यवाहंम्
॥ १५ ॥ [१५] ध्रुवासिं । धरुणास्तृंताविश्वकंर्म्मणा ॥ मात्त्वां
समुद्रऽउद्वंधीन्मासुपर्णोंव्यंथमानापृथिवीन्दृंᳪह ॥ १६ ॥ प्रजा

पंतिष्ठा । सादयत्त्वपाम्पृष्ठेसंमुद्रस्येमंन् ॥ व्यचंस्वतीम्प्रथंस्वतीम्प्र
थंस्वपृथिव्यसि ॥ १७॥ भूरंसि ॥ भूरंसिभूमिंरस्यदिंतिरसिविश्व
धांयाविश्वंस्यभुवंनस्यधर्त्री ॥ पृथिवींय्यच्छपृथिवीन्दृꣳहपृथिवी
म्माहिꣳसीः ॥ १८॥ विश्वंस्मैप्राणायं ॥ विश्वंस्मैप्राणायांपा
नायंव्यानायोदानायंप्रतिष्ठायैचरित्रांय ॥ अग्निष्ट्वाभिपातुमह्या
स्वस्त्याच्छर्दिषाशन्तंमेनतयांदेवतंयाङ्गिरस्वद्ध्रुवासींद ॥ १९ ॥
काण्डांत्काण्डात्प्ररोहंन्ती । परुंषःपरुषस्परिं ॥ एवानोंदूर्वेप्रतंनु

सहस्रेणशतेनंच ॥२०॥ याशतेनं । प्प्रतनोषिंसहस्रेणव्विरोहंसि ॥
तस्यांस्तेदेवीष्टकेव्विधेमंहविषांव्वयम् ॥ २१ ॥ यास्ते । ऽअग्ग्नेसूर्य्यें
रुचोदिवंमातन्वन्तिरश्मिभिंः ॥ ताभिंर्न्नोऽअद्यसर्व्वाभीरुचेज
नांयनस्कृधि ॥ २२ ॥ यावंः ॥ यावोंदेवाः॑सूर्य्येरुचोगोष्वश्श्वेषु
यारुचंः ॥ इन्द्राग्ग्नीताभिः॑सर्व्वाभीरुचंन्नोधत्तबृहस्प्पते ॥ २३ ॥
व्विराड्ज्योतिंः ॥ व्विराड्ज्योतिंरधारयत्स्वराड्ज्योतिंरधारयत् ॥
प्रजापंतिष्ट्वासादयतुपृष्ठेपृथिव्व्याज्ज्योतिंष्मतीम् ॥ व्विश्श्वंस्म्मैप्प्रा

 णायापानायंव्यानायविश्वञ्ज्योतिर्यच्छ ॥ अग्निष्टेधिपतिस्तया
 देवतयाङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुश्च ॥ मधुश्चमाधवश्चवास
न्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्ता
मापऽओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥
येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वासन्तिकावृतूऽअ
भिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिर
स्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषाढासि ॥ अषाढासिसहमानासहस्वारा

तीᳪंसहंस्वपृतनायुतः॥ सुहस्त्रंवीर्य्यांसिसामांजिन्व ॥२६॥ [११]
मधुव्वाताᳪं ॥ मधुव्वाताऽऋतायुतेमधुंक्षरन्तिसिन्धवᳪं ॥ माद्ध्वीर्न्नᳪं
सुन्त्वोषधीᳪं ॥ २७ ॥ मधुनक्तम् ॥ मधुनक्तमुतोषसोमधुंमत्पार्थिवं
रजंः ॥ मधुद्यौरस्तुनᳪंपिता ॥ २८ ॥ मधुंमान्नᳪं ॥ मधुंमान्नोव
नस्प्पतिर्म्मधुंमाँ २ अस्तुसूर्य्यंः ॥ माध्वीर्गावोंभवन्तुनᳪं ॥ २९ ॥
अपाङ्गम्भंन् ॥ अपाङ्गम्भंन्त्सीदुमात्त्वासूर्य्योंभितांप्सीन्माग्ग्नि
वैंश्वानरः॥ अच्छिन्नपत्राᳪंप्प्रजाऽअंनुवीक्षस्वानुंत्त्वादिव्यावृष्टिंः

संहि॰ ॥११२॥

सचताम् ॥ ३० ॥ त्रीन्त्समुद्रान् ॥ त्रीन्त्समुद्रान्त्समसृपत्स्वर्ग्गा पू॰ अ॰
न्पाम्पतिर्वृषभऽइष्टकानाम् ॥ पुरीषंव्वसानःसुकृतस्यलोकेतत्रग ॥१३॥
च्छयत्रपूर्व्वेपरेताः ॥ ३१ ॥ महीद्यौःपृथिवीचनऽइमंय्यज्ञम्मिमि
क्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ३२ ॥ व्विष्णोःकर्म्माणि । पश्य
तयतोव्व्रतानिपस्पशे ॥ इन्द्रस्ययुज्यःसखा ॥ ३३ ॥ ध्रुवासि । धरु
णेतोजज्ञेप्रथमभेभ्योयोनिभ्योऽअधिजातवेदाः ॥ सगायत्र्या ॥११२॥
त्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंव्वहतुप्रजानन् ॥ ३४ ॥ इषेराये ।

रमस्वसहंसेद्युम्नऽऊर्ज्जेऽअपत्त्याय ॥ सम्म्राडंसिस्वराडंभिर्क्के
स्वतौत्वोत्सौप्प्रावंताम् ॥ ३५ ॥ अग्ग्नेयुक्ष्व ॥ अग्ग्नेयुक्ष्वाहियेत
वाश्श्वांसोदेवसाधवं ॥ अरंव्वहंन्तिमन्न्यवे ॥ ३६ ॥ युक्ष्वाहि । देव
हूतंमाँ २ ऽअश्श्वाँ २ ऽअग्ग्नेरथीरिव ॥ निहोतांपूर्व्यंस्संदः ॥ ३७ ॥
[११] सम्म्यक्स्स्रंवन्ति । सरितोनधेनांऽअन्तर्हृदामनंसापूयमा
नाः ॥ घृतस्यधारांअभिचांकशीमिहिरण्ण्ययोंव्वेतसोमव्ध्येऽअग्ग्नेः
॥ ३८ ॥ रुचेत्त्वां । रुचेत्त्वांभासेत्वाज्ज्योतिंषेत्वा ॥ अभूंदिदंव्वि

श्वस्यभुवनस्यव्वाजिनमग्नेर्व्वैश्वानरस्यंच ॥ ३९ ॥ अग्निर्ज्ज्योतिषा ॥
अग्निर्ज्ज्योतिषाज्ज्योतिष्म्मान्रुक्मोव्वर्च्चसाव्वर्च्चस्वान् ॥ सहस्रदाऽ
असिसहस्रायत्त्वा ॥ ४० ॥ आदित्यङ्गर्ब्भम् ॥ आदित्यङ्गर्ब्भम्पयं
सासमङ्ग्धिसहस्रस्यप्प्रतिमांव्विश्वरूपम् ॥ परिंवृङ्ग्धिहरंसामाभिमᳫं
स्त्थाःशतायुंषङ्कृणुहिचीयमानः ॥ ४१ ॥ व्वातंस्यजूतिं । व्वरुंणस्य
नाभिमश्वंञ्जज्ञानᳫंसरिरस्यमध्ध्ये ॥ शिशुन्नदीनाᳫंहरिमद्द्रिबु ॥१३॥
द्ध्नमग्नेमाहिᳫंसीःपरमेव्व्योमन् ॥ ४२ ॥ अजंस्रमिन्दुम् ॥ रुय

स्रमिन्दुंमरुषम्भुरण्युमग्निमीडेपूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋ
तुशःकल्पमानोगाम्माहिंꣳसीरदितिंव्विराजम् ॥४३॥ वरूत्रीन्त्व
ष्टुः ॥ वरूत्रीन्त्वष्टुर्व्वरुणस्यनाभिमविञ्जज्ञानाꣳरजसःपरस्मा
त् ॥ महीꣳसाहस्रीमसुरस्यमायामग्नेमाहिंꣳसीःपरमेव्व्योमन्
॥४४॥ योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याऽ
उतवादिवस्परि ॥ येनप्रजाविश्वकर्म्माजजानतमग्नेहेडःपरिते
वृणक्तु ॥४५॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगादनीकञ्चक्षु

र्म्मित्रस्यव्वरुणस्याग्ग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्य
आत्म्माजगतस्तस्त्थुषश्च ॥ ४६ ॥ [९] इमम्मा । हिꣳसीर्द्द्विपा
दम्पशुꣳसहस्राक्षोमेधायचीयमानः ॥ मयुम्पशुम्मेधमग्ग्नेजुषस्व
तेनचिन्न्वानस्तन्न्वोनिषीद ॥ मयुन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशु
गृच्छतु ॥ ४७ ॥ इमम्मा । हिꣳसीरेकशफम्पशुङ्कनिक्क्रदंव्वाजि
नंव्वाजिनेषु ॥ गौरमारण्ण्यमनुतेदिशामितेनचिन्न्वानस्तन्न्वोनिषी ॥११४॥
द ॥ गौरन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥४८॥ इमꣳसाह

स्रम् ॥ इमꣳसाहस्रꣳशतधारमुत्संव्यच्यमानꣳसरिरस्यमध्ये ॥
घृतन्दुहानामदितिञ्जनायाग्नेमाहिꣳसीःपरमेव्योमन् ॥ गवय
मारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ गवयन्तेशुगृ
च्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ४९ ॥ इममूर्णायुं । वरुणस्यना
भिन्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम् ॥ त्वष्टुःप्रजानाम्प्रथमञ्ज
नित्रमग्नेमाहिꣳसीःपरमेव्योमन् ॥ उष्ट्रमारण्यमनुतेदिशामिते
नचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृ

च्छतु ॥५०॥ अजोहि ॥ अजोह्यग्नेरजनिष्टशोकात्सोऽअपश्य
ज्जनितारमग्ग्रे ॥ तेनदेवादेवतामग्ग्रेमायँस्तेनरोहंमायन्नुपमेद्ध्या
सः ॥ शरभमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥
शरभन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥५१॥ त्वंय्यविष्ठ ।
दाशुषोनॄँःपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥५२॥ [६]
अपान्त्वा ॥ अपान्त्वेमन्त्सादयाम्म्यपान्त्वोद्मन्त्सादयाम्म्यपा ॥११५॥
न्त्वाभस्मन्त्सादयाम्म्यपान्त्वाज्ज्योतिषिसादयाम्म्यपान्त्वायने

सादयाम्म्यर्णवेत्त्वासदनेसादयामिसमुद्रेत्त्वासदनेसादयामिस
रिरेत्त्वासदनेसादयाम्म्यपान्त्वाक्षयैसादयाम्म्यपान्त्वासधिषि
सादयाम्म्यपान्त्वासदनेसादयाम्म्यपान्त्वांसधस्थैसादयाम्म्य
पान्त्वायोनौसादयाम्म्यपान्त्वापुरीषेसादयाम्म्यपान्त्वापाथसि
सादयामिगायत्रेणंत्त्वाच्छन्दसासादयामित्रैष्टुभेनत्त्वाच्छन्दसा
सादयामिजागतेनत्त्वाच्छन्दसासादयाम्म्यानुष्टुभेनत्त्वाच्छन्द
सासादयामिपाङ्क्तेनत्त्वाच्छन्दसासादयामि ॥ ५३ ॥ [१] अयम्पु

संहि· रः ॥ अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तःप्प्राणायनोगाय पू· अ·
॥११६॥ त्रीव्वासन्तीगायत्र्यैगायत्रङ्गायत्रादुपाᳪंशुरुपाᳪंशोस्त्रिवृत्त्रिवृतो ॥१३॥
रथन्तरंव्वसिष्ठऽऋषिःप्प्रजापतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्र
जाब्भ्यः ॥५४॥ अयन्दक्षिणा । व्विश्वकर्म्मातस्यमनोव्वैश्वकर्म्म
णङ्ग्रीष्म्मोमानसस्त्रिष्टुब्ग्रैष्म्मीत्रिष्टुभःस्वारᳪंस्वारादन्तर्य्या
मोन्तर्य्यामात्पञ्चदशःपञ्चदशाद्बृहद्भरद्वाजऽऋषिःप्प्रजापति ॥११६॥
गृहीतयात्त्वयामनोगृह्णामिप्प्रजाब्भ्यः ॥ ५५ ॥ अयम्पश्चात् ॥

अयम्पाश्चाद्विश्वव्यंचास्तस्यचक्षुर्वैश्वव्यचसंव्वर्षाश्चाक्षुष्ष्योज
गतीव्वार्षीजगत्त्याऽऋक्करुसमृकरुसंमाच्छुक्रःशुक्रात्संप्तदशः
संप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्प्रजापतिगृहीतयात्त्वयाचक्षु
र्गृह्णामिप्प्रजाब्भ्यः ॥५६॥ इदमुत्तरात् ॥ इदमुत्तरात्त्स्वस्तस्य
श्श्रोत्रंऽसौवऽशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थीम
न्थिनऽएकविंशऽएकविंशाद्वैराजंव्विश्वामित्रऋषिः प्प्रजापति
गृहीतयात्त्वयाश्श्रोत्रंगृह्णामिप्प्रजाब्भ्यः ॥ ५७॥ इयमुपरिमति

संहि· ॥११७॥ स्तस्यैव्वाङ्मात्त्याहैमन्तोव्वाच्चयःपङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निध पू· अ· ॥१४॥
नंवतऽआग्ग्रयणऽआग्ग्रयणात्त्रिणवत्त्रयस्त्रिꣳशौत्त्रिणवत्त्रयस्त्रिꣳ
शाब्भ्यांꣳशाक्करैवतेव्विश्श्वकर्म्मऽऋषिःप्प्रजापतिगृहीतयात्त्व
याव्वाचङ्गृह्णामिप्प्रजाब्भ्योलोकन्ताऽइन्द्रम्॥ ५८ ॥ [५] इति
श्रीवाजसनेयसंहितायांत्रयोदशोऽध्यायः ॥ १३ ॥ श्रीवेदपुरुषाय
नमः ॥ अनुवाक्सूत्रम् ॥ ध्रुवक्षितिःषट्सजूर्ऋतुभिर्मूर्द्धावयोर्द्धिका ॥११७
विंद्राग्नीआयुर्मेषट्कावायुस्त्रिवृदेकाग्नेर्भागोस्येकयाचतुष्कावष्टा

वेकत्रि॑ᳫंशत् ॥ हरिः ॐ ध्रुवक्षितिर्द्ध्रुवयोनिᳫं ॥ ध्रुवक्षितिर्द्ध्रुवयोनि
र्द्ध्रुवासिद्ध्रुवंय्योनिमासीदसाधुया ॥ उक्ख्यंस्यकेतुम्प्रथमञ्जुषाणा
श्विनाद्ध्वर्य्यूसादयतामिहत्वा ॥ १ ॥ कुलायिनीघृतवती ॥ कुला
यिनीघृतवतीपुरन्धिᳫंस्योनेसीदसदनेपृथिव्याः ॥ अभित्वारुद्रा
वसवोगृणन्त्विमाब्रह्मपीपिहिसौभगायाश्विनाद्ध्वर्य्यूसादयता
मिहत्वा ॥ २ ॥ स्वैर्द्दक्षैᳫं ॥ स्वैर्द्दक्षैर्द्दक्षपितेहसीददेवानाᳫंसुम्नेबृ
हतेरणाय ॥ पितेवैधिसूनवआसुशेवास्वावेशातन्वासंविशस्वाश्वि

संहि· नांध्वर्य्यूसांदयतामिहत्वां ॥३॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपु पू·अ·
॥११८॥ रीषमस्यप्सोनामतान्त्वाविश्वेंऽअभिगृंणन्तुदेवाः ॥ स्तोमंपृष्ठा ॥१४॥
घृतवंतीहसीदप्प्रजावंदुस्म्मेद्द्रविणायंजस्वाश्विनांध्वर्य्यूसांदयता
मिहत्वां ॥४॥ अदित्यास्त्वा । पृष्ठेसांदयाम्म्यन्तरिक्षस्यधर्त्रीं
विष्टम्भंनीन्दिशामधिपत्नीम्भुवंनानाम् ॥ ऊर्म्मिर्द्द्रप्सोऽअपामं
सिविश्वकंर्म्मातऽऋषिंराश्विनांध्वर्य्यूसांदयतामिहत्वां ॥५॥ शुक्र ॥११८॥
श्च्चं ॥ शुक्रश्चशुचिंश्चग्ग्रैष्म्मावृतूऽअग्नेरंन्तःश्लेषोसिकल्पेतां

न्द्यावापृथिवीकल्पन्तामापऽओषधयः॑कल्पन्तामग्नयः॑पृथङ्
ममज्ज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयः॑समनसोन्तराद्यावापृथिवीऽ
इमे ॥ ग्रैष्मावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविश
न्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥६॥ [६] सजूर्ऋतुभिः। सजू
र्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानरायाश्विना
ध्वर्य्यूसादयतामिहत्वासजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः
सजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानरायाश्विनाध्वर्य्यूसादयतामिह

संहि· त्वांसजूर्ऋतुभिःसजूर्विधाभिःसजूरुद्रैःसजूर्देवैर्वयोनाधैरग्नये पू· अ·
॥११९॥ त्त्वावैश्वानरायाश्विनाध्वर्यूसादयतामिहत्त्वांसजूर्ऋतुभिःसजू ॥१४॥
र्विधाभिःसजूरादित्यैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानराया
श्विनाध्वर्यूसादयतामिहत्त्वांसजूर्ऋतुभिःसजूर्विधाभिःसजूर्वि
श्वैर्देवैःसजूर्देवैर्वयोनाधैरग्नयेत्त्वावैश्वानरायाश्विनाध्वर्यूसादय
तामिहत्त्वा ॥ ७ ॥ प्प्राणम्मे । पाह्यपानम्मेपाहिव्व्यानम्मेपाहिच ॥११९॥
क्षुर्म्मेऽउर्व्व्याविभाहिश्श्रोत्रम्मेश्श्लोकय ॥ अपःपिन्वौषधीर्जि

न्वह्निपार्द्वचतुष्पात्पाहिदिवोवृष्टिमेरय ॥ ८ ॥ [२] मूर्द्धावयः

प्प्रजापतिश्छन्दः क्षत्रंवयोमयन्दञ्छन्दोविष्टम्भोवयोधिपति

श्छन्दोविश्वकर्म्मावयः परमेष्ठीछन्दोवस्तोवयोविवलञ्छन्दोवृ

ष्णिर्वयोविशालञ्छन्दः पुरुषोवयस्तन्द्रञ्छन्दोव्याघ्रोवयोना

धृष्टञ्छन्दः सिंहोवयश्छदिश्छन्दः पष्ठवाड्वयोबृहतीच्छन्दऽउ

क्षावयः ककुप्छन्दऽऋषभोवयः सतोबृहतीच्छन्दोनड्वान्वयः ॥

॥ ९ ॥ अनड्वान्वयः । पङ्क्तिश्छन्दोधेनुर्वयोजगतीच्छन्दस्त्र्यविर्व

यंस्त्रिष्टुप्प्छन्दौदित्यव्वाड्वयौव्विराट्छन्दः ꣳ पञ्चाविर्व्वयौगायत्रीच्छन्दं
स्त्रिवत्सोव्वयंऽउष्णिक्छन्दंस्तुर्य्यवाड्वयौनुष्टुप्प्छन्दौलोकन्ताऽइ
न्द्रम् ॥ १० ॥ [२] इन्द्राग्नीऽअव्यथमानाम् ॥ इन्द्राग्नीऽअव्य
थमानामिष्टकान्दृꣳहतंय्युवम् ॥ पृष्ठेनद्यावापृथिवीऽअन्तरिक्षञ्च
व्विबाधसे ॥ ११ ॥ व्विश्वकर्म्मात्वा । सादयत्त्वन्तरिक्षस्यपृष्ठेव्यचं
स्वतीम्प्रथस्वतीमन्तरिक्षंय्यच्छान्तरिक्षन्दृꣳहान्तरिक्षम्माहिꣳ ॥१२०॥
सीꣳ ॥ व्विश्वस्म्मैप्प्राणायापानायव्यानायोदानायप्प्रतिष्ठायैचरि

त्रांय ॥ वायुष्ट्वाभिपांतुमह्यास्वस्त्याच्छर्दिषाशन्तंमेन तयांदेवतंया
ङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥ शतम् ॥ ७०० ॥ राज्ञ्यंसि ॥ राज्ञ्यंसि
प्राचीदिग्विराडंसिदक्षिणादिक्सम्म्राडंसिप्प्रतीचीदिक्स्वराड्
स्युदीचीदिगधिपत्क्यसिबृहतीदिक् ॥ १३ ॥ विश्वकंर्म्मात्त्वा ।
सादयत्वन्तरिक्षस्यपृष्ठेज्ज्योतिष्मतीम् ॥ विश्वंस्म्मैप्प्राणायांपा
नायंव्यानायविश्वञ्ज्योतिर्यच्छ ॥ वायुष्टेधिंपतिस्तयांदेवतंया
ङ्गिरस्वद्ध्रुवासीद ॥ १४ ॥ नभंश्च ॥ नभस्यश्चवार्षिकावृतूऽअ

संहि· ग्नेरन्तःश्लेषोसिकल्पैतान्द्यावापृथिवीकल्पन्तामापऽओषध पू· अ·

॥१२३॥ यःकल्पन्तामग्नयःपृथङ्मम ज्यैष्ठ्यायसव्व्रताः ॥ येऽअग्नयः ॥१४॥

समनसोन्तराद्यावापृथिवीऽइमे ॥ व्वार्षिकावृतूऽअभिकल्पमाना

ऽइन्द्रमिवदेवाऽअभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥

॥ १५ ॥ इषश्च ॥ इषश्चोर्ज्जश्चशारदावृतूऽअग्नेरन्तःश्लेषोसि

कल्पैतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्पन्तामग्न ॥१२३॥

यःपृथङ्ममज्यैष्ठ्यायसव्व्रताः ॥ येऽअग्नयःसमनसोन्तराद्यावा

पृथिवीऽइमे ॥ शारदावृतूऽअभिकल्प्पमानाऽइन्द्रंमिवदेवाऽअभि
संव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ १६ ॥ [६] आयुर्म्मे
पाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मेपाहिश्श्रो
त्रम्मेपाहिव्वाचम्मेपिन्वमनोमेजिन्वात्मानम्मेपाहिज्योति
र्म्मेयच्छ ॥ १७ ॥ माच्छन्दः । प्प्रमाच्छन्दः प्प्रतिमाच्छन्दोऽ
अस्त्रीवयश्छन्दः पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहतीच्छन्दोनुष्टुप्
छन्दोव्विराट्छन्दोगायत्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः पृथि

वीच्छन्दः ॥ १८ ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दुःस
माश्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमनश्छन्दः कृषिश्छन्दोहि
रण्यञ्छन्दोगौश्छन्दोजाश्छन्दोश्वश्छन्दः ॥ १९ ॥ अग्निर्द्देवता ॥
अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारु
द्द्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्द्देवते
न्द्रोदेवतावरुणोदेवता ॥ २० ॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरु
णाधर्त्र्यसिधरणी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्यैत्वाक्षेमायत्त्वा ॥

॥ २१ ॥ यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री ॥
इषेत्त्वोर्ज्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥ २२ ॥ [६]
आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तःपञ्चदशोव्योमासप्तदशोधरुणऽ
एकविꣳशःप्प्रतूर्त्तिरष्टादशस्तपोनवदशोभीवर्त्तःसविꣳशोवर्च्चोद्वा
विꣳशःसम्भरणस्त्रयोविꣳशोयोनिश्चतुर्विꣳशोगर्ब्भाःपञ्चविꣳश
ऽओजस्त्रिणवःक्क्रतुरेकत्रिꣳशःप्प्रतिष्ठात्रयस्त्रिꣳशोब्रध्नस्यविष्ट
पञ्चतुस्त्रिꣳशोनाकःषट्त्रिꣳशोविवर्त्तोष्टाचत्वारिꣳशोधर्त्रञ्चतुष्टोमः

संहि· ॥२३॥ [१] अग्नेर्भागः ॥ अग्नेर्भागोसिदीक्षायाऽआधिपत्य पू· अ·
॥१२३॥ म्ब्रह्मंस्पृतन्त्रिवृत्स्तोमऽइन्द्रंस्यभागोसिव्विष्णोराधिपत्यङ्क्षत्रꣳ ॥१४॥
स्पृतम्पंञ्चदशस्तोमौनृचक्षंसाम्भागोसिधातुराधिपत्यञ्जनित्रꣳ
स्पृतꣳसंप्तदशस्तोमोमित्रस्यंभागोसिव्वरुणस्याधिपत्यन्दिवोव्वृष्टि
र्व्वातंस्पृतऽएकविꣳशस्तोमोव्वसूनाम्भागः ॥ २४ ॥ व्वसूनाम्भागो
सिरुद्राणामाधिपत्यञ्चतुष्पात्स्पृतञ्चतुर्व्विꣳशस्तोमंऽआदित्या ॥१२३॥
नांम्भागोसिमरुतामाधिपत्यङ्गर्भास्पृताःपंञ्चविꣳशस्तोमोदित्यै

भागोसिपूष्णऽआधिपत्त्यमोजस्पृतन्त्रिणवस्तोमो देवस्यसवितु र्भागोसिबृहस्प्पतेराधिपत्य ᳪ समीचीर्दिशस्पृता श्चतुष्टोमस्तोमो यवानाम्भागः॥ २५ ॥ यवानाम्भागोस्ययवानामाधिपत्यम्प्रजा स्पृता श्चतुश्चत्वारि ᳪ शस्तोमऽऋभूणाम्भागोसिव्विश्वेषान्देवाना माधिपत्यम्भूत ᳪ स्पृतन्त्रयस्त्रि ᳪ शस्तोम ᳪ सहश्च ॥ २६ ॥ सहश्च । सहस्यश्चहैमन्तिकावृतूऽअग्नेरन्त ᳪ श्लेषोसिकल्प्पेतान्द्यावापृथि वीकल्प्पन्तामापऽओषधय ᳪ कल्प्पन्तामग्नय ᳪ पृथङ्मम ज्यैष्ठ्याय

संहि· सब्र्वंताꣳ ॥ येऽअग्नयꣳसमनसोन्तराद्यावांपृथिवीऽइमे ॥ हैमंन्ति पू· अ·
॥१२४॥ कावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवा ऽअंभिसंब्विंशन्तुतयांदेव ॥१४॥
तंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ २७ ॥ [४] एकंयास्तुवत । प्प्रजाऽ
अंधीयन्तप्प्रजापंतिरधिंपतिरासीत्तिसृभिंरस्तुवतब्ब्रह्मांसृज्ज्यतब्ब्र
ह्मंणस्प्पतिरधिंपतिरासीत्पञ्चभिंरस्तुवतभूतान्यंसृज्ज्यन्तभूता
नाम्पतिरधिंपतिरासीत्सप्तभिंरस्तुवतसप्तऽऋषयोंसृज्ज्यन्तधाता ॥१२४॥
धिंपतिरासीन्नवभिंरस्तुवत ॥ २८ ॥ नवभिंरस्तुवत । पितरोंसृज्ज्य

न्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतऽऋतवोऽसृज्यन्तार्त्त
वाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवतमासाऽअसृज्यन्तसंव
त्सरोऽधिपतिरासीत्पञ्चदशभिरस्तुवतक्षत्त्रमसृज्यतेन्द्रोऽधिपतिरा
सीत्सप्तदशभिरस्तुवतग्राम्म्याःपशवोऽसृज्यन्तबृहस्पतिरधिप
तिरासीन्नवदशभिरस्तुवत ॥ २९ ॥ नवदशभिरस्तुवत ॥ शूद्रार्य्या
वसृज्येतामहोरात्त्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैक
शफाःपशवोऽसृज्यन्तवरुणोऽधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षु

संहि· द्राःपशवोसृज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतार पू· अ·
॥१२५॥ ण्याःपशवोसृज्यन्तवायुरधिपतिरासीत्सप्तविꣳशत्यास्तुवत ॥१४॥
द्यावापृथिवीव्यैतांवसवोरुद्राऽआदित्याऽअनुव्यायँस्तऽएवाधिप
तयऽआसन्नवविꣳशत्यास्तुवत ॥३०॥ नवविꣳशत्यास्तुवत । वन
स्पतयोसृज्यन्तसोमोधिपतिरासीदेकत्रिꣳशतास्तुवतप्रजाऽअ
सृज्यन्तयवाश्चायवाश्चाधिपतयऽआसँस्त्रयस्त्रिꣳशतास्तुवतभू ॥१२५॥
तान्यशाम्यन्प्रजापतिःपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥

॥ ३१ ॥ [४] इतिश्रीवाजसनेयसंहितायांचतुर्द्दशोऽध्यायः ॥ १४ ॥
श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ अग्नेजातान्पंचरश्मिना
सत्यायचतस्रोराज्ञ्यस्ययँपुरःपंचकावग्निर्मूर्द्धैकोनत्रि८ँ शद्येनऽऋ
षयोष्टौतपश्चनवसप्तपंचषष्टिः ॥ हरिःॐअग्नेजातान् ॥ अग्नेजा
तान्प्रणुदानःसपत्नान्प्रत्यजातान्नुदजातवेदः ॥ अधिनोब्रूहिसु
मनाऽअहेडँस्तवस्यामशर्म्मँस्त्रिवरूथऽउद्भौ ॥ १ ॥ सहसाजातान् ॥
सहसाजातान्प्रणुदानःसपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व ॥ अ

संहि· धिनोब्रूहिसुमनस्यमानोव्वयꣳस्यामप्प्रणुदानꣳसपत्नान् ॥ २ ॥ पू·अ·
॥१२६॥ षोडशीस्तोमः ॥ षोडशीस्तोमऽओजोद्द्रविणञ्चतुश्चत्वारिꣳश ॥१५॥
स्तोमोव्वर्च्चोद्द्रविणम् ॥ अग्नेःपुरीषमस्यप्सोनामतान्त्वाव्विश्वेऽअ
भिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्प्रजावदस्मेद्द्रविणायं
जस्व ॥ ३ ॥ एवश्छन्दः ॥ एवश्छन्दोव्वरिवश्छन्दःशम्भूश्छन्दः
परिभूश्छन्दऽआच्छच्छन्दोमनश्छन्दोव्यचश्छन्दꣳसिन्धुश्छन्दः ॥१२६॥
समुद्द्रश्छन्दःसरिरञ्छन्दःककुप्प्छन्दस्त्रिककुप्प्छन्दः काव्य

ञ्छन्दोऽअङ्कपञ्छन्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दोविष्टारप
ङ्क्तिश्छन्दःक्षुरोभ्रजश्छन्दऽआच्छच्छन्दःप्रच्छच्छन्दः ॥ ४ ॥
आच्छच्छन्दःप्रच्छच्छन्दः । संयच्छन्दोवियच्छन्दोबृहच्छ
न्दोरथन्तरञ्छन्दोनिकायश्छन्दोविवधश्छन्दोगिरश्छन्दोभ्र
जश्छन्दःसँस्तुप्छन्दोनुष्टुप्छन्दऽएवश्छन्दोवरिवश्छन्दोवय
श्छन्दोवयस्कृच्छन्दोविष्पर्द्धाश्छन्दोविशालञ्छन्दश्छदिश्छ
न्दोदूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्काङ्कञ्छन्दः ॥ ५ ॥ [५]

संहि· रश्मिनासत्यायं । सत्त्यञ्जिन्न्वप्प्रेतिनाधर्म्मणाधर्म्मञ्जिन्न्वान्न्वि पू· अ·
॥१२७॥ त्यादिवादिवञ्जिन्न्वसन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्न्वप्प्रतिधिना ॥१५॥
पृथिव्यापृथिवीञ्जिन्न्वविष्टम्भेनवृष्ट्यावृष्टिञ्जिन्न्वप्प्रवयाह्नाहर्ज्जि
न्न्वानुयारात्र्यारात्रीञ्जिन्न्वोशिजावसुब्भ्योवसुञ्जिन्न्वप्प्रकेतेनादि
त्येब्भ्यऽआदित्त्याञ्जिन्न्वतन्तुनारायः ॥ ६॥ तन्तुनारायस्प्पोषेण ॥१२७॥
रायस्प्पोषञ्जिन्न्वसꣳसर्प्पेणश्श्रुतायश्श्रुतञ्जिन्न्वैडेनौषधीभिरोष
धीर्ज्जिन्न्वोत्तमेनतनूभिस्तनूर्ज्जिन्न्ववयोधसाधीतेनाधीतञ्जिन्न्वा

भिजितातेजंसातेजोंजिन्व ॥ ७ ॥ प्रतिपदंसि । प्प्रतिपदैत्वानुप
दंस्यनुपदैत्वासम्पदंसिसम्पदैत्वातेजोंसितेजंसेत्वात्त्रिवृदंसि ॥ ८ ॥
त्त्रिवृदंसि । त्त्रिवृतैत्वाप्प्रवृदंसिप्प्रवृतैत्वाव्विवृदंसिव्विवृतैत्वासवृदं
सिसवृतैत्वाक्क्रमोंस्याक्क्रमायंत्वासङ्क्रमोंसिसङ्क्रमायंत्वोत्क्क्रमोंस्यु
त्क्क्रमायत्वोत्क्क्रान्तिरस्युत्क्क्रान्त्यैत्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व ॥ ९ ॥
[४] राज्ञ्यंसि ॥ राज्ञ्यंसिप्प्राचीदिग्ग्वसंवस्तेदेवाऽअधिपतयोग्ग्नि
र्हैतीनाम्प्रतिधर्त्तात्त्रिवृत्त्वास्तोमं÷पृथिव्याᳪश्श्रयत्त्वाज्ज्यमुक्क्थम

व्व्यथायैस्तभ्नातुरथन्तरꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषय
स्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयावरिम्म्णाप्प्रथन्तुविधर्त्ताचायम
धिपतिश्चतेत्त्वासर्वैसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसा
दयन्तु ॥ १० ॥ विराडसि ॥ विराडसिदक्षिणादिग्रुद्रास्तेदेवाऽअ
धिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याꣳ
श्रयतुप्प्रउगमुक्थमव्व्यथायैस्तभ्नातुबृहत्सामप्प्रतिष्ठित्याऽअन्त ॥१२८॥
रिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयावरिम्म्णाप्प्रथन्तुवि

धुर्त्त्राचायमधिपतिश्च्चतेत्त्वासव्वैसंव्विदानानाकस्यपृष्ठेस्वग्गेलोके
यजमानञ्चसादयन्तु ॥ ११ ॥ सम्म्राडसि । प्प्रतीचीदिगादित्या
स्तेदेवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधुर्त्तासप्तदशस्त्वास्तोमः
पृथिव्याᳬश्रयतुमरुत्त्वतीयमुक्थमव्यथायैस्तभ्नातुव्वैरूपᳬसाम
प्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्व
रिम्णाप्प्रथन्तुव्विधुर्त्ताचायमधिपतिश्च्चतेत्वासव्वैसंव्विदानानाकं
स्यपृष्ठेस्वग्गेलोकेयजमानञ्चसादयन्तु ॥ १२ ॥ स्वराडसि ॥ स्व

राडस्युदीचीदिङ्मरुतंस्तेदेवाऽअधिपतयुःसोमोहेतीनाम्प्रतिध
त्तैकंविꣳशस्त्वास्तोमःपृथिव्याꣳश्रयतुनिष्कैवल्यमुक्थमव्यथा
यैस्तभ्नातुवैराजꣳसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथ
मजादेवेषुदिवोमात्रयावरिम्म्णाप्प्रथन्तुविधर्त्ताचायमधिपति
श्चतेत्त्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादय
न्तु॥१३॥ अधिपत्न्यसि । बृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृह
स्पतिर्हेतीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिꣳशौत्त्वास्तोमौपृथिव्याꣳ

श्रंयतांव्वैश्श्वदेवाग्निमारुतेऽउक्तेऽअव्व्यंथायैस्तभ्नीताᳬंशाक्कर रैव्
तेसामंनीप्प्रतिंष्ठित्याऽअन्तारिंक्षक्रूषंयस्त्वाप्प्रथमजादेवेषुंदिवो
मात्रंयाव्वरिम्म्णाप्रंथन्तुव्विधर्त्ताचायमाधिंपतिश्चतेत्त्वासर्व्वैसंव्वि
दानानाकेस्यपृष्ठेस्वर्ग्गेलोकेयजंमानञ्चसादयन्तु ॥ १४ ॥ [५]
अयम्पुरः ॥ अयम्पुरोहरिंकेशःसूर्य्यंरश्मिस्तस्यंरथगृत्सश्चरथौ
जाश्चसेनानीग्ग्रामण्ण्यौ ॥ पुञ्जिकस्त्थलाचंक्रतुस्त्थलाचाप्प्सर
सौदङ्क्ष्णवः पशवोहेतिःपौरुंषेयोव्वधःप्प्रहैतिस्तेभ्योनमोऽ अस्तुते

संहि· नोवंतुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः पू·अ·
॥१२०॥ ॥ १५ ॥ अयन्दक्षिणा । विश्वकर्म्मातस्यरथस्वनश्चरथचित्रश्च ॥१५॥
सेनानीग्ग्रामण्यौ ॥ मेनकाचसहजन्याचाप्सरसौयातुधानाहे
तीरक्षांसिप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते
यन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ १६ ॥ अयम्पश्चा
त् ॥ अयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानी ॥१३०॥
ग्ग्रामण्यौ ॥ प्रम्लोचन्तीचानुम्लोचन्तीचाप्सरसौव्याघ्राहे

तिः॒सर्प्पाः॒प्प्रहे॑तिस्ते॒भ्यो॒नमो॑ऽअस्तु॒ते नो॑ऽवन्तु॒ते नो॑मृडयन्तु॒तेय
न्द्द्विष्मो॒यश्च॑नो॒द्वेष्टि॒तमे॑षाञ्जम्भे॑दध्मः ॥१७॥ अ॒यमु॑त्त॒रात् ॥
अ॒यमु॑त्त॒रात्सं॒यद्व॑सु॒स्तस्य॑ताक्ष्र्य॒श्चारि॑ष्टनेमिश्च सेनानीग्राम॒
ण्यौ॑ ॥ वि॒श्वाची॑चघृ॒ताची॑चाप्प्सर॒सा॒वापो॑हे॒तिर्व्वा॒तः॒प्प्रहे॑तिस्ते
भ्यो॒नमो॑ऽअस्तु॒ते नो॑ऽवन्तु॒ते नो॑मृडयन्तु॒तेय न्द्द्विष्मो॒यश्च॑नो॒द्वेष्टि
तमे॑षाञ्जम्भे॑दध्मः ॥ १८ ॥ अ॒यमु॒परि॑ ॥ अ॒यमु॒पर्य॒र्व्वाग्ग्व॑सु
स्तस्य॒सेन॒जिच्च॑सु॒षेण॑श्च सेनानीग्ग्राम॒ण्यौ॑ ॥ उ॒र्व्वशी॑चपू॒र्व्वचि॑त्ति

श्चाप्प्सरसांववस्स्फूर्जन्न्हेतिर्व्विद्युत्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनो
वन्तुतेनोम्मृडयन्तुतेयन्द्विष्ष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः
॥ १९ ॥ [५] अग्निर्म्मूर्द्धा । दिवःककुत्पतिः पृथिव्याऽअयम् ॥
अपाᳬरेताᳬसिजिन्न्वति ॥ २० ॥ अयमग्ग्निः । सहस्रिणोव्वा
जंस्यशतिनस्प्पतिः ॥ मूर्द्धाकवीरंयीणाम् ॥ २१ ॥ त्वामंग्ग्ने ॥ त्वा
मंग्ग्नेपुष्ष्कराद्ध्यथर्व्वानिरंमन्न्थत ॥ मूर्द्ध्नोविश्श्वस्यव्वाघतः ॥ २२ ॥ ॥१३१॥
भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजसश्चनेतायत्त्रानियुद्भिः सचसेशि

वाभिः ॥ दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्ग्नेचकृषेहव्यवाहम् ॥
॥ २३ ॥ अबोध्यग्ग्निः । समिधाजनानाम्प्रतिधेनुमिवायतीमुषासं
म् ॥ यह्वाऽइवप्प्रवयामुज्जिहानाः प्प्रभानवःसिस्स्रतेनाकमच्छ ॥
॥२४॥ अवोचामकवये ॥ अवोचामकवयेमेद्ध्यायवचोवन्दारुवृष
भायवृष्ष्णे ॥ गविष्ठिरोमनसास्तोममग्नौदिवीवरुक्ममुरुव्यञ्चम
श्श्रेत् ॥ २५ ॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअ
ध्वरेष्ष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशे

विंशे ॥ २६ ॥ जनंस्यगोपाः ॥ जनंस्यगोपाऽअंजनिष्टजागृंविर्
ग्निःसुदक्षंःसुवितायनव्यंसे ॥ घृतप्रंतीकोबृहतादिंविस्पृशाद्युम
द्विभांतिभरतेभ्यःशुचिंः ॥ २७ ॥ त्वामंग्ने ॥ त्वामंग्नेऽअङ्गिर
सोगुहाहितमन्वंविन्दञ्छिश्रियाणंवनेवने ॥ सजांयसेमथ्यमा
नःसहोंमहत्वामाहुःसहंसस्पुत्रमंङ्गिरः ॥ २८ ॥ सखांयःसम् ॥
सखांयःसंवंःसम्यञ्चमिषंस्तोमंञ्चाग्नयें ॥ वर्षिष्ठायक्षितीनाम्
ऊर्जोनप्त्रेसहंस्वते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युंवसेवृषन्नग्नेवि

व्विश्वान्न्यूरुर्व्वऽआ ॥ इडस्प्पदेसमिंद्ध्यसेसनोव्वसून्न्यामर ॥ ३० ॥
त्वाग्निंत्रश्श्रवस्तम् । हवन्तेव्विक्षुजन्तवंः ॥ शोचिष्क्केशम्पुरुप्प्रि
याग्नेहुव्याययोढवे ॥ ३१ ॥ एनावंः ॥ एनावोऽअग्निन्नमसोज्र्जोन
पातमाहुवे ॥ प्प्रियञ्चेतिंष्ठमरतिंɱस्वंद्ध्वरंव्विश्वस्यदूतमम्मृतंम् ॥३२॥
व्विश्वंस्यदूतम् ॥ व्विश्वंस्यदूतमम्मृतंव्विश्वंस्यदूतमम्मृतंम् ॥सयोजतेऽ
अरुषाव्विश्वभोजसासदुंद्द्रवत्स्वाहुतः ॥३३॥ सदुंद्द्रवत् ॥ सदुंद्द्रव
त्स्वाहुतःसदुंद्द्रवत्स्वाहुतः ॥ सुब्ब्रह्मायज्ञःसुशमीव्वसूंनान्देवः

२३

राघो॒जनानाम् ॥ ३४ ॥ अग्ने॒र्वाजंस्य ॥ अग्ने॒र्वाजंस्य॒गोमंत॒ऽई
शांनःसहसोयहो ॥ अ॒स्मेधेहिजातवेदो॒महि॒श्श्रवंः ॥३५॥ सऽइं
धा॒नः ॥ सऽइंधा॒नोव्व॒सुंष्क॒विर॒ग्निरी॒डेन्न्योंगि॒रा ॥ रे॒वद॒स्म्मभ्यं
म्पुर्व्वणीकदीदिहि ॥ ३६ ॥ क्ष॒पोरांजन् ॥ क्ष॒पोरांजन्नु॒तत्क्मनाग्ने॒
व्व॒स्तोरु॒तोषसंः ॥ सतिंग्ग्मजम्भर॒क्षसोंदह॒प्प्रति ॥ ३७ ॥ भ॒द्रो
नंः ॥ भ॒द्रोनोंऽअ॒ग्निराहुंतो॒भ॒द्रारा॒तिःसुंभगभ॒द्रोऽअंद्ध्व॒रः ॥ भ॒
द्राऽउ॒तप्प्रशंस्तयः ॥ ३८ ॥ भ॒द्राऽउ॒त । प्प्रशंस्तयोभ॒द्रम्मनंःकृ ॥१२३॥

णुष्वव्वृत्रतूर्य्ये ॥ येनासमत्सुसासह॑÷ ॥ ३९ ॥ येनासमत्सु । सास
होवांस्थिरातंनुहिभूरिशर्द्धताम् ॥ त्वनेमातेऽअभिष्टिभिः ॥ ४० ॥
अग्निन्तम्॥ अग्निन्तम्मंन्न्येयोव्वसुरस्तंय्यंय्यन्तिधेनव॑÷ ॥अस्त
मर्व्वन्तऽआशवोस्तन्नित्यासोव्वाजिनऽइष॑ꣳस्तोतृब्भ्यऽआभर ॥
॥ ४१ ॥ सोऽअग्निः ॥ सोऽअग्निर्य्योव्वसुर्गृणेसंय्यमायन्तिधेन
व॑÷ ॥ समर्व्वन्तोरघुद्रुव॑ꣳसꣳसुजातास॑÷सूरयऽइष॑ꣳस्तोतृब्भ्यऽ
आभर ॥ ४२ ॥ उभेसुश्चन्द्र । सर्प्पिषोदर्व्वीश्रीणीषऽआसनि ॥

उतोनऽउत्पुपूर्य्याऽउक्थेषुशवसस्पतऽइषᳪस्तोतृभ्यऽआभर ॥
॥ ४३ ॥ अग्नेतम् ॥ अग्नेतमद्याश्वन्नस्तोमैःक्रतुन्नभद्रᳪहृदि
स्पृशम् ॥ ऋध्यामातऽओहैः ॥ ४४ ॥ अधाहि ॥ अधाह्यग्ने
क्रतोर्भद्रस्यदक्षस्यसाधोः ॥ रथीऽर्ऋतस्यबृहतोबभूथ ॥ ४५ ॥
एभिर्न्नः ॥ एभिर्न्नोऽअर्कैर्भवानोऽअर्वाङ्क्स्वर्णज्ज्योतिः ॥
अग्नेविश्वेभिःसुमनाऽअनीकैः ॥ ४६ ॥ अग्निᳪहोतारम् ॥ अ
ग्निᳪहोतारम्मन्येदास्वन्तंवसुᳪसूनुᳪसहसोजातवेदसंविप्रन्न

जातवेदसम् ॥ यऽऊर्द्ध्वयास्वद्ध्वरोदेवोदेवाच्यांकृपा ॥ घृतस्यविभ्भ्रा
ष्टिमनुवष्टिशोचिषाजुह्वानस्यसर्प्पिषः ॥४७॥ अग्नेत्वम् ॥ अग्ने
त्वन्नोऽअन्तमऽउतत्त्राताशिवोभवावरूत्थ्यः ॥ वसुरग्निर्वसुश्श्र
वाऽअच्छानक्षिद्युमत्तमᳬरयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवᳬसु
म्नायनूनमीमहेसखिभ्भ्यः ॥४८॥ [२९] येनऽऋषयः ॥ येनऽ
ऋषयस्तपसासत्रमायन्निन्धानाऽअग्निᳬस्वराभरन्तः ॥ तस्मि
न्नहन्निदधेनाकेऽअग्निंय्यमाहुर्म्मनवस्तीर्णबर्हिषम् ॥ ४९ ॥ तम्प

त्नीभिः ॥ तम्पत्नीभिरनुगच्छेमदेवाःपुत्रैर्भ्रातृभिरुतवाहिर
ण्यैः ॥ नाकङ्गृभ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः
॥ ५० ॥ आवाचः ॥ आवाचोमध्यमरुहद्भुरण्युरयमग्निःसत्पति
श्चेकितानः ॥ पृष्ठेपृथिव्यान्निहितोदविद्युतदधस्पदङ्कृणुतांयेपृत
न्यवः ॥५१॥ अयमग्निः ॥ अयमग्निर्वीरतमोवयोधाःसहस्रि
योद्योततामप्रयुच्छन् ॥ विभ्राजमानःसरिरस्यमध्यऽउपप्रया
हिदिव्यानिधाम ॥ ५२ ॥ सम्प्रच्यवध्वमुप । सम्प्रयाताग्नेपथोदे

वयानांन्कृणुद्ध्वम् ॥ पुनः॑कृण्वानापितरायुवांनान्वाताᳬंसीत्व
यितन्तुंमेतम् ॥५३॥ उद्बुध्यस्व ॥ उद्बुध्यस्वाग्नेप्प्रतिंजागृहित्वमिं
ष्टापूर्त्तेसᳬंसृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विं
श्वेंदेवायजंमानश्चसीदत ॥५४॥ येनवहंसि । सहस्रंय्येनांग्नेसर्व्वं
वेदसम् ॥ तेनेमंय्यज्ञन्नोंनयस्वर्द्देवेषुगन्तंवे ॥५५॥ अयन्ते ॥ अय
न्तेयोनिंर्ऋत्वियोयतोंजातोऽअरोंचथाः ॥ तञ्जानन्नंग्नऽआरोहा
थांनोवर्द्धयारयिम् ॥ ५६ ॥ [८] तपंश्च ॥ तपंश्चतपस्यश्चशैशिरा

संहि· वृतूऽ अग्नेरन्तꣳश्लेषोसिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽ पू. अ.
॥१३६॥ ओषधयꣳकल्प्पन्तामग्नयꣳपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताꣳ ॥ येऽअ ॥१५॥
ग्नयꣳसमनसोन्तराद्यावापृथिवीऽइमे ॥ शैशिरावृतूऽअभिकल्प्प
मानाऽइन्द्रमिवदेवाऽ अभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसी
दतम् ॥५७॥ परमेष्ठीत्त्वा । सादयतुदिवस्पृष्ठेज्ज्योतिष्म्मतीम् ॥
व्विश्वस्म्मैप्प्राणायापानायव्व्यानायव्विश्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्ते ॥१३६॥
धिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण ॥ छिद्र

म्पृणाथोसीदध्रुवात्वम् ॥ इन्द्राग्नीत्वाबृहस्पतिरस्मिन्नन्योनाव
सीषदन्॥५९॥ ताऽअंस्य । सूदंदोहसःंसोमंश्रीणन्तिपृश्नंयःं ॥
जन्मन्देवानांविशंस्त्रिष्वारौचनेदिवः॥६०॥ इन्द्रंविश्वाःं॥ इन्द्रं
विश्वाऽअवीवृधन्त्समुद्रव्यंचसङ्गिरंः॥ रथीतमंरथीनांवाजांनां
सत्पंतिम्पतिंम् ॥ ६१ ॥ प्रोथदश्वः ॥ प्रोथदश्वोनयवंसेविष्य
न्यदामहःसंवरंणाद्यस्त्थांत् ॥ आदंस्यवातोऽअनुंवातिशोचिरधं
स्म्मतेव्रजंनकृष्णमंस्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदंनेसाद

संहि. याम्म्यवंतश्छायायांꣳसमुद्रस्यहृदये ॥ रश्म्मीवतीम्भास्वतीमा पू. अ.
॥१३७॥ याद्याम्भास्याप्पृथिवीमोर्व्वन्तरिक्षम् ॥६३॥ परमेष्ठीत्वा । सादयतु ॥१५॥
दिवस्पृष्ठेव्व्यचस्वतीम्प्रथस्वतीन्दिवंय्यच्छदिवंदृꣳहदिवम्माहिं
ꣳसीः ॥ विश्वस्मैप्राणायापानायव्व्यानायोदानायप्रतिष्ठायैच
रित्राय ॥ सूर्य्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्दिषाशन्तमेनतया
देवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६४ ॥ सहस्रस्यप्रमा । सिसहस्रस्य ॥१३७॥
प्रतिमासिसहस्रस्योन्मासिसाहस्रोसिसहस्रायत्त्वा ॥ ६५ ॥ [९]

इतिश्रीवाजसनेयसंहितायांपंचदशोऽध्यायः ॥१५॥ श्रीवेदपुरुषा
यनमः ॥ अनुवाकसूत्रम् ॥ नमस्तेषोडशहिरण्यबाहवऽउष्णीषि
णेतक्षभ्योज्येष्ठायपंचकाःस्रुत्यायचतस्रःशंभवायैकापार्यायपंच
द्रापेअंधसोविं६शतिर्नवषट्षाष्टिः ॥ हरिःॐनमंस्ते ॥ नमंस्तेरुद्र
मन्यवंऽउतोतऽइषंवेनमंः ॥ बाहुभ्यांमुततेनमंः ॥१॥ यातें ।
रुद्रशिवातनूरघोरापांपकाशिनी ॥ तयांनस्तन्वाशन्तमयागिरिं
शन्ताभिचांकशीहि ॥२॥ यामिषुंम् ॥ यामिषुंङ्गिरिशन्तहस्तेंबि

भर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीः पुरुषञ्जगत् ॥ ३ ॥
शिवेनव्वचसा । त्त्वागिरिशाच्छावदामसि ॥ यथानः सर्व्वमिज्जगद
यक्ष्मꣳसुमनाऽअसत् ॥४॥ अद्ध्यवोचत् ॥ अद्ध्यवोचदधिवक्काप्प्र
थमोदैव्यो भिषक् ॥ अहीँश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्न्यो
धराचीः परासुव ॥ ५ ॥ असौयः ॥ असौयस्ताम्म्रोऽअरुणऽउतब
भ्रुः सुमङ्गलः ॥ येचैनꣳरुद्द्राऽअभितोदिक्षुश्रिताः सहस्त्रशोवैषा
ꣳहेडऽईमहे ॥ ६ ॥ असौयः ॥ असौयोवसर्प्पतिनीलग्ग्रीवोव्विलो ॥१३८॥

हितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः
॥ ७ ॥ नमोस्तु ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथो
येऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥ ८ ॥ प्रमुञ्च ॥ प्रमुञ्चधन्व
नस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपराताभगवो
वप ॥ ९ ॥ विज्यन्धनुः । कपर्द्दिनोविशल्योबाणवाँ२ऽउत ॥ अने
शन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ याते । हेतिर्म्मी
ढुष्टमहस्तेबभूवतेधनुः ॥ तयास्म्मान्विश्वतस्त्वमयक्ष्मयापरि

संहि· भुज ॥ ११ ॥ परिंते ॥ परिंतेधन्न्वनोहेतिरस्म्मान्न्वृणक्कुव्विश्श्वतः ॥ पू· अ·
॥१३९॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्यधनुः ॥ ॥१६॥
अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशि
वोनःसुमनाभव ॥१३॥ नमस्ते ॥ नमस्तऽआयुधायानाततायधृ
ष्णवे ॥ उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने ॥१४॥ मानः ॥
मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षित ॥१३९॥
म् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्ररीरिषः

॥ १५ ॥ मानस्तोके । तनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषु
रीरिषः ॥ मानोवीरान्रुद्र भामिनोवधीर्हविष्मन्तःसदमित्त्वाह
वामहे ॥ १६ ॥ [१६] शतम् ॥८००॥ नमोहिरण्यबाहवे । सेना
न्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यः पशूनाम्पतयेन
मोनमः शष्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिके
शायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥ नमोब
भ्लुशाय । व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पत

 येनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःसूतायाहं
 न्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥१८॥ नमोरोहिताय । स्थ
पतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्प
तयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घो
षायाक्रन्दयतेपत्तीनाम्पतयेनमोनमःकृत्स्नायतया ॥ १९ ॥
नमःकृत्स्नायतया । धावतेसत्त्वनाम्पतयेनमोनमःसहमानायनि
व्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्ते

नानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्ण्यानाम्पतयेनमोन
मोवञ्चते ॥ २० ॥ नमोवञ्चते । परिवञ्चतेस्तायूनाम्पतयेनमोनमो
निषङ्गिणंऽइषुधिमतेतस्कराणाम्पतयेनमोनमः सृकायिभ्योजि
घांꣳसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्ता
नाम्पतयेनमः ॥ २१ ॥ [५] नमऽउष्णीषिणे । गिरिचराय
कुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽ
आतन्वानेभ्यः प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्य

संहि॰ श्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योविध्यद्भ्यश्चवोन पू॰ अ॰
॥१४१॥ मोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्य ॥१६॥
श्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमःसभाभ्यः ॥ २३ ॥
नमःसभाभ्यः । सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपति
भ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोन
मऽउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमोगणेभ्यः ॥ २४ ॥ न ॥१४१॥
मोगणेभ्यो । गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्य

श्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो
विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥ २५ ॥ नमः सेनाभ्यः ।
सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो नमः
क्षतृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो
नमः ॥ २६ ॥ [५] नमस्तक्षभ्यः ॥ नमस्तक्षभ्यो रथकारे
भ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादे
भ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो

संहि· पू· अ·

॥१४२॥ न॒म॒ꣳश्वभ्य॑ः ॥ २७ ॥ न॒म॒ꣳश्वभ्य॒ꣳश्वप॑तिभ्यश्च वो॒नमो॒नमो॑भ॒ ॥१६॥

वा॒यं॑चरु॒द्राय॑च॒नम॑ःश॒र्वाय॑चपशु॒पत॑येच॒नमो॒नील॑ग्रीवायचशि

ति॒कण्ठा॑यच॒नम॑ःकप॒र्दिने॑ ॥ २८ ॥ नम॑ःकप॒र्दिने॑ । च॒व्युप्तके

शाय॒चनम॑ःसह॒स्राक्षाय॑चश॒तध॑न्वनेच॒नमो॑गिरिश॒याय॑चशिपि

वि॒ष्टाय॑च॒नमो॑मी॒ढुष्ट॑माय॒चेषु॑मतेच॒नमो॑ह्र॒स्वाय॑ ॥ २९ ॥ नमो॑ह्र॒

स्वाय॑ । चवा॒मना॑यच॒नमो॑बृह॒तेच॒वर्षी॑यसेच॒नमो॑वृ॒द्धाय॑चस॒वृधे॑च॒ ॥१४२॥

नमो॒ग्र्या॑यचप्रथ॒माय॑च॒नम॑ऽआ॒शवे॑ ॥ ३० ॥ नम॑ऽआ॒शवे॑ । चाजि॒

रायंचनमः शीघ्र्यायचशीभ्यायचनमऽ ऊर्म्यायचावस्वन्या
यचनमोनादेयायंचद्वीप्यायच ॥३१॥[५] नमोज्येष्ठाय । चकनि
ष्ठायंचनमंः पूर्वजायंचापरजायंचनमोमध्यमायंचापगल्भायंच
नमोजघन्यायचबुध्न्यायचनमः सोभ्याय ॥३२॥ नमः सोभ्या
य । चप्रतिसर्यायचनमोयाम्यायचक्षेम्यायचनमः श्लोक्या
यचावसान्यायचनमंऽउर्वर्यायचखल्यायचनमोवन्याय ॥३३॥
नमोवन्याय । चकक्ष्यायचनमंः श्रवायंचप्रतिश्रवायंचनमंऽ

संहि· आशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्मिने पू· अ·

॥१४३॥ ॥ ३४ ॥ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेच ॥१६॥

नमःश्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचन

मोधृष्णवे ॥३५॥ नमोधृष्णवे। चप्रमृशायचनमोनिषङ्गिणेचेषु

धिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायचसुधन्वनेच

॥ ३६ ॥ [५] नमःस्रुत्याय। चपथ्यायचनमःकाट्यायचनीप्या ॥१४३॥

यचनमःकूल्यायचसरस्यायचनमोनादेयायचवैशन्तायचनमः

कूप्प्याय ॥ ३७ ॥ नमः कूप्प्याय । चावट्ट्याय च नमो वीध्र्याय चा
तप्प्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय
च नमो वात्याय ।३८। नमो वात्याय च रेष्म्याय च नमो वास्तव्याय
च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च
नमः शङ्गवे ।३९। नमः शङ्गवे । च पशुपतये च नमऽउग्राय च भीमा
य च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षे
भ्यो हरिकेशेभ्यो नमस्ताराय ॥ ४० ॥ [४] नमः शम्भवाय ।

चमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशि

वतरायच ॥ ४१ ॥ [१] नमः पार्य्यायचावार्य्यायचनमः प्रतर
णायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफे
न्यायचनमः सिकत्त्याय ॥ १२ ॥ नमः सिकत्यायचप्रवाह्याय
चनमः किंशिलायचक्षयणायचनमः कपर्द्दिनेचपुलस्तयेचन
मऽइरिण्यायचप्रपथ्यायचनमोव्व्रज्याय ॥४३॥ नमोव्व्रज्याय । ॥१४४॥
चगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनि

वे॒ष्प्या॑य च॒ नम॒: काट्या॑य च ग॒ह्वरे॑ष्ठाय॑ च॒ नम॒: शुष्क्या॑य ॥४४॥ न
म॒: शुष्क्या॑य । च हरि॒त्या॑य च॒ नमः॑ पाꣳस॒व्या॑य च रज॒स्या॑य च॒ न
मो॒ लोप्या॑य चोल॒प्या॑य च॒ नम॒ऽऊर्व्या॑य च॒ सूर्व्या॑य च॒ नमः॑ पर्णा
य॑ ॥ ४५ ॥ नमः॑ पर्णाय॑ । च पर्णश॒दाय॑ च॒ नमः॑ऽउद्गुरमा॑णाय चा
भिघ्न॒ते च॒ नमः॑ऽआखिद॒ते च॑ प्रखिद॒ते च॒ नमः॑ऽइषुकृ॒द्भ्यो ध॑नुष्कृ॒द्भ्य॑श्च
वो॒ नमो॒ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑ विचिन्व॒त्के
भ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नमः॑ऽआनिर्ह॒तेभ्य॑: ॥४६॥ [५] द्रापे॒ऽ

संहि· अन्धसः ॥ द्रापेऽअन्धसस्पतेदरिद्रनीलंलोहित ॥ आसाम्प्रजानां पू· अ·
॥१४५॥ मेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः किञ्चनाममत् ॥ ४७ ॥ इमा ॥१६॥
रुद्राय । तवसेकपर्द्दिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥ यथाशमस
द्द्विपदेचतुष्पदेव्विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातें ।
रुद्रशिवातनूः शिवाव्विश्वाहाभेषजी ॥ शिवारुतस्यभेषजीतयानो
मृडजीवसे ॥ ४९ ॥ परिनः ॥ परिणोरुद्रस्यहेतिर्व्वृणक्तुपरित्वेषस्य ॥१४५॥
दुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनं

यायमृड ॥ ५० ॥ मीढुंष्टमशिवंतम । शिवोनं:सुमनाभव ॥ पर
मेवृक्षऽआयुंधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रदागंहि ॥
॥ ५१ ॥ विकिंरिद्रविलोंहित । नमंस्तेऽअस्तुभगवः ॥ यास्तेंसहस्रं
ᳫंहेतयोऽन्यमस्मन्निवंपन्तुताः ॥५२॥ सहस्राणिसहस्रशः ॥ सह
स्राणिसहस्रशोबाह्वोस्तवंहेतयं: ॥ तासामीशानोभगवःपराची
नामुखांकृधि ॥ ५३ ॥ असंङ्ख्यातासहस्राणि । येरुद्राऽअधिभू
म्म्यांम् ॥ तेषांᳫंसहस्रयोजनेवधन्वांनितन्मसि ॥ ५४॥ अस्मिन्

संहि· न्मंहति ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाᳫंसह पू· अ·
॥१४६॥ स्रयोजनेवधन्वांनितन्मसि ॥ ५५ ॥ नीलंग्ग्रीवाःशितिकण्ठाः ॥ ॥१६॥
नीलंग्ग्रीवाःशितिकण्ठादिवᳫंरुद्राऽउपंश्श्रिताः ॥ तेषाᳫंसहस्र
योजनेवधन्वांनितन्मसि॥५६॥नीलंग्ग्रीवाःशितिकण्ठाः। शर्वाऽ
अधःक्षंमाचराः ॥ तेषाᳫंसहस्रयोजनेवधन्वांनितन्मसि ॥५७॥
येवृक्षेषु । शष्पिञ्जरानीलंग्ग्रीवाविलोहिताः ॥ तेषाᳫंसहस्रयो ॥१४६॥
जनेवधन्वांनितन्मसि ॥५८॥ येभूतानाम् ॥ येभूतानामधिपतयो

व्विशिखासं÷कपुर्द्दिनं÷ ॥ तेषांꣳसहस्रयोजुनेवुधन्न्वांनितन्न्मसि
॥ ५९ ॥ येपुथाम् ॥ येपुथाम्पंथिरक्षंयऽऐलबृदाऽआंयुर्युधं÷ ॥
तेषांꣳसहस्रयोजुनेवुधन्न्वांनितन्न्मसि ॥ ६० ॥ येतीुर्त्थांनि । प्प्रच
रन्तिसृकाहंस्तानिषुङ्गिणं÷ ॥ तेषांꣳसहस्रयोजुनेवुधन्न्वांनितन्न्म
सि ॥ ६१ ॥ येन्नेषु । व्विविद्ध्यंन्तिपात्रैंषुपिबंतोजनांन् ॥ तेषांꣳसह
स्रयोजुनेवुधन्न्वांनितन्न्मसि ॥ ६२॥ यऽएतावंन्तꣳ ॥ यऽएतावंन्त
श्श्चभूयांꣳसश्श्चदिशोंरुद्राव्वितस्त्थिरे ॥ तेषांꣳसहस्रयोजुनेवुध

संहि· न्वानितन्नमासि ॥६३॥ नमोस्तु । रुद्रेभ्योयेदिवियेषांवर्षमिषवः ॥ पू· अ·
॥१४७॥ तेभ्योदशप्प्राचीर्दशंदक्षिणादशंप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥ ॥१६॥
तेभ्योनमोऽ अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वे
ष्टितमेषाञ्जम्भेदध्मः ॥६४॥ नमोस्तु । रुद्रेभ्योयेन्तरिक्षेयेषांवा
तऽइषवः ॥ तेभ्योदशप्प्राचीर्दशंदक्षिणादशंप्प्रतीचीर्दशोदीची
र्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मो ॥१४७॥
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥६५॥ नमोस्तु । रुद्रेभ्योयेपृथि

ब्यारुयेषामन्नमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीची
र्दशोदीचीर्दशोर्द्धाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तु
तेयन्द्विष्मोयश्चनोद्वेष्टितमैषाञ्जम्भेदध्मः ॥६६॥ [२०] इति
श्रीवाजसनेयसंहितायांषोडशोऽध्यायः॥१६॥ श्रीवेदपुरुषायनमः
अनुवाक्सूत्रम् ॥ अश्मन्नूर्जंदशनमस्तेपंचाग्निस्तिग्मेनननवचक्षुषः
पिताष्टावाशुःशिशानःसप्तदशोदेनंक्रमध्वमग्निनापंचदशकौशुक्र
ज्योतिःसप्तेमᳫंस्तनंत्रयोदशनवैकोनशतं ॥ हरिःॐअश्मन्नूर्ज्जं

म् ॥ अश्मन्नूर्ज्जम्पर्व्वतेशिश्रियाणामद्भ्यऽओषधीभ्योवनस्प्पति
 भ्योअधिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतः सꣳरराणाऽ
अश्मँस्तेक्षुन्मयितऽऊर्ग्यन्द्विष्मस्तन्तेशुगृच्छतु ॥ १ ॥ इमामे ।
अग्नऽइष्टकाधेनवः सन्त्वेकाचदशचदशचशतञ्चशतञ्चसहस्रञ्च
सहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्रयुतञ्चार्बुदञ्चन्यर्बुदञ्चस
मुद्रश्चमध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअग्नऽइष्टकाधेनवः सन्त्वमुत्रा ॥१४८॥
मुष्मिँल्लोके ॥ २ ॥ ऋतवस्त्थ । ऽऋतावृधऽऋतुष्ठास्त्थऽऋता

वृधं ॥ घृतश्चुतौमधुश्चुतौव्विराजोनामकामदुघाऽअक्षीयमाणा‌ᳪ
॥ ३ ॥ समुद्रस्यत्वा ॥ समुद्रस्यत्वावकयाग्ग्नेपरिव्ययामसि ॥
पावकोऽअस्म्मभ्यᳪ शिवोभव ॥ ४ ॥ हिमस्यत्त्वा । जरायु
णाग्ग्नेपरिव्ययामसि ॥ पावकोऽअस्म्मभ्यᳪ शिवोभव ॥ ५ ॥
उपज्ज्मन् ॥ उपज्ज्मन्नुपवेतसेवतरनदीष्ष्वा ॥ अग्नेपित्तमपामसि
मण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्ण्णᳪ शिवङ्कृधि ॥ ६ ॥
अपामिदम् ॥ अपामिदन्न्ययनᳪ समुद्रस्यनिवेशनम् ॥ अन्न्याँ

संहि· स्तेऽअस्म्मत्तपन्तुहेतयंः पावकोऽअस्म्मभ्यꣳशिवोभव ॥ ७ ॥ पू. अ.

॥१४९॥ अग्नेपावक । रोचिषामन्द्रयादेवजिह्वया ॥ आदेवान्वंक्षियक्षिच ॥१७॥

॥ ८ ॥ सनःपावकदीदिवोग्नेदेवाँ२ऽइहावह ॥ उपयज्ञꣳहविश्च

नः ॥ ९ ॥ पावकयायः ॥ पावकयायश्चितयन्त्याकृपाक्षामन्रुरु

चऽउषसोनभानुना ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृ

षाणोऽअजरः ॥ १० ॥ [१०] नमस्ते ॥ नमस्तेहरसेशोचिषेनम ॥१४९॥

स्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽअस्म्म

भ्यश्शिवोभव ॥११॥ नृषदेवेट् ॥ नृषदेवेडप्सुषदेवेड्वर्हिषदेवेड्
वनसदेवेट्स्वर्विदेवेट् ॥१२॥ येदेवाः ॥ येदेवादेवानाँय्यज्ञियायज्ञियां
नाᳪसंवत्सरीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेऽअस्मिम
न्त्स्वयम्पिबन्तुमधुनोघृतस्य ॥ १३ ॥ येदेवाः ॥ येदेवादेवेष्वधि
देवत्त्वमायन्न्येब्रह्मणᳫपुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवतेधा
मकिञ्चननतेदिवोनपृथिव्याऽअधिस्नुषु ।१४। प्राणदाअपानदाः॥
प्राणदाऽअपानदाव्यानदावर्चोदावरिवोदाः ॥ अन्न्याँस्तेऽअस्म्म

संहि· ॥१५०॥ पू·अ· ॥१७॥

त्तंपन्तुहेतयः पावकोऽअस्मभ्यꣳ शिवोभव ॥ १५ ॥ [५] अग्नि

स्तिग्ग्मेनं । शोचिषायासद्विश्श्वन्न्यत्रिणम् ॥ अग्निर्नौवनतेरयिम्

॥१६॥ सऽइमा । विश्श्वाभुवनानिजुह्वदृषिर्होतान्न्यसीदत्पिताऩः ॥

सऽआशिषाद्द्रविणमिच्छमानः प्प्रथमच्छदवराँ२आविवेश ॥१७॥

किꣳस्वित् ॥ किꣳस्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वित्कथा

सीत् ॥ यतोभूमिञ्जनयन्विश्श्वकर्म्माविद्यामौर्णोन्महिनाविश्श्व ॥१५०॥

चक्षाः ॥ १८ ॥ विश्श्वतश्चक्षुरुत । विश्श्वतोमुखोविश्श्वतोबाहुरुतवि

श्वतंस्प्पात् ॥ सम्बाहुब्भ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमीजनयंन्दे
वऽएकः ॥१९॥ किंस्वित् ॥ किंस्विद्वनङ्कऽउसवृक्षऽआंसय
तोद्यावापृथिवीनिंष्टतक्षुः ॥ मनीषिणोमनंसापृच्छतेदुतद्यदध्यति
ष्ठद्भुवंनानिधारयंन् ॥ २० ॥ याते ॥ यातेधामांनिपरमाणियाव
मायामंद्धमाव्विश्वकर्म्मन्नुतेमा ॥ शिक्षासखिंब्भ्योहविषिंस्वधा
वःस्वयंय्यंजस्वतन्वंवृधानः ॥२१॥ व्विश्वंकर्म्मन्हविषा । वावृधा
नःस्वयंय्यंजस्वपृथिवीमुतद्याम् ॥ मुह्यन्त्वन्न्येऽअभितःसपत्काऽ

संहि॰ इहास्म्माकंम्मुघवासूरिरंस्तु ॥ २२ ॥ व्वाचस्प्पतिम् ॥ व्वाचस्प्पतिं पू॰ अ॰
॥१५१॥ व्विश्श्वकंम्र्माणमूतयेमनोजुवंव्वाजेऽअद्याहुवेम ॥ सनोव्विश्श्वानिह ॥१७॥
वंनानिजोषद्विश्श्वशंम्भूरवंसेसाधुकंम्र्मा ॥ २३ ॥ व्विश्श्वंकर्म्मन्हवि
षा । वर्द्धनेनत्रातारमिन्द्रंमकृणोरवद्ध्यम् ॥ तस्म्मैव्विशःसमंनम
न्तपूर्वीरयमुग्ग्रोव्विहव्योयथासंत् ॥२४॥ [९] चक्षुषःपिता । मनं
साहिधीरोघृतमैनेऽअजनन्नम्नंमाने ॥ यदेदन्ताऽअदंदृहन्तपूर्व्वऽ ॥१५१॥
आदिद्यावापृथिवीऽअंप्रथेताम् ॥२५॥ व्विश्श्वकंम्र्माव्विमंनाः ॥ व्वि

श्वकर्म्माविमनाऽआद्विहायाधाताविधातापरमोतसन्दृक् ॥ तेषा
मिष्टानिसमिषामदन्तियत्रासप्तऽऋषीन्परऽएकमाहुः ॥ २६ ॥
योनः ÷ । पिताजनितायोविधाताधामानिवेदभुवनानिविश्वा ॥
योदेवानान्नामधाऽएकऽएवतꣳसम्प्रश्नम्भुवनायन्त्यन्या ॥२७॥
तऽआयजन्तद्रविणꣳसमस्माऽऋषयःपूर्वेजरितारोनभूना ॥ असू
र्त्तेसूर्त्तेरजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि ॥२८॥ परोदिवा ।
परऽएनापृथिव्यापरोदेवेभिरसुरैर्यदस्ति ॥ कꣳस्विद्गर्भम्प्रथम

संहि· न्दंध्रुऽआपोयत्रंदेवाःसमपंश्यन्तपूर्व्वें ॥ २९ ॥ तमित् ॥ तमिद्गर्ब्भं पू· अ·
॥१५२॥ म्प्रथमन्दंध्रुऽआपोयत्रंदेवाःसमगंच्छन्तविश्श्वें ॥ अजस्यनाभा ॥१७॥
वद्ध्येकमार्प्पितंय्यस्म्मिन्विश्श्वानिभुवनानितस्त्थुः ॥३०॥ नतम् ॥
नतंव्विंदाथयऽइमाजजानान्न्यद्युष्म्माकमन्तंरम्बभूव ॥ नीहारेण
प्प्रावृंताजल्प्यांचासुतृपंऽउक्थशासंश्चरन्ति ॥ ३१ ॥ व्विश्श्वकंर्म्मा
हि ॥ व्विश्श्वकंर्म्माह्यजंनिष्टदेवऽआदिद्गन्धर्व्वोऽअंभवद्द्वितीयंः ॥ ॥१५२॥
तृतीयंःपिताजंनितौषंधीनामपाङ्गर्ब्भंव्यदधात्पुरुत्रा ॥३२॥[८]

आशुःशिशानः ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभ
णश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजय
त्साकमिन्द्रः ॥३३॥ सङ्क्रन्दनेनानिमिषेण । जिष्णुनायुत्कारे
णदुश्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषु
हस्तेनवृष्णा ॥ ३४ ॥ सऽइषुहस्तैः ॥ सऽइषुहस्तैःसनिषङ्गिभिर्व
शीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्र
धन्वाप्रतिहिताभिरस्ता ॥ ३५ ॥ बृहस्पतेपरि । दीयारथेनरक्षो

संहि· ॥१५३॥ हामित्राँ॑२ऽअप॒बाध॑मानः॒ ॥ प्प्र॒भ॒ञ्जन्त्सेना॑ᳪप्प्रमृ॒णोयु॒धाज॑यंन्न॒ पू· अ· ॥१७॥
स्म्माक॑मेद्ध्यवि॒ता रथा॑नाम् ॥ ३६ ॥ ब॒ल॒वि॒ज्ञा॒यस्स्थवि॑रः॒॥ ब॒ल॒वि॒
ज्ञा॒यस्स्थवि॑रः॒प्प्रवी॑रः॒सह॑स्वान्वा॒जी सह॑मानऽउ॒ग्ग्रः ॥ अ॒भिवी॑
रोऽअ॒भिस॑त्त्वासहो॒जाजैत्र॑मिन्द्र॒रथ॒मातिष्ठगो॒वित् ॥ ३७ ॥ गो॒त्र॒
भिदं॑ङ्गो॒विद॑म् ॥ गो॒त्र॒भिदं॑ङ्गो॒विदं॒वज्ज्र॑बाहु॒ञ्जय॑न्त॒मज्म॑प्प्रमृ॒ण
न्त॒मोजं॑सा॥इ॒मᳪस॑जाता॒ऽअनु॑वीरयद्ध्व॒मिन्द्र॑ᳪस॒खायो॒ऽअनु॒सᳪ ॥१५३॥
र॑भद्ध्वम् ॥ ३८ ॥ अ॒भिगो॒त्राणि॑ ॥ अ॒भिगो॒त्राणि॒सह॑सा॒गाह॑मानो

दुर्योध्वीरश्शतमन्युरिन्द्रः ॥ दुश्च्यवनः पृतनाषाडयुध्योस्माकं
सेनाऽअवतुप्प्रयुत्सु ॥३९॥ इन्द्रऽआसाम् ॥ इन्द्रऽआसान्नेताबृह
स्पतिर्द्दक्षिणायज्ञः पुरऽएतुसोमः ॥ देवसेनानामभिभञ्जतीनाञ्ज
यन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ४० ॥ इन्द्रस्यवृष्ष्णः । इन्द्रस्यवृ
ष्ष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥ महामन
साम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥४१॥ उद्धर्षय ।
मघवन्नायुधान्युत्सत्वनाम्मामकानाम्मनाꣳसि ॥ उद्वृत्रहन्वाजि

नांवाजिनान्युद्रथानाञ्जयंताऽयन्तुघोषाः ॥ ४२ ॥ अस्माकमि
न्द्रः । समृतेषुध्वजेष्वस्माकंजाऽइषवस्ताजयन्तु ॥ अस्माकं
वीराऽउत्तरेभवन्त्वस्माँ२ऽउंदेवाऽअवताहवेषु ॥ ४३ ॥ अमीषां
ञ्चित्तम् ॥ अमीषांञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वेपरेहि ॥
अभिप्प्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम् ॥४४॥
अवसृष्टापरा । पतशरव्येब्रह्मसंसिते ॥ गच्छामित्रान्प्रपद्यस्व
मामीषाङ्कञ्चनोच्छिषः ॥४५॥ प्रेत ॥ प्रेताजयतानरऽइन्द्रोवःशर्म्म

यच्छतु॥ उग्राव॑÷सन्तुबाहवौनाधृष्ष्यायथासंथ ॥४६॥ असौया।
सेनांमरुतःपरैषामुभ्यैतिंनुओजंसास्पर्द्धमाना ॥ ताङ्गूहततमुसा
पंव्रतेनुयथामीऽअन्न्योऽअन्न्यन्नजानन् ॥ ४७॥ यत्रंबाणाः। सम्प
तंन्तिकुमाराविंशिखाऽइंव ॥ तन्नुऽइन्द्रोबृहस्पतिरदिंतिःशम्र्म
यच्छतुविश्वाहाशम्र्मयच्छतु ॥ ४८ ॥ मर्म्माणिते ॥ मर्म्माणितेव्व
र्म्मणाच्छादयामिसोमंस्त्वाराजामृतेनानुंवस्ताम् ॥ उरोर्व्वरीयोव्व
रुंणस्तेकृणोतुजयंन्तन्त्वानुंदेवामंदन्तु॥ ४९॥ [१७] उदेनम् ॥

उदेनमुत्तरान्नयाग्ग्नेघृतेनाहुत ॥ रायस्प्पोषेणसꣳसृजप्प्रजयाचब
हुन्धि ॥ ५० ॥ शतम् ॥ १०० ॥ इन्द्रेमम् ॥ इन्द्रेमम्प्रतरान्नयसजा
तानामसद्वशी ॥ समेनंव्वर्च्चसासृजदेवानाम्भागदाऽअसत् ॥ ५१ ॥
यस्यंकुर्म्मः ॥ यस्यंकुर्म्मोगृहेहविस्तमग्ग्नेव्वर्द्धयात्वम् ॥ तस्म्मैदेवाऽ
अधिब्रुवन्नयञ्चब्रह्मणस्प्पतिः ॥ ५२ ॥ उदुत्वा ॥ उदुत्वाव्विश्वेदेवाऽ
अग्ग्नेभरन्तुचित्तिभिः ॥ सनोभवाशिवस्त्वꣳसुप्प्रतीकोव्विभावसुः ॥
॥ ५३ ॥ पञ्चदिशः ॥ पञ्चदिशोदैवीर्य्यज्ञमवन्तुदेवीरपामतिन्दुर्म्म

तिम्बाधमानाः ॥ रायस्पोषैयुज्ञपतिमाभजन्तीरायस्पोषेऽअधि
युज्ञोऽअस्थात् ॥५४॥ समिद्धेऽअग्नौ ॥ समिद्धेऽअग्नावधिमामहा
नऽउक्थपत्रऽईड्योगृभीतः ॥ तुप्तङ्घर्मम्परिगृह्यायजन्तोर्जाय
द्युज्ञमयजन्तदेवाः ॥५५॥ दैव्यायधुत्रे । जोष्ट्रेदेवश्रीः श्रीमनाः
शतपयाः ॥ परिगृह्यदेवायुज्ञमायन्देवादेवेभ्योऽअध्वर्यन्तोऽअ
स्थुः ॥ ५६ ॥ वीतꣳहुविः । शमितꣳशमितायुजध्यैतुरीयोयुज्ञो
यत्रहुव्यमेति ॥ ततोवाकाऽआशिषोनोजुषन्ताम् ॥५७॥ सूर्यैर

संहि· श्मिर्हरिकेशः पुरस्तात्सविताज्योतिर्दयाँ२अजस्त्रम् ॥ तस्यपूषा पू·अ·
॥१५६॥ प्रसवेयातिविद्वान्त्सम्पश्यन्विश्वाभुवनानिगोपाः ॥५८॥ विमा ॥१७॥
नऽएषः ॥ विमानऽएषदिवोमध्यऽआस्तऽआपप्रिवान्रोदसीऽअ
न्तरिक्षम् ॥ सविश्वाचीरभिचष्टेघृताचीरन्तरापूर्वमपरञ्चकेतुम् ॥
॥ ५९ ॥ उक्षासमुद्रः ॥ उक्षासमुद्रोऽअरुणःसुपर्णःपूर्वस्ययोनि
म्पितुराविवेश ॥ मध्येदिवोनिहितःपृश्निरश्मा विचक्रमेरजस ॥१५६॥
स्पात्यन्तौ ॥ ६० ॥ इन्द्रंविश्वाः ॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्र

व्यचसङ्गिरः॥ रथीतम६ रथीनांव्वाजानाᳬसत्पतिम्पतिम् ॥६१॥
देवहूर्यज्ञः ॥ देवहूर्यज्ञऽआचवक्षत्सुम्नहूर्यज्ञऽआचवक्षत् ॥
यक्षदग्निर्देवोदेवाँ२ऽआचवक्षत् ॥६२॥ वाजस्यमा । प्प्रसवऽउद्ग्रा
भेणोदग्ग्रभीत् ॥ अधासपत्नानिन्द्रोमेनिग्ग्राभेणाधराँ२ऽअकः
॥ ६३ ॥ उद्ग्राभञ्च । निग्ग्राभञ्चब्ब्रह्मदेवाऽअवीवृधन् ॥ अधासप
त्नानिन्द्राग्नीमेव्विषूचीनान्व्यस्यताम् ॥ ६४ ॥ [१५] क्रमध्वमग्नि
ना ॥ क्रमध्वमग्निनानाकमुख्यः हस्तेषुबिभ्रतः ॥ दिवस्पृष्ठᳬ

सांह॰ स्वंर्गत्वामिश्श्रादेवेभिराद्धम् ॥६५॥ प्राचीमनु । प्रदिशम्प्रेहिंविद्वा पू॰ अ॰
॥१५७॥ नग्नेरग्नेपुरोऽअग्निर्भवेह ॥ विश्वाऽआशादीद्यानोविभाह्यूर्ज्जन्नो ॥१७॥
धेहिद्विपदेचतुष्पदे ॥ ६६ ॥ पृथिव्याऽअहम् ॥ पृथिव्याऽअहमुद
न्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ॥ दिवोनाकस्यपृष्ठात्स्वर्ज्ज्यो
तिरगामहम् ॥६७॥ स्वर्यन्तः ॥ स्वर्यन्तोनापेक्षन्तऽआद्यांᳫ
रोहन्तिरोदसी ॥ यज्ञंयेविश्वतोधारंसुविद्वांᳫसोवितेनिरे ॥ ६८ ॥ ॥१५७॥
अग्नेप्र ॥ अग्नेप्रेहिप्रथमोदेवयताञ्चक्षुर्देवानामुतमर्त्यानाम् ॥ इयं

क्षमाणाभृगुभिःसजोषाःस्वर्य्यन्तुयजमानाःस्वस्ति॥६९॥ नक्तो
षासा ॥ नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकंसमीची ॥
द्यावाक्षामारुक्मोऽअन्तर्व्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः
॥ ७० ॥ अग्नेसहस्राक्ष । शतमूर्द्धञ्छतन्तेप्प्राणाःसहस्रंव्यानाः ॥
त्वꣳसाहस्रस्यरायऽईशिषेतस्मैतेविधेमवाजायस्वाहा ॥ ७१ ॥
सुपर्णोसिगरुत्मान्पृष्ठेपृथिव्याःसीद॥ भासान्तरिक्षमापृणज्ज्यो
तिषादिवमुत्तभानतेजसादिशऽउद्दृꣳह॥ ७२ ॥ आजुह्वानःसुप्र

तीकं । पुरस्तादग्नेस्त्वंञ्योनिमासीदसाधुया ॥ अस्मिन्न्त्सधस्थेऽ
अद्ध्युत्तरस्मिन्विश्श्वेदेवायजमानश्चसीदत ॥ ७३ ॥ ताꣳसवितुः ॥
ताꣳसवितुर्व्वरेण्यस्यचित्रामाहंव्वृणेसुमतींव्विश्श्वजन्न्याम् ॥ यामं
स्यकण्ण्वोऽअदुहत्प्रपीनाꣳसहस्रधाराम्पयसामहीङ्गाम् ॥ ७४ ॥
व्विधेमंते । परमेजन्न्मन्नग्नेव्विधेमस्तोमैरवरेसधस्थे ॥ यस्म्माद्यो
नेरुदारिथायजेतम्प्रत्त्वेहवीꣳषिजुहुरेसमिद्धे ॥ ७५ ॥ प्रेद्धोऽअग्ने ॥
प्रेद्धोऽअग्नेदीदिहिपुरोनोजस्रयासूर्म्म्यायविष्ठ ॥ त्वाꣳशश्श्वन्तऽ

उपयन्तिवाजाः॥ ७६ ॥ अग्नेतम् ॥ अग्नेतमद्याश्वन्नस्तोमैःक्रतु
न्नभद्रᳪहृदिस्पृशम् ॥ ऋध्यामातऽओहैः॥७७॥ चित्तिञ्जुहोमि ॥
चित्तिञ्जुहोमिमनसाघृतेनयथादेवाऽइहागमन्वीतिहोत्राऽऋता
वृधः ॥ पत्येविश्वस्यभूमनोजुहोमिविश्वकर्म्मणेविश्वाहादा
भ्यᳪहविः॥ ७८ ॥ सप्ततें। ऽअग्नेसमिधः सप्तजिह्वाःसप्तऽऋ
षयःसप्तधामप्प्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजन्तिसप्तयो
नीरापृणस्वघृतेनस्वाहा ॥७९॥ [१५] शुक्रज्योतिश्च । चित्रज्यो

संहि॰ तिश्चसत्यज्ज्योतिश्चज्ज्योतिष्मांश्च ॥ शुक्रश्चऽऋतपाश्चात्यंहः पू॰ अ॰
॥१५९॥ हाः ॥ ८० ॥ ईदृङ् ॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ् ॥ मितश्च ॥१७॥
सम्मितश्चसभराः ॥ ८१ ॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्त्ता
चविधर्त्ताचविधारयः ॥ ८२ ॥ ऋतजिच्च । सत्यजिच्चसेनजिच्चसु
षेणश्च ॥ अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ॥ ८३ ॥ ईदृक्षासऽए
तादृक्षासः ॥ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासःप्रतिसदृक्षा ॥१५९॥
सऽएतन ॥ मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽ

अस्मिन् ॥ ८४ ॥ स्वतवाँश्च ॥ प्रघासीचसान्तपनश्चगृहमेधी च ॥ क्रीडीचशाकीचोज्जेषी ॥ ८५ ॥ इन्द्रन्दैवीः ॥ इन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्व्विशोमरुतोनुवर्त्मानो भवन् ॥ एवमिमंयजमानन्दैवीश्चविशोमानुषीश्चानुवर्त्मानो भवन्तु ॥ ८६ ॥ [७] इमᳬंस्तनम् ॥ इमᳬंस्तनमूर्ज्जस्वन्तन्धया पाम्प्रपीनमग्नेसरिरस्यमद्ध्ये ॥ उत्संजुषस्वमधुमन्तमर्व्वन्त्समुद्रियᳬंसदनमाविशस्व ॥ ८७ ॥ घृतम्मिमिक्षे । घृतमस्ययोनिर्घृतेश्रि

संहि· तोघृतम्म्वस्यधाम ॥ अनुष्ष्वधमावहमादयस्वस्वाहाकृतंव्वृषभव पू·अ·
॥१६०॥ क्षिहव्यम् ॥८८॥ समुद्रादूर्म्मिः ॥ समुद्रादूर्म्मिर्म्मधुमाँ२उदारदु ॥१७॥
पाꣳशुनासममृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्तिजिह्वादे
वानाममृतस्यनाभिः ॥८९॥ व्वयन्नाम ॥ व्वयन्नामप्प्रब्रवामाघृत
स्यास्म्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्माशृणवच्छस्यमानं
ञ्चतुःशृङ्गोवमीद्गौरऽएतत् ॥९०॥ चत्वारिशृङ्गा ॥ चत्वारिशृङ्गा ॥१६०॥
त्रयोऽअस्यपादाद्द्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोव्वृषभोरो

रवीतिमहोदेवोमर्त्याँ२ऽआविवेश ॥९१॥ त्रिधांहितम् ॥ त्रिधांहि
तम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविन्दन् ॥ इन्द्रऽएकꣳ
सूर्य्यऽएकञ्जजानवेनादेकꣳस्वधयानिष्टतक्षुः ॥ ९२ ॥ एताऽअ
र्षन्ति ॥ एताऽअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे ॥
घृतस्यधाराऽअभिचाकशीमिहिरण्ययोवेतसोमध्यऽआसाम् ॥
॥ ९३ ॥ सम्यक्स्रवन्ति । सरितोनधेनाऽअन्तर्हृदामनसापूयमा
नाः॥एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणाः॥९४॥

संहि· सिन्धोरिवप्राध्वने ॥ सिन्धोरिवप्राध्वनेशूघनासोवातप्रमियःप पू·अ·
॥१६१॥ तयन्तियह्वाः॥घृतस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिः ॥१७॥
पिन्वमानः ॥ ९५ ॥ अभिप्रवन्त ॥ अभिप्रवन्तसमनेवयोषाःक
ल्याण्यःस्मयमानासोऽअग्निम् ॥ घृतस्यधाराःसमिधोनसन्त
ताजुषाणोहर्य्यतिजातवेदाः ॥९६॥ कन्याऽइववहतुम् ॥ कन्याऽ
इववहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ॥ यत्रसोमः ॥१६१॥
सूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥९७॥ अभ्यर्षत । सुष्टु

तिङ्ङुर्व्यमाजिमस्म्मासुभद्राद्द्रविणानिधत्त ॥ इमंयज्ञन्नयतदेवता
नोघृतस्यधारामधुमत्पवन्ते ॥ ९८ ॥ धामन्ते ॥ धामन्तेविश्वम्भु
वनमधिश्श्रितमन्तःसंमुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽ
आभृतस्तमश्यामुमधुमन्तन्तऽऊर्म्मिम् ॥ ९९ ॥ [१३] इतिश्री
वाजसनेयसंहितायांसप्तदशोऽध्यायः॥ १७॥ श्रीवेदपुरुषायनमः॥
अनुवाक्सूत्रम् ॥ वाजःसत्यमूर्क्चतुष्काअश्माग्निस्त्रिकाव६शुः
पंचैकाचतस्रोवाजायद्वेवाजस्यन्वष्टावृताषाट्त्रयोदशाग्निंयुन

ज्मिसप्तयदाकूताद्वार्त्रहत्यायदशकौत्रयोदशसप्तसप्तति: ॥ हरि:
ॐ वाजश्च । मेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतु
श्चमेस्वरश्चमेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्च
मेयज्ञेनकल्पन्ताम् ॥ १ ॥ प्राणश्च । मेपानश्चमेव्यानश्चमे
सुश्चमेचित्तञ्चम्ऽआधीतञ्चमेवाक्चमेमनश्चमेचक्षुश्चमेश्रोत्रञ्च
मेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ ओजश्च । मेसह
श्चमऽआत्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिचमेस्थीनिच

मेपरूꣳषिचमेशरीराणिचम्ऽआयुश्चमेजराचमेयज्ञेनकल्पन्ता
म् ॥ ३ ॥ ज्यैष्ठ्यञ्च । मऽआधिपत्त्यञ्चमेमन्युश्चमेभामश्चमेम
श्चमेम्भश्चमेजेमाचमेमहिमाचमेव्वरिमाचमेप्प्रथिमाचमेव्वर्षिमा
चमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ स
त्त्यञ्च । मेश्रद्धाचमेजगच्चमेधनञ्चमेव्विश्वञ्चमेमहश्चमेक्क्रीडाचमे
मोदश्चमेजातञ्चमेजनिष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनक
ल्पन्ताम् ॥ ५ ॥ ऋतञ्च । मेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमेजीवा

तुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूखा
श्चमेसुदिनञ्चमेयज्ञेनकल्पन्ताम् ॥ ६ ॥ यन्ताचं । मेधर्ताचमे
क्षेमश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्रसू
श्चमेसीरञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ॥ ७ ॥ शञ्च । मेमयश्च
मेप्रियञ्चमेनुकामश्चमेकामश्चमेसौमनसश्चमेभगश्चमेद्रविणञ्च
मेभद्रञ्चमेश्रेयश्चमेवसीयश्चमेयशश्चमेयज्ञेनकल्पन्ताम् ॥ ८ ॥ ॥१६३॥
[७] ऊर्क्क । मेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधुचमेसग्धि

श्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमेयज्ञेन
कल्पन्ताम् ॥ ९ ॥ रयिश्च । मेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुच
मेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञे
नकल्पन्ताम् ॥ १० ॥ वित्तञ्च । मेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमे
सुगञ्चमेसुपथ्यञ्चम ऽऋद्धञ्चम ऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेम
तिश्चमेसुमतिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयश्च । मेयवा
श्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्च

मेश्यामाकाश्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनंकल्प
न्ताम् ॥ १२ ॥ [४] अश्म्माच । मेमृत्तिकाचमेगिरयंश्चमेपर्व्वता
श्चमेसिकताश्चमेव्वनस्प्पतयश्चमेहिरण्ण्यञ्चमेयंश्चमेश्यामञ्चमेलो
हञ्चमेसीसञ्चमेत्रपुंचमेयज्ञेनंकल्पन्ताम् ॥ १३ ॥ अग्निश्च । म
ऽआपश्चमेव्वीरुधश्चमऽओषधयश्चमेकृष्टपच्च्याश्चमेकृष्टपच्च्याश्चमे
ग्ग्राम्म्याश्चमेपशवऽआरण्ण्याश्चमेव्वित्तञ्चमेव्वित्तिश्चमेभूतञ्चमेभू
तिश्चमेयज्ञेनंकल्पन्ताम् ॥ १४ ॥ व्वसुच । मेव्वसातिश्चमेकर्म्मचमे

शक्तिश्च मेर्थश्च म॒ऽएमश्च म॒ऽइत्याच॑मे॒गति॑श्च मेय॒ज्ञेन॑कल्पन्ताम् ॥ १५ ॥ [३] अ॒ग्निश्च॑ । म॒ऽइन्द्र॑श्च मे॒सोम॑श्च म॒ऽइन्द्र॑श्च मेसवि॒ताच॑म॒ऽइन्द्र॑श्च मे॒सर॑स्वतीचम॒ऽइन्द्र॑श्च मेपू॒षाच॑म॒ऽइन्द्र॑श्च मे॒बृह॒स्पति॑श्च म॒ऽइन्द्र॑श्च मेय॒ज्ञेन॑कल्पन्ताम् ॥ १६ ॥ मि॒त्रश्च॑ । म॒ऽइन्द्र॑श्च मे॒व्वरु॑णश्च म॒ इन्द्र॑श्च मेधा॒ताच॑म॒ऽइन्द्र॑श्च मे॒त्त्वष्टा॑चम॒ऽइन्द्र॑श्च मेम॒रुत॑श्च म॒ऽइन्द्र॑श्च मे॒व्विश्वे॑चमेदे॒वाऽइन्द्र॑श्च मेय॒ज्ञेन॑कल्पन्ताम् ॥ १७ ॥ पृ॒थि॒वीच॑ । म॒ऽइन्द्र॑श्च मे॒न्तरि॑क्षञ्च म॒ऽइन्द्र॑श्च मे॒द्यौश्च॑

मइन्द्रश्चमेसमाश्चम ऽइन्द्रश्चमेनक्षत्राणिचम ऽइन्द्रश्चमेदिशश्चम
ऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥ १८ ॥ [३] अꣳशुश्चं । मेरश्मिश्च
श्चमेदाभ्यश्चमेधिपतिश्चमउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्रवा
यवश्चमेमैत्रावरुणश्चमऽआश्विनश्चमेप्रतिप्रस्थानश्चमेशुक्रश्च
मेमन्थीचमेयज्ञेनकल्पन्ताम् ॥ १९ ॥ आग्रयणश्चं । मेवैश्वदेव
श्चमेध्रुवश्चमेवैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावैश्वदेवश्चमेमरुत्व
तीयाश्चमेनिष्केवल्यश्चमेसावित्रश्चमेसारस्वतश्चमेपात्नीवतश्चमे

हारियोजनश्चंमेयज्ञेनंकल्पन्ताम् ॥२०॥ स्रुचंश्च । मेचमसाश्चमे
व्वायव्यानिचमेद्द्रोणकलशश्चंमेग्ग्रावाणश्चमेधिषवणेचमेपूतभृच्चं
मऽआधवनीयंश्चमेव्वेदिश्चमेबर्हिश्चंमे वभृथश्चंमेस्वगाकारश्चमेय
ज्ञेनंकल्पन्ताम् ॥ २१ ॥ अग्निश्चं । मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्च
मेप्प्राणश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गु
लयःशक्क्वरयोदिशश्चमेयज्ञेनंकल्पन्ताम् ॥२२॥ व्व्रतञ्च । मऽऋत
वश्चमेतपंश्चमेसंव्वत्सरश्चंमेहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरेचंमेयज्ञेनं

संहि· कल्पन्ताम् ॥२३॥ [५] एकांच । मेतिस्त्रश्चमेतिस्त्रश्चमेपञ्चंचमे पू·अ·
॥१६६॥ पञ्चंचमेसप्तचंमेसप्तचंमेनवंचमेनवंचमऽएकांदशचमऽ एकांद ॥१८॥
शचमेत्रयोंदशचमेत्रयोंदशचमेपञ्चंदशचमेपञ्चंदशचमेसप्तदंश
चमेसप्तदंशचमेनवंदशचमेनवंदशचमऽ एकंवि ᳕शतिश्चमऽए
कंविᳬशतिश्चमेत्रयोंवि᳕शतिश्चमेत्रयोंविᳬशतिश्चमेपञ्चंविᳬशति
श्चमेपञ्चंवि᳕शतिश्चमेसप्तविंᳬशतिश्चमेसप्तविं᳕शतिश्चमेनवंवि ॥१६६॥
ᳬशतिश्चमेनवंवि᳕शतिश्चमऽएकंत्रिᳬशच्चमऽएकंत्रि᳕शच्चमेत्रयं

स्त्रिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २४ ॥ चतस्रश्च । मेष्टौचमेष्टौ
चमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमेविꣳशतिश्चमेवि
ꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्चमे
ष्टाविꣳशतिश्चमेद्वात्रिꣳशच्चमेद्वात्रिꣳशच्चमेषट्त्रिꣳशच्चमेषट्त्रिꣳ
शच्चमेचत्वारिꣳशच्चमेचत्वारिꣳशच्चमेचतुश्चत्वारिꣳशच्चमेचतुश्च
त्वारिꣳशच्चमेष्टाचत्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥
त्र्यविश्च । मेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविश्चमेपञ्चा

वीचंमेत्रिवत्त्सश्चंमेत्रिवत्साचंमेतुर्य्यंवाट्चंमेतुर्य्यौहीचंमयज्ञेनंक
ल्प्पन्ताम् ॥ २६ ॥ पष्ठवाट्चं । मेपष्ठौहीचंमऽउक्षाचंमेव्वशाचंमऽ
ऋषभश्चंमेव्वेहश्चंमेनड्वाँश्चंमेधेनुश्चंमेयज्ञेनंकल्प्पन्ताम् ॥ २७ ॥
[४] व्वाजायस्वाहा । प्प्रसवायस्वाहापिजायस्वाहाक्क्रतवेस्वाहाव्व
संवेस्वाहाहर्प्पतयेस्वाहान्हेमुग्धायस्वाहामुग्धायव्वैनꣳशिनाय
स्वाहाव्विनꣳशिनंऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभु
वंनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा ॥ इयन्ते

राणिम्मन्त्रायंयन्तासियमंनऽऊर्ज्जैत्त्वावृष्ट्यैत्त्वाप्प्रजानान्त्वाधिप
त्याय ॥ २८ ॥ आयुर्य्यज्ञेनकल्प्पताम्प्राणोयज्ञेनकल्प्पता
ञ्चक्षुर्य्यज्ञेनकल्प्पता ७ श्रोत्रंयज्ञेनकल्प्पतांवाग्यज्ञेनकल्प्पता
म्मनोयज्ञेनकल्प्पतामात्त्मायज्ञेनकल्प्पताम्ब्रह्मायज्ञेनकल्प्प
ताञ्ज्योतिर्य्यज्ञेनकल्प्पन्ता ७ स्वर्य्यज्ञेनकल्प्पताम्पृष्ठंय्यज्ञेनक
ल्प्पतांयज्ञोयज्ञेनकल्प्पताम् ॥ स्तोमश्चयजुश्चऋक्चसामंचबृहच्च
रथन्तरञ्च ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेः प्प्रजाऽअभू

संहि· ॥१६८॥

मुव्वेट्टाहा ॥ २९ ॥ [२] व्वाजंस्यनु । प्प्रसवेमातरम्मुहीमदिंतिं पू·अ· ॥१८॥

न्नामुव्वचंसाकरामहे ॥ यस्यांमिदंव्विश्श्वम्भुवंनमाविवेशृतस्यान्नोदे

वश्सविताधर्मसाविषत् ॥ ३० ॥ विश्श्वेअद्य । मुरुतोव्विश्श्वंऽऊती

व्विश्श्वेभवन्त्वग्नयुःसमिंद्धाः ॥ व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्व

मस्तुद्रविंणंव्वाजोऽअस्मे ॥ ३१ ॥ व्वाजोनः । सप्तप्प्रदिंशश्चतं

स्त्रोवापरावतं ॥ व्वाजोनोव्विश्श्वैर्हेवैर्द्धनंसातावि॒हावंतु ॥ ३२ ॥ व्वा ॥१६८॥

जोनः ॥ व्वाजोनोऽअद्यप्प्रसुंवातिदानंव्वाजोदेवाँ२ऽऋतुभिः क

ल्प्पयाति ॥ व्वाजोहिमाऽसर्व्वीरञ्जजानव्विश्श्वाऽआशाव्वाजंपतिर्ज्ज
येयम् ॥३३॥ व्वाजं÷पुरस्तांत् ॥ व्वाजं÷पुरस्तांदुतमंद्ध्यतोनोव्वाजो
देवाँ२हविषांव्वर्द्धयाति ॥ व्वाजोहिमाऽसर्व्वीरञ्चकारसर्व्वाऽआशाव्वा
जंपतिर्ब्भवेयम् ॥ ३४ ॥ सम्मा । सृजामिपयंसापृथिव्व्याःसम्मांसृ
जाम्म्यद्भिरोषंधीभिः ॥ सोहंव्वाजंᳪसनेयमग्ग्ने ॥३५॥ पयं÷पृथि
व्व्याम् ॥ पयं÷पृथिव्व्याम्पयऽओषंधीषुपयोदिव्व्यन्तरिंक्षेपयोधाः॥
पयंस्वतीःप्प्रदिशं÷सन्तुमह्यंम् ॥ ३६ ॥ देवस्यंत्वा । सवितुःप्प्रंस

संहि· वृश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्त्यैव्वाचोयन्तुर्य्य पू· अ·
॥१६१॥ न्त्रेणाग्ग्नेश्साम्म्राज्ज्येनाभिषिञ्चामि ॥३७॥ [८] ऋताषाडृतधा ॥१८॥
मा ॥ ऋताषाडृतधामाग्ग्निर्ग्गन्धर्व्वस्तस्यौषधयोप्सरसोमुदोनाम ॥
सनऽइदम्ब्रह्मक्षत्त्रम्पातुतस्म्मैस्वाहावाट्ताभ्यःस्वाहा ॥३८॥ सꣳ
हितोविश्वसामा । सूर्य्योगन्धर्व्वस्तस्यमरीचयोप्सरसऽआयुवो
नाम ॥ सनऽइदम्ब्रह्मक्षत्त्रम्पातुतस्म्मैस्वाहावाट्ताभ्यःस्वाहा ।३९ ॥१६१॥
सुषुम्म्णःसूर्य्यरश्मिः ॥ सुषुम्म्णःसूर्य्यरश्मिश्चन्द्रमागन्धर्व्व

स्तस्यनक्षत्राण्यप्सरसौ भेकुरयो नाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ॥४०॥ इषिरो विश्वव्यचाः ॥ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽअप्सरसऽऊर्ज्जो नाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ॥४१॥ भुज्युः सुपर्ण्णः। भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाऽअप्सरसस्तावा नाम ॥ सनऽइदम्ब्रह्मक्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यः स्वाहा ॥ ॥ ४२ ॥ प्रजापतिर्व्विश्वकर्म्मा । मनो गन्धर्वस्तस्यऽऋक्सामान्य

प्प्सरसऽएष्टंयोनामं ॥ सनंऽइदम्ब्रह्मंक्षुत्रम्पातुतस्म्मैस्वाहाव्वाट्ट्
ब्भ्यःस्वाहा ॥ ४३ ॥ सनंः ॥ सनोभुवनस्यपतेप्प्रजापतेयस्यंतऽउ
परिगृहायस्यंवेह ॥ अस्म्मैब्रह्मंणेस्म्मैक्षुत्रायमहिशर्म्मंयच्छस्वा
हा ॥४४॥ समुद्रोसि ॥ समुद्रोसिनभंस्वानार्द्रदानुःशम्भूर्म्मयोभू
रभिमांव्वाहिस्वाहामारुतोसिमरुताङ्गणः शम्भूर्म्मयोभूरभिमा
व्वाहिस्वाहावस्यूरंसिदुवंस्वाञ्छम्भूर्म्मयोभूरभिमोव्वाहिस्वाहा ॥
॥४५॥ यास्तें । ऽअग्ग्नेसूर्य्येरुचोदिवंमातन्न्वन्तिरश्म्मिभिः ॥ ता

भिन्नोंऽअद्यसर्वांभिरुचेजनोयनस्कृधि ॥४६॥ यावं÷ ॥ यावौदेवाः
सूर्य्येरुचोगोष्वश्वेषुयारुचं÷ ॥ इन्द्राग्नीताभिःसर्वाभीरुचंन्नो
धत्तबृहस्पते ॥ ४७ ॥ रुचन्नः ॥ रुचंन्नोधेहिब्राह्मणेषुरुचःराज
सुनस्कृधि ॥ रुचंविश्यैषुशूद्रेषुमयिधेहिरुचारुचम् ॥४८॥ तत्त्वा ।
यामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भि÷ ॥ अहेड
मानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः ॥ ४९ ॥ स्वर्ण ॥
स्वर्णघर्म्मःस्वाहास्वर्णार्कःस्वाहास्वर्णशुक्रःस्वाहास्वर्णज्ज्यो

संहि· तिँस्वाहास्वर्णसूर्य्यँस्वाहा ॥५०॥ [१३] अग्निंय्युनज्मि॥ अ पू· अ·
॥१७१॥ ग्निंय्युनज्मिशवसाघृतेनदिव्यꣳसुपर्णंव्वयसाबृहन्तम्॥ तेनव्वय ॥१८॥
ङ्गमेमब्ब्रध्नस्यव्विष्टपꣳस्वोरुहाणाअधिनाकमुत्तमम् ॥५१॥ शतम्
॥१०००॥ इमौते। पक्षावजरौपतत्रिणौयाब्भ्याꣳरक्षाꣳस्यपहꣳ
स्यग्ने ॥ ताब्भ्याम्पतेमसुकृतामुलोकंय्यत्रऽऋषयोजग्मुःप्रथम
जाःपुराणाः ॥५२॥ इन्दुर्दक्षः॥ श्येनऽऋतावाहिरण्यपक्षꣳशकु ॥१७१॥
नोभुरण्युः ॥ महान्त्सधस्थेध्रुवऽआनिषत्तोऽनमस्तेऽअस्तुमामा

हिꣳसीः ॥५३॥ दिवोमूर्द्धा । सिंपृथिव्यानाभिरूर्ग्गपामोषधीना
म् ॥ विश्वायुꣳशर्म्मसप्प्रथानमस्प्पथे ॥५४॥ विश्वस्यमूर्द्धन् ॥ वि
श्वस्यमूर्द्धन्नधितिष्ठसिश्रितःसमुद्रेतेहृदयमप्स्वायुरपोदत्तोदधि
म्भिन्त॥दिवस्प्पर्ज्जन्यादन्तरिक्षात्पृथिव्यास्ततोनोवृष्ट्याव ।५५।
इष्टोयज्ञः ॥ इष्टोयज्ञोभृगुराशीर्दावसुभिः ॥ तस्यनऽइष्टस्यप्प्रीत
स्यद्रविणेहागमेः ॥५६॥ इष्टोऽअग्निः ॥ इष्टोऽअग्निराहुतꣳपिप
र्त्तुनऽइष्टꣳहविः ॥ स्वगेदन्देवेभ्योनमः ॥ ५७ ॥ [७] यदाकू

संहि· ॥१७२॥

तात्॥ यदाकूतात्समसुस्रोद्धृदोवामनंसोवासम्भृतञ्चक्षुंषोवा ॥ तदं

नुप्रेतंसुकृतामुलोकंयत्रऽऋषयोजग्गमुः प्रथमजाः पुराणाः ॥५८॥

एतꣳसधस्थपरिंतेददामियमावहाच्छेवधिञ्जातवेदाः ॥ अन्वाग

न्तायज्ञपतिर्वोऽअत्रतꣳस्मंजानीतपरमेव्योमन् ॥५९॥ एतञ्जा

नाथ। परमेव्योमन्देवाःसधस्थाविदरूपमंस्य ॥ यदागच्छात्प

थिभिर्देवयानैरिष्टापूर्तेकृणवाथाविरस्मै ॥ ६० ॥ उद्बुध्यस्व ॥ उद्बु

ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसꣳसृजेथामयञ्च ॥अस्मिन्त्स

पू· अ· ॥१८॥ ॥१७२॥

धस्थेऽअच्युत्त॑रस्मिन्मन्वि॒श्वे॑ देवा यज॑मानश्च सीदत ॥ ६१ ॥ येनव॑
हसि । सहस्रं॒येना॑ग्ने सर्व्ववेदसम् ॥ तेने॒मं॑ऽयज्ञन्नो॑नयस्व॒र्दे॒वेषु गन्त
वे ॥ ६२ ॥ प्रस्तरे॑णपरि॒धिना॑ । स्रु॒चावेद्या॑चब॒र्हिषा॑ ॥ ऋ॒चेमं॑ऽयज्ञ
न्नो॑नयस्व॒र्दे॒वेषुगन्तवे ॥६३॥ यद्द॒त्तम् ॥ यद्द॒त्तं॑ऽयत्परा॒दानं॒ऽयत्पू
र्तं॑ऽयाश्च दक्षि॑णाः ॥ तद॒ग्निर्वै॑श्वकर्म्म॒णः स्व॒र्दे॒वेषु नो दधत् ॥ ६४ ॥
यत्र॒धाराः ॥ यत्र॒धारा॒ऽअन॑पेता॒मधो॑र्घृ॒तस्य॑चयाः ॥ तद॒ग्निर्वै॑श्व
कर्म्म॒णः स्व॒र्दे॒वेषु नो दधत् ॥६५॥ अ॒ग्निर॑स्मि ॥ अ॒ग्निर॑स्मि॒जन्म॑

नाजा॒तवे॑दा॒ घृ॒तम्मे॒ चक्षु॑र॒मृ॒तम्म॑ऽआस॒न् ॥ अ॒र्कस्त्रि॒धातू॒रज॑सो वि॒
मा॑नो॒ऽज॑स्रो घ॒र्म्मो ह॒विर॑स्मि॒ नाम॑ ॥ ६६ ॥ ऋचो॒ नाम॑ ॥ ऋचो॒ ना
मा॑स्मि॒ यजू॑ꣳषि॒ नामा॑स्मि॒ सामा॑नि॒ नामा॑स्मि ॥ येऽअ॒ग्नय॑ः
पाञ्च॑जन्याऽअ॒स्यां पृ॑थि॒व्यामधि॑ ॥ तेषा॑मसि॒ त्वमु॑त्त॒मः प्र नो॑ जी॒
वात॑वे सुव ॥६७॥ [१०] वार्त्र॑हत्याय॒ शव॑से पृतना॒षाह्या॑य च ॥ इन्द्र॒
त्वाव॑र्त्तयामसि ॥ ६८ ॥ स॒हदा॑नुम्पुरुहूत । क्षि॒यन्त॑मह॒स्तमि॑न्द्र॒
सम्पि॑ण॒क्कुणा॑रुम् ॥ अ॒भि वृ॒त्रं वर्द्ध॑मान॒म्पिया॑रुम॒पाद॑मिन्द्र त॒वसा॑

जघन्थ ॥ ६९ ॥ त्विन॑÷ ॥ त्विन॑ऽइन्द्र॒मृधो॑जहि॒नी॒चाय॑च्छपृतन्य॒
तः॥ योऽअ॒स्माँ॑२ऽअ॑भि॒दा॒स॒त्यध॑रङ्गमया॒तम॑÷ ॥७०॥ मृगोन ।
भी॒मःकु॑च॒रोगि॑रि॒ष्ठाःप॑रा॒वत॒ऽआज॑गन्था॒पर॑स्याः ॥ सृकꣳसꣳशा
य॑प॒वि॒मि॑न्द्र॒ति॒ग्ग्मं॑त्विशत्रू॑न्ताढि॒विमृधो॑नुदस्व ॥ ७१ ॥ वै॒श्वा॒न॒रो
न॑÷ ॥ वै॒श्वा॒न॒रोन॑ऽऊ॒तय॒ऽआप्प्र॒या॑तु॒प॒रा॒वत॑÷ ॥ अ॒ग्निर्न॑÷सुष्टु॒ती
रूप॑ ॥७२॥ पृष्टोदि॒वि ॥ पृ॒ष्टोऽअ॒ग्निःपृ॑थि॒व्यांपृ॒ष्टोवि॒श्वा॒ऽओष॑
धी॒रावि॑वेश ॥ वै॒श्वा॒न॒रःसह॑सापृ॒ष्टोऽअ॒ग्निःसनो॒दिवा॒स॒रि॒षस्प्पा॑तु

नक्रम्॥७३॥अश्यामतम् ॥ अश्यामतङ्कामंमग्नेतवोतीऽअश्या
मंरयिꣳरंयिवꣳसुवीरम् ॥ अश्यामवाजंमभिवाजयंन्तोश्यामंद्युु
म्नमंजराजरंन्ते ॥ ७४ ॥ व्वयन्तें । ऽअध्वरंरिमाहिकामंमुत्तानह
स्तानमंसोपसद्यं ॥ यजिष्ठनमनंसायाक्षिदेवानस्रेधतामन्मंनाव्वि
प्रोंऽअग्ने ॥ ७५ ॥ धामच्छदग्निः ॥ धामच्छदग्निरिन्द्रोब्रह्मादे
वोबृहस्पतिंः ॥ सचेतसोव्विश्वेदेवायज्ञम्प्रावंन्तुनꣳशुभे ॥ ७६ ॥
त्वंय्यंविष्ठ । दाशुषोनॄꣳःपाहिशृणुधीगिरंः ॥ रक्षांतोकमुतत्क्म

नां ॥७७॥ [१०] इतिश्रीवाजसनेयसंहितायांअष्टादशोऽध्यायः
॥ १८ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ स्वाद्वींत्वैकादश
देवायज्ञंविᳫंशतिःसुरावंतᳫंसप्तदशोदीरतांत्रयोदशाच्च्याजानुर्द
शसोमोराजाष्टौसीसेनतंत्रᳫंषोडशसप्तपंचनवतिः ॥ हरिःॐस्वा
द्वीन्त्वां । स्वादुनांतीव्रान्तीव्रेणामृतांममृतेन ॥ मधुंमतीम्मधुंम
तासृजामिसᳫंसोमेन ॥ सोमोस्यश्विभ्यांम्पच्यस्वसरंस्वत्यैपच्य
स्वेन्द्रांयसुत्राम्णेपच्यस्व ॥ १ ॥ परीतः ॥ परीतोषिंञ्चतासुतᳫंसो

मोयऽउत्तमꣳहविः ॥ दुधन्वायोनर्य्योऽअप्प्स्वन्तरासुषावसोम
मद्रिभिः ॥ २ ॥ वायोःपूतः । पवित्रेणप्प्रत्यङ्कसोमोऽअतिद्रुतः॥
इन्द्रस्ययुज्ज्यःसखा॥वायोःपूतःपवित्रेणप्प्राङ्कसोमोऽअतिद्रुतः॥
इन्द्रस्ययुज्ज्यःसखा ॥ ३ ॥ पुनातिते । परिस्रुतꣳसोमꣳसूर्य्यस्यदु
हिता ॥ वारेणशश्वतातना ॥ ४ ॥ ब्रह्मक्षत्रम् ॥ ब्रह्मक्षत्रम्पवते
तेजऽइन्द्रियꣳसुरयासोमः सुतऽआसुतोमदाय ॥ शुक्रेणदेवदेव
ताःपिपृग्ग्धिरसेनान्नंय्यजमानायधेहि ॥५॥ कुविदङ्ग । यवमन्तो

सर्वञ्चिद्यथादान्त्यंनुपूर्वंव्वियूयं ॥ इहेहैषाङ्कुणुहि भोजनानियेब
हिषोनमंऽउञ्चिंच्यजंन्ति ॥ उपयामगृंहीतोस्यश्चिभ्यांन्त्वास
रंस्वत्यैत्वेन्द्रायत्त्वासुत्राम्मणंऽएषतेयोनिस्तेजंसेत्त्वाव्वीर्य्यायत्त्वा
बलांयत्त्वा॥ ६ ॥ नानाहि । वान्देवहितह्वसदंस्कृतम्मासङ्सृंक्षाथा
म्परमेव्योमन् ॥ सुरात्वमसिंशुष्मिणीसोमंऽएषमामाहिङ्सीः
स्वांय्योनिमाविशन्ती ॥ ७ ॥ उपयामगृंहीतोसि ॥ उपयामगृंही
तोस्याश्विनन्तेजंः सारस्वतंव्वीर्य्यमैन्द्रम्बलम् ॥ एषतेयोनिम्मों

संहि· दांयत्त्वानन्दायंत्त्वामहंसेत्त्वा ॥ ८ ॥ तेजोसि ॥ तेजोसितेजोमयि पू· अ·
॥१७६॥ धेहिवीर्य्यमसिवीर्य्यम्मयिधेहिबलमसिबलम्मयिधेह्योजोस्यो ॥१९॥
जोमयिधेहिमन्युरसिमन्युम्मयिधेहिसहोसिसहोमयिधेहि ॥९॥
याव्याग्घ्रम् ॥ याव्याग्घ्रंविषूचिकोभौवृकञ्चरक्षति ॥ श्येनम्पतत्रि
णꣳसिꣳहꣳसेमम्पात्वꣳहसः ॥ १० ॥ यदापिपेष । मातरम्पुत्रः
प्प्रमुदितोधयन् ॥ एतत्तदग्ग्नेऽअनृणोभवाम्म्यहतौपितरौमया ॥ ॥१७६॥
सम्पृचस्त्थसम्माभद्द्रेणपृङ्क्तविपृचस्त्थविमापाप्मनापृङ्क्त ॥ ११ ॥

[११] देवायज्ञम् ॥ देवायज्ञमंतन्वतभेषजम्भिषजाश्विना ॥ व्वा
चासरस्वतीभिषगिन्द्रायेन्द्रियाणिदधतः ॥१२॥ दीक्षायैरूपम् ॥
दीक्षायैरूपꣳशष्पाणिप्प्रायणीयस्यतोक्मानि॥ क्रयस्यरूपꣳसो
मस्यलाजाःसौमाꣳशवोमधु॥१३॥ आतिथ्यरूपम्मासरम् ॥ आ
तिथ्यरूपम्मासरम्महावीरस्यनग्नहुः ॥ रूपमुपसदामेतत्तिस्रो
रात्रीःसुरासुता ॥ १४॥ सोमस्यरूपम् ॥ सोमस्यरूपङ्क्रीतस्यपरि
स्रुत्त्परिषिच्यते ॥ अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳसरस्व

संहि· त्या ॥ १५॥ आसन्दीरूपम् ॥ आसन्दीरूपꣳराजासन्द्यैवेद्यैकुम्भी पू· अ·
॥१७७॥ सुराधानी ॥ अन्तरऽउत्तरवेद्यारूपङ्कारोत्तरोभिषक् ॥ १६ ॥ वेद्या ॥१९॥
वेदिः ॥ वेद्यावेदिꣳसमाप्प्यतेबर्हिषाबर्हिरिन्द्रियम् ॥ यूपेनयूपऽ
आप्प्यतेप्प्रणीतोऽअग्निरग्निना ॥ १७॥ हविर्द्धानंय्यत् ॥ हविर्द्धा
नंय्यदश्श्विनाग्नीध्रंय्यत्सरस्वती ॥ इन्द्रायेन्द्रꣳसदस्कृतम्पत्नीशा
लङ्गार्हपत्यः ॥ १८ ॥ प्रैषेभिः प्प्रैषान् ॥ प्रैषेभिः प्प्रैषानाप्प्नोत्या ॥१७७॥
प्प्रीभिराप्प्रीर्य्यज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः

॥ १९ ॥ पशुभिं÷पशून् ॥ पशुभिं÷पशूनांप्नोतिपुरोडाशैर्हवीꣳ
ष्यांं ॥ छन्दोंभिꣳसामिधेनीर्य्याज्ज्याभिर्व्वषट्कारान् ॥२०॥ धा
नाᳲकंरम्भᳲसक्तंव्वꣳपरीवापᳲपयोदधिं॥ सोमंस्यरूपꣳहविषंऽआ
मिक्षाव्वाजिनम्मधुं ॥२१॥ धानानांꣳरूपम् ॥ धानानांꣳरूपङ्कु
वंलम्परीवापस्यंगोधूमांꣳ ॥ सक्तूनांꣳरूपम्बदंरमुपवाकांꣳकरम्भ
स्यं॥२२॥पयंसोरूपम् ॥ पयंसोरूपंय्यद्यवांदुग्ध्नोरूपङ्कर्कन्धूंनि ॥
सोमंस्यरूपंव्वाजिनꣳसौम्म्यस्यंरूपमामिक्षां ॥२३॥ आᳲश्रांवय ॥

संहि· आश्श्रावयेतिस्तोत्रियांꣳप्प्रत्याश्श्रावोऽअनुरूपꣳ॥ यजेतिधाय्या पू·अ·
॥१७८॥ रूपम्प्रगाथायैयजामहाः ॥ २४ ॥ अर्द्धऽऋचैरुक्थानाम् ॥ अर्द्धऽ ॥१९॥
ऋचैरुक्थानांꣳरूपम्पदैराप्नोतिनिविदः ॥ प्प्रणवैःशस्त्राणांꣳरू
पम्पयंसासोमंऽआप्प्यते॥२५॥ अश्विब्भ्याम्प्रातꣳसवनम् ॥ अश्वि
ब्भ्याम्प्रातꣳसवनमिन्द्रैणैन्द्रम्माद्ध्यन्दिनम् ॥ वैश्वदेवꣳसरस्वत्या
तृतीयमाप्तꣳसवनम्॥२६॥ वायव्यैर्व्वायव्यानि ॥ वायव्यैर्व्वायव्या ॥१७८॥
न्याप्नोतिसतैनद्रोणकलशम्॥ कुम्भीब्भ्याम्मम्भृणौसुतेस्थालीभिः

स्थालीराप्नोति ॥२७॥ यजुर्भिराप्यन्ते ॥ यजुर्भिराप्यन्तेग्रहा
ग्रहैस्तोमांश्चविष्टुतीः ॥ छन्दोभिरुक्थाशस्त्राणिसाम्नावभृथऽ
आप्यते ॥ २८॥ इडाभिर्भक्षान् ॥ इडाभिर्भक्षानाप्नोतिसूक्त
वाकेनाशिषः ॥ शंयुनापत्नीसंयाजान्त्समिष्टयजुषासंस्थाम्
॥ २९ ॥ व्रतेनदीक्षाम् ॥ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षि
णाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ॥३०॥ एता
वद्रूपम् ॥ एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतम् ॥ तदेतत्सर्वमा

संहि· प्नोतियज्ञेसौत्रामणीसुते ॥३१॥ [२०] सुरावन्तम्बर्हिषदम् ॥ सुरा पू· अ·
॥१७९॥ वन्तम्बर्हिषदꣳसुवीरंयज्ञꣳहिन्वन्तिमहिषानमोभिः ॥ दधा ॥१९॥
नाःसोमन्दिविदेवतासुमदेमेन्द्रंयजमानाःस्वर्काः ॥३२॥ यस्ते ॥
यस्तेरसःसम्भृतऽओषधीषुसोमस्यशुष्मःसुरयासुतस्य ॥ तेन
जिन्वयजमानम्मदेनसरस्वतीमश्विनाविन्द्रमग्निम् ॥३३॥ यम
श्विना । नमुचेरासुरादधिसरस्वत्यसुनोदिन्द्रियाय ॥ इमन्तꣳशु ॥१७९॥
क्रम्मधुमन्तामिन्दुꣳसोमꣳराजानमिहभक्षयामि ॥ ३४॥ यदत्र ॥

यदत्रं रिप्तꣳ रसिनं÷ सुतस्ययदिन्द्रोऽअपिंबच्छचीभिः ॥ अहन्त
दंस्यमनंसाशिवेनसोमꣳराजानमिहभंक्षयामि ॥३५॥ पितृभ्यं÷
स्वधायिभ्यं÷ । स्वधानमं÷पितामहेभ्यं÷स्वधायिभ्यं÷स्वधा
नमःप्प्रपितामहेभ्यःस्वधायिभ्यं÷स्वधानमं÷ ॥अक्षन्पितरोमी
मदन्तपितरोतीतृपन्तपितरःपितरःशुन्धंध्वम् ॥ ३६ ॥ पुनन्तुंमा
पितरं÷सोम्म्यासं÷पुनन्तुंमापितामहाःपुनन्तुप्प्रपितामहाः ॥ प
वित्रेणशतायुंषा ॥ पुनन्तुंमापितामहाःपुनन्तुप्प्रपितामहाः ॥

संहि· ॥१८०॥ पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ॥ ३७ ॥ अग्नऽआयूꣳषि । पू·अ·
पवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ३८ ॥ पुन ॥१९॥
न्तुमा । देवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजा
तवेदःपुनीहिमा ॥ ३९ ॥ पवित्रेणपुनीहि । माशुक्रेणदेवदीद्यत् ॥
अग्नेक्रत्वाक्रतूँ१ऽरनु ॥४०॥ यत्तेपवित्रमर्च्चिष्यग्नेविततमन्तरा ॥
ब्रह्मतेनपुनातुमा ॥ ४१ ॥ पवमानःसः ॥ पवमानःसोऽअद्यनः ॥१८०॥
पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥४२॥ उभाभ्यान्देव ।

सवितः पवित्रेणसवेनच ॥ माम्पुनीहिव्विश्वतः ॥ ४३ ॥ वैश्वदेवी
पुनती । देव्यागाद्यस्यामिमाबह्व्यस्तन्वोव्वीतपृष्ठाः ॥ तयामदन्तः
सधमादेषुव्वयᳫं स्यामपतयोरयीणाम् ॥ ४४ ॥ येसमानाःसमनसः
पितरोयमराज्ये ॥ तेषांल्लोकःस्वधानमोयज्ञोदेवेषुकल्पताम् ४५
येसमानाः ॥ येसमानाःसमनसोजीवाजीवेषुमामकाः ॥ तेषाᳫं
श्रीर्म्मयिकल्पतामस्मिँल्लोकेशतᳫं समाः ॥ ४६ ॥ द्वेसृती । ऽअ
शृणवम्पितृणामहन्देवानामुतमर्त्यानाम् ॥ ताभ्यामिदंव्विश्वमे

जत्समैतिसदंन्तरापितरंम्मातरंञ्च ॥ ४७ ॥ इदꣳहविः ॥ इदꣳह
विःप्रजननम्मेऽअस्तुदशवीरꣳसर्वगणꣳस्वस्तये ॥ आत्मसनि
प्प्रजासनिपशुसनिलोकसन्न्यभयसांनि ॥ अग्निःप्प्रजाम्बहुलाम्मे
करोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त॥४८॥[१७]उदीरताम् ॥ उदी
रतामवरऽउत्परांसऽउन्मंद्ध्यमाःपितरंःसोम्म्यासंः ॥ असुंय्यऽ
ईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ ४९ ॥ अङ्गिरसोनꣳ ।
पितरोनवंग्ग्वाऽअथर्वाणोभृगंवꣳसोम्म्यासंः ॥ तेषांव्वयꣳसुंमतौ

यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ५० ॥ येनः ॥ येनः पूर्वे पितरः सोम्यासो नू हि रे सौमपीथं वसिष्ठाः ॥ तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ५१ ॥ त्वं सोम ॥ त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ॥ तव प्रणीती पितरो न इन्द्रो देवेषु रत्नमभजन्त धीराः ॥ ५२ ॥ त्वया हि ॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ॥ वन्वन्नवातः परिधीं १ ऽरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥ ५३ ॥ त्वं सो

संहि· ॥१८२॥ म । पितृभिः॑ संविदानोनु द्यावापृथिवीऽआततन्थ ॥ तस्मैतऽइ पू· अ· ॥१९॥
न्द्रोहविषांविधेमवयंस्यामपतयोरयीणाम् ॥ ५४ ॥ बर्हिषदः
पितरः ॥ बर्हिषदःपितरऽऊत्यर्वागिमावोहव्याचकृमाजुषद्ध्वम् ॥
तऽआगतावसाशन्तमेनाथानःशंय्योररपोदधात ॥५५॥ आहम् ॥
आहम्पितृन्त्सुविदत्राँ२ऽअवित्सिनपातञ्चविक्रमणञ्चविष्णोः ॥
बर्हिषदोयेस्वधयासुतस्यभजन्तपित्वस्तऽइहागमिष्ठाः ॥ ५६ ॥ ॥१८२॥
उपहूताःपितरः । सोम्म्यासोबर्हिष्ष्येषुनिधिषुप्प्रियेषु ॥ तऽआ

गंमन्तुतऽइह॑श्रुंवन्त्वधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५७॥ आयन्तु ।
नःपितरंःसोम्म्यासोग्निष्ष्वात्ताःपथिभिर्द्देवयानैः ॥ अस्म्मिन्य
ज्ञेस्वधयामदन्तोधिंब्रुवन्तुतेवन्त्वस्म्मान् ॥ ५८ ॥ अग्निष्ष्वात्ताः
पितरः ॥ अग्निष्ष्वात्ताःपितरऽएहगंच्छतसदंःसदःसदतसुप्प्रणी
तयः ॥ अत्ताहवींᳫंषिप्प्रयंतानिबर्हिंष्ष्यथांरयिᳫंसर्व्वंवीरन्दधा
तन ॥५९॥ येऽअंग्निष्ष्वात्ताः ॥ येअंग्निष्ष्वात्तायेऽअनंग्ग्निष्ष्वा
त्तामद्ध्येदिवःस्वधयांमादयन्ते ॥ तेब्भ्यंःस्वराडसुनीतिमेताम्यं

थावशन्तन्त्वङ्कल्प्पयाति ॥ ६० ॥ अग्निष्ष्वात्तान्नृंतुमतः॑ ॥ अग्नि
ष्ष्वात्तान्नृंतुमतोंहवामहेनाराशङ्क्सेसोमपीथंय्यऽआशुः॑ ॥ तेनो
विप्प्रासःसुहवांभवन्तुव्वयꣳस्यामपतयोरयीणाम् ॥ ६१ ॥ [१३]
आच्च्याजानु । दक्षिणतोनिषद्येमंय्यज्ञमभिगृंणीतविश्श्वे॥माहिꣳ
सिष्टपितरःकेनचिन्नोयद्वऽआगः॑पुरुषताकराम ॥ ६२ ॥ आसीना
सोऽअरुणीनाम् ॥ आसीनासोऽअरुणीनामुपस्थेरयिन्धत्तदाशुषे ॥१८३॥
मर्त्याय ॥ पुत्रेभ्भ्यः॑पितरस्तस्यव्वस्वःप्प्रयच्छततऽइहोर्जन्दधा

त ॥ ६३ ॥ यमंग्ने । कव्यवाहनुत्वंचिन्मन्यंसेरयिम् ॥ तन्नोगीर्भिः
श्रवाय्यंन्देवत्रापनयायुजंम् ॥ ६४ ॥ योऽअग्निः । कव्यवाहंनः
पितॄन्यक्षंदृतावृधः ॥ प्रेदुंहव्यानिवोचतिदेवेभ्यंश्चपितृभ्यऽ
आ ॥ ६५ ॥ त्वमंग्ने ॥ त्वमंग्नऽईडितःकव्यवाहनावाढ्व्यानिसु
रभीणिकृत्वी ॥ प्रादाःपितृभ्यःस्वधयातेऽअक्षन्नद्धित्वन्देवप्र
यंताहवींᳪषि ॥ ६६ ॥ येचं ॥ येचेहपितरोयेचनेहयाँश्चंविद्मयाँ
२ऽउंचनप्रविद्म ॥ त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञᳪसुकं

संहि· तञ्जुषस्व ॥ ६७॥ इदम्पितृभ्योनमोऽअस्त्वद्ययेपूर्वासोयऽउपरा पू·अ·
॥१८४॥ सऽईयुः ॥ येपार्थिवेरजस्यानिषत्तायेवानूनꣳसुवृजनासुविक्षु ॥ ॥१९॥
॥ ६८ ॥ अधायथा । नꣳपितरꣳपरासꣳप्रत्नासोऽअग्नऽऋतमाशु
षाणाः ॥ शुचीदयन्दीधितिमुक्थशासꣳक्षामाभिन्दन्तोऽअरुणी
रपव्रन् ॥ ६९ ॥ उशन्तस्त्वा ॥ उशन्तस्त्वानिधीमह्युशन्तꣳसमि
धीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ ७० ॥ अपाम्फे ॥१८४॥
नेन ॥ अपाम्फेनेननमुचेꣳशिरऽइन्द्रोदवर्त्तयꣳ ॥ विश्वायदजय

स्पृधः ॥७१॥ [१०] सोमो राजा ॥ सोमो राजामृतꣳ सुतऽऋजी
षेणाजहान्मृत्युम् ॥ ऋतेनं सत्यमिन्द्रियम्विपानꣳ शुक्रमन्धस
इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७२ ॥ अद्भ्यश्क्षीरम् ॥ अद्भ्यः
क्षीरंव्यपिबत्कुङ्ङाङ्गिरसोधिया ॥ ऋतेनं सत्यमिन्द्रियंविपानꣳ शु
क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधुं ॥७३॥ सोमंमद्भ्यः
सोमंमद्भ्योव्यपिबच्छन्दसा हꣳसः शुचिषत् ॥ ऋतेनं सत्यमिन्द्रि
यंविपानꣳ शुक्रमन्धसइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ ७४ ॥

११००शतम्० ॥अन्नात्परिस्रुतः ॥ अन्नात्परिस्रुतोरसम्ब्रह्मणा
व्यपिबत्क्षत्रम्पयःसोमम्प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपा
नꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७५॥ रेतोमू
त्रम् ॥ रेतोमूत्रंविजहातियोनिम्प्रविशदिन्द्रियम् ॥ गर्भोजरायु
णावृतऽउल्बञ्जहातिजन्मना ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशु
क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७६ ॥ दृष्ट्वारूपे ॥१८५॥
व्याकरोत्सत्यानृतेप्रजापतिः ॥ अश्रद्धामनृतेदधाच्छ्रद्धाꣳसत्ये

प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥ ७७ ॥ वेदेनरूपे । व्यपिबत्सुतासुतौ
प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्ये
न्द्रियमिदम्पयोमृतम्मधु ॥७८॥ दृष्ट्वापरिस्रुतः ॥ दृष्ट्वापरिस्रुतो
रसꣳशुक्रेणशुक्रंव्यपिबत्पयꣳसोमम्प्रजापतिः ॥ ऋतेनसत्यमि
न्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥
॥७९॥[८] सीसेनतन्त्रम् ॥ सीसेनतन्त्रम्मनसामनीषिणऽऊर्णा

सूत्रेणंकवयोवयन्ति ॥ अश्विनायज्ञꣳसवितासरस्वतीन्द्रस्यरूपं
वरुणोभिषज्यन् ॥ ८० ॥ तदस्य । रूपममृतꣳशचीभिस्तिस्रोद
धुर्देवताःसꣳरराणाः ॥ लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्य
माꣳसमभवन्नलाजाः ॥८१॥ तदश्विना । भिषजारुद्रवर्त्तनीसर
स्वतीवयतिपेशोऽअन्तरम् ॥ अस्थिमज्जानम्मासरैःकारोतरेणद
धतोगवान्त्वचि ॥८२॥ सरस्वतीमनसा । पेशलंवसुनासत्याभ्या
वयतिदर्शतंवपुः ॥ रसम्परिस्रुतानरोहितन्नग्नहुर्धीरस्तसरन्नवेम

॥८३॥ पयंसाशुक्रम् ॥ पयंसाशुक्रममृतंञ्जनित्रंहसुरंयामूत्रांज्जन
यन्तुरेतं÷ ॥ अपामतिन्दुम्मर्तिम्बाधमानाऽऊवध्यंव्वातंध्सब्बुन्त
दारात् ॥ ८४ ॥ इन्द्रं÷सुत्रामाहृदयेनसत्यम्पुरोडाशेनसविताज
जान ॥ यकृत्क्लोमानंव्वरुणोभिषज्ज्यन्म्मतंस्न्नेव्वायव्यैर्न्नमिनाति
पित्तम् ॥८५॥ आन्त्राणिस्त्थालीः ॥ आन्त्राणिस्त्थालीर्म्मधुपि
न्न्वमानागुदाःपात्राणिसुदुघानधेनुः ॥ श्येनस्यपत्रन्नप्लीहाशची
भिरासन्दीनाभिरुदरन्नमाता ॥ ८६ ॥ कुम्भोवनिष्ठुः ॥ कुम्भोव

निष्ठुर्ज्जँनिताशचीभिर्य्यस्मिन्नग्ग्नेयोन्याङ्गर्ब्भोऽअन्तः ॥ प्लाशि
र्व्यक्तꣳशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृभ्यः ॥८७॥ मुखꣳ
सत् ॥ मुखꣳसदस्यशिरऽइत्सतेनजिह्वापवित्रमश्विनासन्त्सरस्व
ती ॥ चप्पन्नपायुर्भिषगस्यवालोवस्तिर्न्नशेपोहरसातरस्वी ॥८८॥
अश्विभ्याञ्चक्षुः ॥ अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनते
जोहविषाशृतेन ॥ पक्ष्माणिगोधूमैःकुवलैरुतानिपेशोनशुक्क्लमसि
तंवसाते ॥८९॥ अविर्न्न । मेषोनसिवीर्य्यायप्प्राणस्यपन्थाऽअमृ

तोग्ग्रहाभ्याम् ॥ सरस्वत्युपवाकैर्व्यानन्नस्यानि बर्हिर्बदरैर्जजान
॥१०॥ इन्द्रस्यरूपम् ॥ इन्द्रस्यरूपमृषभोबलायकर्णाभ्याᳬश्रो
त्रममृतङ्ग्रहाभ्याम् ॥ यवानबर्हिर्भ्रुविकेसराणिकर्कन्धूयज्ञेमधु
सारघम्मुखात्॥११॥आत्मन्नुपस्थे ॥ आत्मन्नुपस्थेनवृकस्य
लोममुखेश्मश्रूणिनव्याघ्रलोम॥केशानशीर्षन्यशसेश्रियैशि
खासिᳬहस्यलोमत्विषिरिन्द्रियाणि ॥ १२ ॥ अङ्गान्यात्मन् ॥
अङ्गान्यात्मन्भिषजातदश्विनात्मानमङ्गैᳬसमधात्सरस्वती ॥

संहि· इन्द्रस्यरूपꣳशतमानमायुश्चन्द्रेणज्ज्योतिरमृतन्दधानाः ॥ ९३॥ पू· अ·
॥१८८॥ सरस्वतीयोन्न्याम् ॥ सरस्वतीयोन्न्याङ्गर्भमन्तरश्विभ्याम्पत्नीसु ॥१९॥
कृतम्बिभर्त्ति॥अपाꣳरसेनवरुणोनसाम्नेन्द्रꣳश्रियैजनयन्नप्सु
राजा ॥९४॥ तेजः पशूनाम् ॥ तेजः पशूनाꣳहविरिन्द्रियावत्प
रिस्रुतापयसासारघम्मधु ॥ अश्विभ्यान्दुग्धम्भिषजासरस्वत्या
सुतासुताभ्याममृतꣳसोमऽइन्दुः ॥ ९५ ॥ [१६] इतिश्रीवाजस ॥१८८॥
नेयसंहितायांएकोनविंशतितमोऽध्यायः ॥ १९ ॥ श्रीवेदपुरुषाय

नमः ॥ अनुवाकसूत्रम् ॥ क्षत्रस्ययोनिस्त्रयोदशयद्देवादशाभ्याद
धाम्यष्टौयोभूतानांचतस्रःसमिद्धइंद्रएकादशायात्वष्टौसमिद्धोअ
ग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवनवतिः ॥
हरिःॐक्षत्रस्ययोनिं÷ ॥ क्षत्रस्ययोनिंरसिक्षत्रस्यनाभिंरसि ॥
मात्त्वांहिᳬसीन्मामांहिᳬसीः ॥ १ ॥ निषसाद । धृतव्रंतोव्वरुणः
पस्त्यास्वा ॥ साम्म्राज्ज्यायसुक्रतुं÷ ॥ मृत्योःपांहिविद्योत्पांहि ॥
॥ २ ॥ देवस्यंत्वा । सवितुःप्प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ता

संहि· ब्भ्याम् ॥ अश्विनोर्ब्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिस पू· अ·
॥१८९॥ रस्वत्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबला ॥२०॥
यश्श्रियैयशसेभिषिञ्चामि ॥ ३ ॥ कोसि । कतमोसिकस्मैत्वा
कायत्वा ॥ सुश्लोकसुमङ्गलसत्यराजन् ॥ ४ ॥ शिरोमे ॥ शिरोमे
श्श्रीर्य्यशोमुखन्त्विषिःकेशाश्चश्मश्रूणि ॥ राजामेप्प्राणोऽ
अमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्त्रम् ॥ ५ ॥ जिह्वामे । भद्द्रंव्वाङ्महो ॥१८९॥
मनोमन्न्युःस्वराड्भामः ॥ मोदाꣳप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मे

सहं ÷ ॥६॥ बाहूमे ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मवीर्य्यम् ॥
आत्माक्षत्रमुरोमम ॥७॥ पृष्ठीर्म्मे । राष्ट्रमुदरमꣳसौग्ग्रीवाश्च
श्श्रोणी ॥ ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व्वतः ॥ ८ ॥ ना
भिर्म्मे । चित्तंविज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आनन्दनन्दावा
ण्डौमेभगꣳसौभाग्ग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मिविशि
राजाप्प्रतिष्ठितः ॥ ९ ॥ प्प्रतिक्षत्रे । प्प्रतितिष्ठामिराष्ट्रेप्प्रत्यश्वेषु
प्प्रतितिष्ठामिगोषु ॥ प्रत्यङ्गेषुप्प्रतितिष्ठाम्म्यात्मन्प्प्रतिप्प्राणेषुप्प्र

संहि· तिंतिष्ठामिपुष्टेप्प्रतिद्यावांपृथिव्योःप्प्रतींतिष्ठामियुज्ञे ॥१०॥ त्रया पू·अ·
॥१९०॥ देवाः ॥ त्रयादेवाऽएकांदशत्रयस्त्रिहृशाःसुराधंसः ॥ बृहस्प्पतिं ॥२०॥
पुरोहितादेवस्यंसवितुःसवे ॥ देवादेवैरंवन्तुमा ॥ ११ ॥ प्रथमाद्वि
तीयैः ॥ प्रथमाद्वितीयैर्द्वितीयांस्तृतीयैस्तृतीयांःसत्येनंसत्यंय्य
ज्ञेनयुज्ञोयजुंर्भिर्य्यजूंᳪषिसामंभिः सामांन्यृग्भिर्ऋचः पुरोनु
वाक्याभिःपुरोनुवाक्यायाज्याभिर्य्याज्यावषट्कारैर्वषट्काराऽआ ॥१९०॥
हुंतिभिराहुंतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा ॥ १२ ॥ लोमांनि

प्प्रयंतिः ॥ लोमानिप्प्रयंतिर्म्ममत्वङ्मऽआनंतिरागंतिः ॥ माᳫंस

म्मऽउपंनतिर्व्वस्वस्त्थिमज्जामऽआनंतिः ॥ १३ ॥ [१३] यद्देवाः ॥

यद्देवादेवहेडंनन्देवासश्चकृमाव्वयम् ॥ अग्निर्म्मातस्म्मादेनंसोव्वि

श्वान्म्मुञ्चत्वᳫंहसः ॥१४॥ यदिदिवा ॥ यदिदिवायदिनक्तमेनाᳫं

सिचकृमाव्वयम् ॥ व्वायुर्म्मातस्म्मादेनंसोव्विश्वान्म्मुञ्चत्वᳫंहसः ॥

॥ १५ ॥ यदिजाग्ग्रंत् ॥ यदिजाग्ग्रद्यदिस्वप्प्नऽएनाᳫंसिचकृमा

व्वयम् ॥ सूर्य्यौमातस्म्मादेनंसोव्विश्वान्म्मुञ्चत्वᳫंहसः ॥१६॥ यद्ग्रा

मे ॥ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ॥ यच्छूद्रे यदर्य्ये य
देनश्चकृमा वयं यदेकस्याधि धर्म्मणि तस्यावयजनमसि ॥ १७ ॥
यदापः ॥ यदापो ऽअघ्न्या ऽइति वरुणेति शपामहे ततो वरुणनो मु
ञ्च ॥ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ॥ अव देवैर्देवकृतमे
नोयक्ष्यव मर्त्यैर्म्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि ॥ १८ ॥ समुद्रे
ते हृदयमप्स्वन्तः सन्त्वा विशन्त्वोषधीरुतापः ॥ सुमित्रिया न ऽ
आप ऽओषधयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च

व्वयन्द्विषम्मः ॥१९॥ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव ॥
पूतम्पवित्त्रेणेवाज्ज्यमापः शुन्धन्तुमैनसः ॥ २० ॥ उद्वयम् ॥ उद्व
यन्तमसस्प्पारिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्राऽसूर्य्यमगन्म
ज्ज्योतिरुत्तमम् ॥ २१ ॥ अपोऽअद्य ॥ अपोऽअद्यान्वचारिषह्वरसे
नसमसृक्ष्महि ॥ पयस्वानग्नऽआगमन्तम्मासꣳसृजवर्च्चसाप्प्रज
याचधनेनच ॥२२॥ एधोसि ॥ एधोस्येधिषीमहिसमिदसितेजो
सितेजोमयिधेहि ॥ समाववर्त्तिपृथिवीसमुषाः समुसूर्य्यः समुव्वि

संहि· श्वमिदञ्जगंत् ॥ वैश्वानरज्ज्योतिर्भूयासंविभून्कामान्व्यश्नवै पू·अ·
॥१९२॥ भूःस्वाहां ॥ २३ ॥ [१०]॥ अभ्यादधामि॥ समिधमग्नेव्व्रतपतेत्व ॥२०॥
यिं ॥ व्व्रतञ्चश्रद्धाञ्चो पैमीन्धेत्वांदीक्षितोऽअहम् ॥ २४ ॥ यत्रब्र
ह्मं । चक्षत्रञ्चसम्म्यञ्चौचरंतःसह ॥ तंल्लोकम्पुण्ण्यम्प्रज्ञेषंय्यत्रं
देवाःसहाग्निनां ॥ २५ ॥ यत्रेन्द्रः ॥ यत्रेन्द्रश्चव्वायुश्चसम्म्य
ञ्चौचरंतःसह ॥ तंल्लोकम्पुण्ण्यम्प्रज्ञेषंय्यत्रंसेदिर्न्नविद्यते ॥ २६ ॥ ॥१९२॥
अःशुनांते । ऽअःशुःपृञ्च्यताम्परुंषापरुः ॥ गन्धस्तेसोमंमवतुम

दायरसोऽअच्युतᳬ॥ २७ ॥ सिञ्चन्तिपरि ॥ षिञ्चत्युत्सिञ्चन्तिपु
नन्तिच ॥ सुरायैबभ्रवैमदेकिन्त्वोवदतिकिन्त्वः ॥ २८ ॥ धाना
वन्तङ्करम्भिणम् ॥ धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् ॥
इन्द्रप्प्रातर्ज्जुषस्वनᳬ॥ २९ ॥ बृहदिन्द्राय । गायतमरुतोवृत्त्रह
न्तमम् ॥ येनज्ज्योतिरजनयन्नृतावृधोदेवन्देवायजागृवि ॥ ३० ॥
अद्ध्वर्य्योऽअद्रिभिᳬ। सुतᳬसोमम्पवित्त्रऽआनय ॥ पुनाहीन्द्राय
पातवे ॥ ३१ ॥ [८] योभूतानाम् ॥ योभूतानामधिपतिर्य्यस्मिँ

संहि॰ ल्लोकाऽअधिश्श्रिताः ॥ यऽईशेमहुतोमहाँस्तेनंगृह्णामित्वामुहम्म पू॰ अ॰

॥१९३॥ यिंगृह्णामित्वामुहम् ॥ ३२ ॥ उपयामगृहीतोस्यश्विब्भ्यान्त्वासरं ॥२०॥

स्वत्यैत्वेन्द्रायत्वासुत्राम्म्णऽ एषतेयोनिरश्विब्भ्यान्त्वासरस्वत्यै

त्वेन्द्रायत्वासुत्राम्म्णे ॥ ३३ ॥ प्राणपामे । ऽअपानपाश्चक्षुष्पाः

श्रोत्रपाश्चमे ॥ व्वाचोमेव्विश्वभेषजोमनसोसिव्विलायकः ॥ ३४ ॥

अश्विनंकृतस्यते ॥ अश्विनंकृतस्यतेसरस्वातिकृतस्येन्द्रेणसुत्राम्म्णा ॥१९३॥

कृतस्यं ॥ उपहूतऽउपहूतस्यभक्षयामि ॥ ३५ ॥ [४] समिद्धऽइ

न्द्रः ॥ समिद्धऽइन्द्रऽउषसामनीकेपुरोरुचापूर्व्वकृद्वावृधानः ॥
त्रिभिर्द्देवैस्त्रिꣳशताव्वज्ज्रंबाहुर्ज्जघानंव्वृत्रंव्विदुरोव्ववार ॥ ३६ ॥ नरा
शꣳसᳵप्प्रति ॥नराशꣳसᳵप्प्रतिशूरोमिमानस्तनूनपात्प्प्रतियज्ञस्य
धाम ॥ गोभिर्व्वपावान्मधुनासमञ्जन्हिरण्ण्यैश्चन्द्रीयजतिप्प्रचे
ताः ॥ ३७ ॥ ईडितोदेवैः ॥ ईडितोदेवैर्हरिवाँ२ऽअभिष्टिराजुह्वा
नोहविषाशर्द्धमानः ॥ पुरन्दरोगोत्त्रभिद्वज्ज्रबाहुरायातुयज्ञमुप
नोजुषाणः ॥ ३८ ॥ जुषाणोबर्हिः ॥ जुषाणोबर्हिर्हरिवाँ२न्नऽइ

द्र्ं॒ं॑ ्प्राचीनं॑ सीदत्प्रदिशांपृथिव्याः॥ ऊरुप्पथा॒ं॑ प्पप्रथंमानᳬस्यो
नमांदित्यैर॒क्कं॑ वसुंभि॑ःसजोषाः॑ ॥ ३९ ॥ इन्द्रन्दुरं॑ । कवष्यो
धावंमानाव्वृषांणंव्यन्तुजनंय॑ःसुपत्नीः॑ ॥ द्वारोंदेवीरभितोऽव्विश्रे
यन्ताऽᳬसुवीरांव्वीरम्प्रथंमानामहोंभिः॑ ॥ ४० ॥ उषासानक्ता ।
बृहतीबृहन्तम्पयंस्वतीसुदुघेशूरमिन्द्रंम् ॥ तन्तुंन्ततम्पेशंसासंव
यंन्तीदेवानांन्देवंय्यंजतःसुरुक्मे ॥ ४१ ॥ दैव्यामिमांना । मनु
ष॑ःपुरुत्राहोतांराविन्द्रम्प्रथमासुवाचां ॥ मूर्द्धन्यज्ञस्यमधुंनादधां

नाप्प्राचीनञ्ज्योतिर्हृविषांवृधानः ॥४२॥ तिस्रोदेवीः ॥ तिस्रोदेवी
र्हृविषांवर्द्धमानाऽइन्द्रञ्जुषाणाजनंयोनपत्नींः ॥ अच्छिन्नन्तन्तुं
पयंसासरंस्वतीडांदेवीभारंतीविश्वतूर्त्तिः॥ ४३ ॥ त्वष्टादधंत् ॥ त्व
ष्टादधच्छुष्ममिन्द्रांयवृष्णेपाकोचिष्टुर्य्यशसेंपुरूणिं ॥ वृषायज
न्वृषंणम्भूरिंरेतामूर्द्धन्न्यज्ञस्यसमंनक्तुदेवान् ॥ ४४ ॥ वनस्पाति
रवंसृष्टः ॥ वनस्पातिरवंसृष्टोनपाशैस्त्मन्यांसमञ्जञ्छमितानदे
वः ॥ इन्द्रंस्यहव्यैर्ज्ठरम्पृणानःस्वदांतियज्ञम्मधुंनाघृतेनं ॥४५॥

स्तोकानामिन्दुम् ॥ स्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोवृषायमाणो
वृषभस्तुराषाट् ॥ घृतप्रुषामनसामोदमानाः स्वाहादेवाऽअमृता
मादयन्ताम् ॥ ४६ ॥ [११] आयातु ॥ आयात्विन्द्रोवसऽउपनऽ
इहस्तुतः सधमादस्तुशूरः ॥ वावृधानस्तविषीर्य्यस्यपूर्वीर्द्यौर्नक्ष
त्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनः ॥ आनऽइन्द्रोदूरादानऽ
आसादभिष्टिकृदवसेयासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः ॥१९५॥
सङ्गेसमत्सुतुर्वणिः पृतन्यून् ॥ ४८ ॥ आनः ॥ आनऽइन्द्रोहरिभि

र्य्यांत्वच्छांव्वांचीनोवंसेराधंसेच ॥ तिष्ठांतिव्वज्ज्रीमघवांविरप्प्शी
मंय्यज्ञमनुंनोव्वाजंसातौ ॥ ४९ ॥ त्रातारमिन्द्रंम् ॥ त्रातारमिन्द्र
मवितारमिन्द्रंᳬहवेहवेसुहवᳬशूरमिन्द्रंम् ॥ ह्वयांमिशक्रम्पुंरुहूत
मिन्द्रंᳬस्वस्तिनोमघवांधात्विन्द्रंः ॥ ५० ॥ इन्द्रंः सुत्रामां ॥
इन्द्रंः सुत्रामास्ववाँ२ऽअवोभिःᳬसुमृडीकोभंवतुव्विश्श्ववेदाः ॥ बाधं
तान्द्वेषोऽअभंयङ्कृणोतुसुवीर्य्यंस्यपतंयःᳬस्याम ॥ ५१ ॥ तस्यंव्वय
म् ॥ तस्यंव्वयᳬसुमतौयज्ज्ञियस्यापिंभद्रेसौमनसेस्यांम ॥ ससुत्रा

मास्ववाँ२ऽइन्द्रोऽअस्म्मेऽआराच्चिद्द्वेषः सनुतर्य्युयोतु ॥ ५२ ॥
आमन्द्रैः ॥ आमन्द्रैरिन्द्रहरिभिर्य्याहिमयूररोमभिः ॥ मात्वाके
चिन्नियेमन्विन्नपाशिनोतिधन्वेवताँ२ऽइहि ॥ ५३ ॥ एवेत् ॥ एवे
दिन्द्रंवृषणंवज्ज्रबाहुंवसिष्ठासोऽअभ्यर्च्चन्त्यर्कैः ॥ सनःस्तुतोवी
रवद्धातुगोमद्यूयम्पातस्वस्तिभिः सदानः ॥ ५४ ॥ [८] समिद्धोऽ
अग्निः ॥ समिद्धोऽअग्निरश्विनातप्तोघर्म्मोविराट्सुतः ॥ दुहेधेनुः ॥१९६॥
सरस्वतीसोमंशुक्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजा । सुतेश्वि

नोभासरस्वती ॥ मद्धारजांꣳसीन्द्रियमिन्द्रायपथिभिर्वहान् ॥

॥५६॥ इन्द्रायेन्दुम् ॥ इन्द्रायेन्दुꣳसरस्वतीनराशꣳसेननग्नहुम् ॥

अधातामश्विनामधुभेषजम्भिषजासुते ॥ ५७ ॥ आजुह्वानासर

स्वती । न्द्रायेन्द्रियाणिवीर्य्यम् ॥ इडाभिरश्विनाविषꣳसमूर्ज्जꣳ

सꣳरयिन्दधुः ॥ ५८ ॥ अश्विनानमुचेः । सुतꣳसोमꣳशुक्रम्परि

स्रुता ॥ सरस्वतीतमाभरद्बर्हिषेन्द्रायपातवे ॥ ५९ ॥ कवष्योन ।

व्यचस्वतीरश्विभ्यान्नदुरोदिशः ॥ इन्द्रोनरोदसीऽउभेदुहेकामा

न्तसरस्वती ॥६०॥ उषासानक्तम् ॥ उषासानक्तमश्विनादिवेन्द्रꣳ
सायमिन्द्रियैः ॥ सञ्जानानेसुपेशसासमञ्जातेसरस्वत्या ॥ ६१ ॥
पातन्नः ॥ पातन्नोऽअश्विनादिवापाहिनक्तꣳसरस्वती ॥ दैव्याहो
ताराभिषजापातमिन्द्रꣳसचासुते ॥ ६२ ॥ तिस्रस्त्रेधा । सरस्वत्य
श्विनाभारतीडा ॥ तीव्रम्परिस्रुतासोममिन्द्रायसुषुवुर्म्मदम् ॥ ६३ ॥
अश्विनाभेषजम् ॥ अश्विनाभेषजम्मधुभेषजन्नꣳसरस्वती ॥ इन्द्रे

त्वष्टायशꣳश्रियꣳरूपꣳरूपमधुꣳसुते ॥ ६४ ॥ ऋतुथेन्द्रः ॥ ऋतु

थेन्द्रोव्वनस्प्पतिं÷शशमानःपरिस्स्रुतां ॥ कीलालमश्विभ्यामम्मधुं
दुहेधेनुःसरस्वती ॥ ६५ ॥ गोभिर्न्न । सोमम्मश्विनामासरेणपरिस्स्रु
तां ॥ समधात्तसरस्वत्यास्वाहेन्द्रेसुतम्मधुं ॥ ६६ ॥ [१२] अश्वि
नांहविः ॥ अश्विनांहविरिन्द्रियन्नमुचेर्द्धियासरस्वती ॥ आशुक्र
मासुराद्वसुमघमिन्द्रायजभ्रिरे ॥ ६७ ॥ यमश्विनां ॥ यमश्विना
सरस्वतीहविषेन्द्रमवर्द्धयन् ॥ सबिभेदव्वलम्मघन्नमुचावासुरेसचां
॥ ६८ ॥ तमिन्द्रम् ॥ तमिन्द्रम्पशवःसचाश्विनोभासरस्वती ॥

संहि· दधांनाऽअभ्यनूषतहविषांयज्ञऽइन्द्रियैः ॥ ६९ ॥ यऽइन्द्रं ॥ पू·अ·
॥१९८॥ यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुंणोभगंः ॥ ससुत्रामांहविष्पं ॥२०॥
तिर्ययजंमानायसश्चत ॥ ७० ॥ सविताव्वरुंणं ॥ सविताव्वरुंणो
दधद्यजंमानायदाशुषे ॥ आदंत्तनमुंचेर्व्वसुंसुत्रामाबलंमिन्द्रियम्
॥ ७१ ॥ व्वरुंणःक्षत्रम् ॥ व्वरुंणःक्षत्रमिन्द्रियम्भगेनसविताश्रि
यंम् ॥ सुत्रामायशंसाबलन्दधांनायज्ञमांशत ॥ ७२ ॥ अश्वि ॥१९८
नागोभिंः ॥ अश्विनागोभिंरिन्द्रियमश्वैभिर्व्वीर्य्यम्बलंम् ॥ हवि

ऐन्द्रꣳसरस्वतीयजमानमवर्द्धयन् ॥ ७३ ॥ तानासत्या । सुपेशं
साहिरण्ण्यवर्त्तनीनरा ॥ सरस्वतीꣳहविष्म्मतीन्द्रकर्म्मसुनोवत ॥
॥ ७४ ॥ ताभिषजा । सुकर्म्मणासासुदुघासरस्वती ॥ सुवृत्रहाश
तक्रतुरिन्द्रायदधुरिन्द्रियम् ॥ ७५ ॥ युवꣳसुराममम् ॥ युवꣳसु
राममंश्विनानमुचावासुरेसचा ॥ विपिपानाःसरस्वतीन्द्रङ्कर्म्म
स्वावतम् ॥ ७६ ॥ पुत्रमिवपितरौ ॥ पुत्रमिवपितरावश्विनोभे
न्द्रावथुꣳकाव्यैर्दꣳसनाभिः ॥ यत्सुरामंव्यपिबꣳशचीभिःसरस्व

संहि· ॥१९९॥

तीत्वामघवन्नभिष्षणक् ॥ ७७ ॥ यस्मिन्नश्वासः ॥ यस्मिन्न
श्वांसऽऋषभासंऽउक्षणोव्वशावेषाऽअंवसृष्टासऽआहुताः ॥ कीला
लपेसोमंपृष्ठायव्वेधसेंहृदामतिञ्जनयचारुमग्नये ॥ ७८ ॥ अहा
व्यग्ने । हविरास्येतेस्रुचींवघृतञ्चम्म्वींवसोमः ॥ व्वाजसनिंरयि
मस्म्मेसुवीरम्प्रशस्त्तन्धेहियशसम्बृहन्तम् ॥ ७९ ॥ [१३] शतम्
१२०० ॥ अश्विनातेजसा । चक्षुःप्प्राणेनसरस्वतीव्वीर्यम् ॥
व्वाचेन्द्रोबलेनेंद्रायदधुरिन्द्रियम् ॥ ८० ॥ गोमदूषुणासत्या ॥

पू· अ ॥२०॥ ॥१९९

गोमद्दुषुणासत्याश्वाँवद्यातमश्विना ॥ वर्त्तीरुद्रानृपाय्यम् ॥८१॥
नयत् ॥ नयत्परोनान्तरऽआदुधर्षेवृषणवसू ॥ दुःशꣳसोमर्त्योरि
पुः ॥ ८२ ॥ तानं ॥ तानुऽआवोढमश्विनारयिम्पिशङ्गसन्दृ
शम् ॥ धिष्ण्याँव्वरिवोविदम् ॥ ८३ ॥ पावकानं ॥ पावकानꣳ
सरस्वतीव्वाजेभिर्व्वाजिनीवति ॥ यज्ञंव्वष्टुधियावसुः ॥ ८४ ॥ चोद
यित्रीसूनृतानाम् ॥ चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् ॥ यज्ञ
न्दधेसरस्वती ॥ ८५ ॥ महोऽअर्णं ॥ महोऽअर्णꣳसरस्वतीप्र

चैतयतिकेतुनां ॥ धियोव्विश्वाव्विराजति ॥ ८६ ॥ इन्द्रायांहि ।
चित्रभानोसुताऽइमेत्वायवं÷ ॥ अण्वींभिस्तनांपूतासं÷ ॥ ८७॥
इन्द्रांयाहि । धियेषितोव्विप्प्रंजूतःसुतावंतः ॥ उपब्रह्माणिव्वाघ
तं÷ ॥ ८८ ॥ इन्द्रायांहि ॥ इन्द्रायांहितूतुंजानऽउपब्रह्माणि
हरिवः ॥ सुतेदंधिष्ष्वनश्चनं÷ ॥ ८९ ॥ अश्विनांपिबताम् ॥ अ ॥२००॥
श्विनांपिबताम्मधुसरंस्वत्यासजोषसा ॥ इन्द्रं÷सुत्रामांवृत्रहाजु

षतांꣳसो॒म्म्यम्मधुं ॥ १० ॥ [२२] इतिश्रीवाजसेनयसंहिताया
विंशतितमोऽध्यायः ॥ २० ॥ ॥ श्रीवेदपुरुषायनमः ॥ ॥

॥ इति श्रीवाजसनेयसंहितापूर्वविंशतिः समाप्ता ॥

॥ अथ श्रीवाजसनेयसंहिताउत्तरविंशतिप्रारंभः ॥

॥ श्रीगणेशायनमः ॥ अनुवाक्सूत्रम् ॥ इमम्मेसमिद्धोअग्निरेका
दशकौवसंतेनऋतुनाषड्ढोतायक्षत्समिधाग्निंद्वादशाश्विनौछागस्य
सप्तदेवंबर्हिश्चतुर्द्दशषडेकषष्टिः ॥ हरिःॐइमम्मे । वरुणश्रुधीह
वम्द्याचम्मृडय ॥ त्वामवस्युराचके ॥ १ ॥ तत्त्वा । यामिब्रह्मं
णावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणे
हबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ २ ॥ त्वन्नः ॥ त्वन्नोऽअ
ग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ सजिष्ठोवन्हित

॥ १ ॥

म॒ᳲश्शो॑शुचा॒नो विश्वा॒ द्वेषा॑ᳪंसि॒ प्रमु॑मुग्ध्य॒स्म॒त् ॥ ३ ॥ सत्वम् ॥
सत्वन्नो॑ऽअग्नेव॒मो भ॑वो॒ती नेदि॑ष्ठोऽअ॒स्याऽउ॒षसो॒ व्यु॑ष्टौ ॥ अव॑यक्ष्व
नो॒ व्वरु॑णं॒ ररा॑णो व्वी॒हि मृ॑डी॒कᳪं सु॒हवो॑ नऽएधि ॥ ४ ॥ म॒हीमू॒ षु ।
मा॒तर॑ᳪं सु॒व्व्र॒ताना॑मृ॒तस्य॒ पत्नी॒मव॑से हुवेम ॥ तु॒वि॒क्ष॒त्राम॒जर॑न्ती
मु॒रू॒चीᳪं सु॒शर्म्मा॑ण॒मदि॑तिᳪं सु॒प्प्रणी॑तिम् ॥ ५ ॥ सु॒त्रामा॑णम्पृ
थि॒वीम् [illegible] सु॒त्रामा॑णम्पृथि॒वीन्द्याम॑ने॒हस॑ᳪं सु॒शर्म्मा॑ण॒मदि॑तिᳪं सु
प्प्रणी॑तिम् ॥ दैवी॒न्नाव॑ᳪं स्वरि॒त्राम॑नागसु॒मस्र॑वन्ती॒मारु॑हेमा स्व

स्तये ॥ ६ ॥ सुनावमारुहेयम् ॥ सुनावमारुहेयमस्रवन्तीमना
गसम् ॥ शतारित्राꣳस्वस्तये ॥ ७ ॥ आनः ॥ आनोमित्रावरुणा
घृतैर्गव्यूतिमुक्षतम् ॥ मध्वारजाꣳसिसुक्रतू ॥८॥ प्रबाहवा । सिसृ
तञ्जीवसेनऽआनोगव्यूतिमुक्षतङ्घृतेन ॥ आमाजनेश्रवयतंयुवा
नाश्रुतम्मेमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥ शन्नोभवन्तुवाजि
नोहवेषुदेवतातामितद्रवः स्वर्काः ॥ जम्भयन्तोहिंवृकꣳरक्षाꣳसि ॥ २ ॥
सनेम्यस्मद्युयवन्नमीवाः ॥ १० ॥ वाजेवाजेवत । वाजिनोनो

धनेषुविप्पाऽअमृताऽऋतज्ञाः ॥ अस्यमर्द्धः पिबतमादयंद्ध्वन्तृप्ता
यांतपथिभिर्देवयानैः ॥ ११ ॥ समिद्धोऽअग्निः ॥ समिधासुस
मिद्धोव्वरेण्यः ॥ गायत्रीच्छन्दऽइन्द्रियन्त्र्यविर्गौर्व्वयोदधुः ॥१२॥
तनूनपाच्छुचिव्व्रतः ॥ तनूनपाच्छुचिव्व्रतस्तनूपाश्चसरस्वती ॥
उष्णिहाच्छन्दऽइन्द्रियन्दित्यवाड्गौर्व्वयोदधुः ॥ १३ ॥ इडाभि
रग्निः ॥ इडाभिरग्निरीड्यः सोमोदेवोऽअमर्त्यः ॥ अनुष्टुप्छन्दऽ
इन्द्रियम्पञ्चाविर्गौर्व्वयोदधुः ॥१४॥ सुबर्हिरग्निः । पूषण्वान्स्ती

संहि· णं॑बर्हिरमर्त्यं॑ ॥ बृहतीच्छन्द॑ऽइन्द्रियन्त्रिवत्सोगौर्वयो॑दधुः ॥ उ·अ
॥ ३ ॥ ॥ १५ ॥ दुरोदेवीः ॥ दुरोदेवीर्दिशोमहीर्ब्रह्मादेवोबृहस्पतिः ॥ ॥२१॥
पङ्क्तिश्छन्द॑इहेन्द्रियन्तुर्य्यवाङ्गौर्वयो॑दधुः ॥ १६ ॥ उषेयह्वीसुपे
शसाविश्वेदेवाऽअमर्त्याः ॥ त्रिष्टुप्छन्द॑ऽइहेन्द्रियम्पष्ठवाङ्गौर्व
योदधुः ॥ १७ ॥ दैव्याहोतारा । भिषजेन्द्रेणसयुजायुजा ॥ जग
तीच्छन्द॑इन्द्रियमनड्वान्गौर्वयो॑दधुः ॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽ ॥ ३ ॥
इडासरस्वतीभारतीमरुतोविशः ॥ विराट्छन्द॑ऽइहेन्द्रियन्धेनुर्गौ

र्न्नवयोदधुः ॥ १९ ॥ त्वष्टांतुरीपं÷ ॥ त्वष्टांतुरीपोऽअद्भुतऽइन्द्रा
ग्नीपुष्टिवर्द्धना ॥ द्विपंदाच्छन्दंऽइन्द्रियमुक्षागौर्न्नवयोदधुः ॥२०॥
शमितानं÷ ॥ शमितानोव्वनस्प्पतिं÷सवितांप्प्रंसुवन्भगंम् ॥ ककु
प्प्च्छन्दंऽइहेन्द्रियंव्वशाव्वेहद्वयोदधुः ॥ २१ ॥ स्वाहांयज्ञं । व्वरुं
णःसुक्षत्रोभेषजङ्करत् ॥ अतिच्छन्दाऽइन्द्रियम्बृहदृषभोगौर्व्वयो
दधुः ॥२२॥ [११] व्वसन्तेनंऽऋतुनां । देवाव्वसंवस्त्रिवृतास्तुताः ॥
रथन्तरेणतेजंसाहुविरिन्द्रेव्वयोदधुः ॥ २३ ॥ ग्रीष्म्मेणंऽऋतुनां ।

देवारुद्राः पञ्चदुशेस्तुताः ॥ बृहुतायशंसाबलंᳪहुविरिन्द्रेव्वयोंदधुः
॥ २४ ॥ व्वर्षाभिर्ऋतुनांदित्यास्तोमेसप्तदुशेस्तुताः ॥ व्वैरूपेणव्वि
शौजंसाहुविरिन्द्रेव्वयोंदधुः ॥ २५ ॥ शारदेनंऽऋतुनां । देवाऽएं
कविᳪशऽऋभवंस्तुताः ॥ व्वैराजेनंश्रियाश्रियंᳪहुविरिन्द्रेव्वयोंद
धुः ॥ २६ ॥ हेमन्तेनंऽऋतुनां । देवास्त्रिणवेमुरुतंस्तुताः ॥ बलें
नशक्करींᳪसहोंहुविरिन्द्रेव्वयोंदधुः ॥ २७ ॥ शैशिरेणंऽऋतुनां । ॥ ४ ॥
देवास्त्रयस्त्रिᳪशेमृतांस्तुताः ॥ सत्येनंरेवतींᳪक्षत्रᳪहुविरिन्द्रेव्वयों

दधुः ॥ २८ ॥ [६] होतायक्षत् ॥ होतायक्षत्समिधाग्निमिडस्प्प
देश्विनेन्द्रꣳ सरस्वतीमजोधूम्म्रोनगोधूमैःकुवलैर्ब्भेषजम्मधुश
ष्पैर्न्नतेजऽइन्द्रियम्पयꣳसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्य
व्वीतांऽयज॥१७॥ देवीस्तिस्त्रः॥ देवीस्तिस्त्रास्तिस्त्रोदेवीःपति
मिन्द्रंमवर्द्धयन्॥ अस्पृंक्षद्भारंतीदिवंङ्‌रुद्रैर्य्यज्ञङ्‌सरंस्वतीडाव
सुंमतीगृहान्व्वंसुवनेंव्वसुधेयंस्यव्यन्तुयज॥१८॥ देवऽइन्द्रं॥
देवऽइन्द्रोनराशङ्‌संस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रंमवर्द्धयत्॥ श

तेनंशितिपृष्ठानामाहितꣳसुहस्रैणप्प्रवर्त्ततेमित्रावरुणेदꣳश्यहोत्रम
हँतोबृहस्प्पतिँस्तोत्रम॒श्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयंस्यव्वेतुयज ॥
॥ १९ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्प्पतिर्हिरण्ण्यपण्णोमधुशाखꣳसु
पिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्ग्रैणास्पृक्षदान्तरिक्षम्पृथि
वीमदृꣳहीद्वसुवनेव्वसुधेयंस्यव्वेतुयज ॥ २० ॥ देवम्बर्हिः ॥ देवम्ब
र्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्त्थमिन्द्रेणासंन्नमन्न्या
बर्हीꣳष्यभ्यभूद्वसुवनेव्वसुधेयंस्यव्वेतुयज ॥ २१ ॥ देवोऽअग्निः ॥ ॥५१॥

देवोऽअग्निश्स्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्वि
ष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ २२ ॥ अग्निमद्यहोता
रमवृणीतायंय्यजमानःपचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय
च्छागम् ॥ सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदिन्द्रायच्छागेन ॥
अघत्तम्मेदस्तःप्रतिपचताग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽ
ऋषे ॥ २३ ॥ [१२] होतायक्षत् ॥ होतायक्षत्समिधानम्महद्य
शःसुसमिद्धंवरेण्यमग्निमिन्द्रव्वयोधसम् ॥ गायत्रीञ्छन्दऽइन्द्रिय

न्त्र्यविङ्गांव्वयोदधद्धेत्वाज्ज्यंस्यहोतर्य्यजं ॥ २४ ॥ होतायक्षत्तनू
नपांतमुद्भिदं ॥ होतायक्षत्तनूनपांतमुद्भिदंय्यङ्गर्भमदितिर्द्दधे
शुचिमिन्द्रंव्वयोधसं ॥ उष्णिहञ्छन्दऽइन्द्रियन्दित्यवाहङ्गां
व्वयोदधद्धेत्वाज्ज्यंस्यहोतर्य्यजं॥२५॥होतायक्षदीडेन्न्यंमीडितम् ॥
होतायक्षदीडेन्न्यंमीडितंवृत्रहन्तंममिडाभिरीड्यꣳ सहꣳसोम
मिन्द्रंव्वयोधसं ॥ अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांव्वयोदध ॥६०॥
द्धेत्वाज्ज्यंस्यहोतर्य्यजं ॥ २६ ॥ होतायक्षत्सुबर्हिषम्पूषण्वन्तम् ॥

होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यꣳसीदन्तम्बर्हिषिप्प्रियेमृते
न्द्रंव्वयोधसम्॥बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्वेत्वाज्यं
स्यहोतर्य्यज ॥२७॥ होतायक्षद्व्यचस्वतीꣳसुप्प्रायणाः ॥होता
यक्षद्व्यचस्वतीꣳसुप्प्रायणाऽऋतावृधोद्वारोदेवीर्हिरण्ययीर्ब्ब्रह्मा
णमिन्द्रंव्वयोधसम् ॥ पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्यवाहङ्गांव्वयोद
धद्व्यन्त्वाज्यस्यहोतर्य्यज ॥ २८ ॥ होतायक्षत्सुपेशसासुशिल्पे
बृहतीऽउभेनक्तोषासानदर्शतेव्विश्वमिन्द्रंव्वयोधसम्॥ त्रिष्टुभञ्छ

संहि· न्दंऽ इहेन्द्रियम्पष्ठवाहङ्गांव्वयोदधद्वीतामाज्ज्यंस्यहोतर्य्यजं ॥ उ·अ·

॥६१॥ ॥ २९ ॥ होतांयक्षत्प्रचेतसादेवानांमुत्तमंय्यशोहोतांरादैव्यांकवी ॥२८॥

सयुजेन्द्रंव्वयोधसम् ॥ जगंतीञ्छन्दंऽइन्द्रियमंनड्वाहङ्गांव्वयोद

धद्वीतामाज्ज्यंस्यहोतर्य्यजं ॥३०॥ होतांयक्षत्पेशंस्वतीस्तिस्रः॥

होतांयक्षत्पेशंस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भारंतीर्बृहतीर्म्महीः

पतिमिन्द्रंव्वयोधसम् ॥ व्विराजञ्छन्दंऽइहेन्द्रियन्धेनुङ्गान्नवयोद ॥६१॥

धद्वयन्त्वाज्ज्यंस्यहोतर्य्यजं ॥३१॥ होतांयक्षत्सुरेतंसन्त्वष्टांरम् ॥

होतायक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणिबिभ्रतम्पृथक्पु
ष्टिमिन्द्रंव्वयोधसम् ॥ द्विपदुञ्छन्दऽइन्द्रियमुक्षाणङ्गान्नव्वयोदध
द्वेत्वाज्ज्यस्यहोतर्य्यज ॥३२॥ होतायक्षद्वनस्प्पतिꣳशमितारम् ॥
होतायक्षद्वनस्प्पतिꣳ शमितारꣳशतक्क्रतुꣳहिरण्ण्यपर्ण्णमुक्त्थि
नꣳरशनाम्बिभ्रतंव्वशिम्भगमिन्द्रंव्वयोधसम् ॥ ककुभञ्छन्दऽ
इहेन्द्रियंव्वशांव्वेहतङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ॥ ३३ ॥ हो
तायक्षत्स्वाहाकृतीरग्निम् ॥ होतायक्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृ

थग्गवरुंणम्भेषजङ्कविङ्क्षत्रमिन्द्रंव्वयोधसंम् ॥ अतिंच्छन्दसञ्छ

न्दंऽइन्द्रियम्बृहद्दृषभङ्गांव्वयोदधद्वचन्त्वाज्ज्यंस्यहोतर्य्यंज ।३४।

[११] देवम्बर्हिः ॥ देवम्बर्हिर्व्वयोधसंन्देवमिन्द्रंमवर्द्धयन् ॥ गा

यत्र्याच्छन्दंसेन्द्रियञ्चक्षुरिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वेतुयज

॥ ३५ ॥ देवीर्द्वारंः ॥ देवीर्द्वारोंव्वयोधसॾ्शुचिमिन्द्रंमवर्द्धयन् ॥

उष्णिहाच्छन्दंसेन्द्रियम्प्राणमिन्द्रेव्वयोदधंद्वसुवनेंवसुधेयंस्यव्य

न्तुयज ॥ ३६ ॥ देवीऽउषासानक्ता । देवमिन्द्रंव्वयोधसंन्देवीदे ॥६२॥

वमंवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधंद्वसुव
नेव्वसुधेयंस्यव्वीतांऽयज ॥ ३७ ॥ देवीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधि
तीदेवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्याच्छन्दसेन्द्रि
यꣳश्रोत्रमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्वीतांऽयज॥३८॥देवीऽ
ऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रम्वयोधसंन्देवीदे
वमंवर्द्धताम् ॥ पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधंद्वसुवने
व्वसुधेयंस्यव्वीतांऽयज ॥ ३९ ॥ देवादेव्या ॥ देवादेव्याहोतारादेव

मिन्द्रंव्वयोधसंन्देवोदेवमंवर्द्धताम् ॥ त्रिष्टुभाच्छन्दसेन्द्रियंत्त्विषि
मिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्वीतांयज ॥४०॥ देवीस्तिस्रः॥
देवीस्तिस्रस्तिस्रोदेवीर्व्वयोधसम्पतिमिन्द्रंमवर्द्धयन् ॥ जगत्याच्छ
न्दसेन्द्रियꣳशूषमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्यन्तुयज ॥४१॥
देवोनराशꣳसः ॥ देवोनराशꣳसोदेवमिन्द्रंव्वयोधसंन्देवोदेवमंव
र्द्धयत् ॥ व्विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधे
यंस्यव्वेतुयज ॥४२॥ देवोव्वनस्पतिः ॥ देवोवनस्पतिर्देवमिन्द्रंव्व

योधसन्देवोदेवमंवर्द्धयत् ॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रेवयो
दधंद्वसुवनेवसुधेयस्यवेतुयज ॥४३॥ देवम्बर्हिः ॥ देवम्बर्हिर्वारितीं
नान्देवमिन्द्रँव्वयोधसन्देवन्देवमंवर्द्धयत् ॥ ककुभाच्छन्दसेन्द्रि
यंय्यशऽइन्द्रेवयोदधंद्वसुवनेवसुधेयस्यवेतुयज ॥ ४४ ॥ देवोऽअ
ग्निः । स्विष्टकृद्देवमिन्द्रँव्वयोधसन्देवोदेवमंवर्द्धयत् ॥ अतिच्छन्द
साच्छन्दसेन्द्रियङ्क्षत्रमिन्द्रेवयोदधंद्वसुवनेवसुधेयस्यवेतुयज ॥
॥ ४५ ॥ अग्निमद्यहोतारमवृणीतायंय्यजमानःपचन्पक्तीःपच

संहि· न्पुरोडाशम्बध्नन्निन्द्रायव्वयोधसेच्छागम् ॥ सुपस्त्थाऽअद्यदेवोव्व उ·अ·
॥६४॥ नस्प्पतिरभवदिन्द्रायव्वयोधसेच्छागेन ॥ अघुतम्मेदुस्तः प्प्रतिप ॥२९॥
चताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्यऽऋषे ॥४६॥ [१२] ॥४॥
इतिश्रीवाजसनेयसंहितायांऽअष्टाविंशोऽध्यायः ॥ २८ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ समिद्धोअंजन्नेकादशसदकंदस्त्र
योदशसमिद्धोअद्यद्वादशकेतुंकृण्वंश्चतुर्विंशतिश्चत्वारःषष्टिः ॥ ॥६४॥
हरिःॐसमिद्धोऽअञ्जन् ॥ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्ने

मधुंमतिपन्न्वंमानः ॥ व्वाजीव्वहंन्वाजिनंञ्जातवेदोदेवानांव्वक्षिप्प्रि
यमासधस्त्थंम् ॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्न्त्सम्पथोदेवयानां
न्प्रजानन्न्वाज्ज्यप्प्येतुदेवान् ॥ अनुंत्वासप्प्तेप्प्रदिशंः सचन्ताᳬ
स्वधामस्म्मैयजंमानायधेहि ॥ २ ॥ ईड्यंश्च ॥ ईड्यश्चासिवन्द्यं
श्चवाजिन्नाशुश्चासिमेद्ध्यंश्चसप्प्ते ॥ अग्निष्ट्वादेवैर्व्वसुंभिः सजो
षांः प्प्रीतंव्वह्निंव्वहतुजातवेदाः ॥ ३ ॥ स्तीर्ण्णम्बर्हिः सुष्टरींमाजु
षाणोरुपृथुप्प्रथंमानम्पृथिव्व्याम् ॥ देवेभिर्य्युक्तमदितिः सजोषांः

स्योनङ्कृण्वानासुवितेदंधातु ॥ ४ ॥ एताऽउवं । सुभगाविश्वरू
पाविपक्षौभिंश्रयंमाणाऽउदातैं ॥ ऋष्वाःसतीःकवषंशुम्भमा
नाद्वारौदेवीःसुप्रायणाभंवंतु ॥५ ॥ अन्तरामित्रावरुणा ॥ अन्त
रामित्रावरुणाचरंन्तीमुखंयज्ञानांमभिसंविदाने ॥ उषासांवा
सुहिरण्येसुंशिल्पेऽऋतस्ययोनांविहसांदयामि ॥ ६ ॥ प्रथमावां
म् ॥ प्रथमावांसरथिनांसुवर्णादेवौपश्यंन्तौभुवंनानिविश्वां ॥
अपिंप्रयज्ञोदंनावाम्मिमांनाहोतांराज्योतिंःप्रदिशांदिशन्तां

॥ ७ ॥ आ॒दि॒त्यैर्न्नः॑ ॥ आ॒दि॒त्यैर्न्नो॒ भार॑ती॒ वष्टु॑ य॒ज्ञᳪं सर॑स्वती स॒ह
रु॒द्रैर्न्नः॑ऽआवीत् ॥ इडोप॑हूता॒ वसु॑भिᳪं स॒जोषा॑ य॒ज्ञन्नो॑ दे॒वीर॒मृते॑षु ध
त्त ॥८॥ त्वष्टा॑रं॒ वी॒रम् ॥ त्वष्टा॑रं॒ वी॒रन्दे॒वका॑मञ्जजान॒ त्वष्टु॒रर्वा॑ जायत
ऽआ॒शुरश्वः॑ ॥ त्वष्टे॒दं वि॑श्व॒म्भुव॑नञ्जजान ब॒होः क॒र्तार॑मि॒ह य॑क्षि
होतः ॥ ९ ॥ अश्वो॑ घृ॒तेन॒ त्मन्या॒ सम॑क्त॒ऽउप॑ दे॒वाँ२ऽ ऋ॑तु॒शः पाथ॑ऽ
एतु ॥ वन॒स्पति॑र्दे॒वलो॒कम्प्र॑जा॒नन्न॒ग्निना॑ ह॒व्या स्व॑दि॒तानि॑ वक्षत्
॥ १० ॥ प्र॒जाप॑ते॒स्तप॑सा । वावृधा॒नः स॒द्यो जा॒तो द॑धिषे य॒ज्ञम॑ग्ने ॥

संहि· स्वाहांकृतेनहुविषांपुरोगायाहिसाद्ध्याहुविरंदन्तुदेवाः ॥ ११ ॥ उ· अ·

॥६६॥ [११] यदक्रन्दः । प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषा ॥२९॥

त् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन्

॥ १२ ॥ यमेनदत्तम् ॥ यमेनदत्तन्त्रितऽएनमायुनगिन्द्रऽएणम्प्र

थमोऽअद्ध्यतिष्ठत् ॥ गन्धर्वोऽअस्यरशनामगृभ्णात्सूरादश्वंव्वसवो

निरतष्ट ॥ १३ ॥ असियमः ॥ असियमोऽअस्यादित्योऽअर्व्वन्नसि ॥६६॥

त्रितोगुह्येनव्रतेन ॥ असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणिदि

विबन्धंनानि ॥ १४ ॥ त्रीणिंते ॥ त्रीणितऽआहुर्द्दिविबन्धंनानि
त्रीण्यप्प्सुत्रीण्यंन्तःसंमुद्द्रे ॥ उतेवंमेव्वरुंणश्छन्त्स्यर्वन्न्यत्राँतऽआ
हुःपंरमञ्जनित्रंम्॥ १५॥इमातेंव्वाजिन्नवमार्ज्जंनानीमाशफानांछं
सनितुर्न्निधानां ॥ अत्राँतेभुद्द्रारंशनाऽअंपश्यमृतस्ययाऽअंभिर
क्षन्तिगोपाः ॥ १६ ॥ आत्मानंन्ते ॥ आत्मानंन्तेमनंसारादंजा
नामवोदिवापतयंन्तम्पतङ्गम् ॥ शिरोंऽअपश्यन्पथिभिंःसुगेभिं
ररेणुभिर्ज्जेहंमानम्पतत्रि ॥ १७॥ अत्राँते। रूपमुंत्तमंमपश्यञ्जि

संहि· गीषमाणमिषऽआपदेगोः ॥ यदातेमर्त्तोऽअनुभोगमानडादिद्ग्र उ·अ·
॥६७॥ सिष्ठऽओषधीरजीगः ॥ १८ ॥ अनुत्वा ॥ अनुत्वारथोऽअनुमर्य्योऽ ॥२९॥
अर्वन्ननुगावोनुभगः कनीनाम् ॥ अनुव्रातासस्तवसख्यमीयुरनु
देवाममिरेवीर्य्यन्ते ॥ १९ ॥ हिरण्यशृङ्गोयः ॥ हिरण्यशृङ्गो
योऽअस्यपादामनोजवाऽअवरऽइन्द्रआसीत् ॥ देवाऽइदस्यहवि
रद्यमायन्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत् ॥ २० ॥ ईर्म्मान्तासः ॥६७॥
सिलिकमध्यमासः ॥ ईर्म्मान्तासःसिलिकमध्यमासःसंशूरणा

सोदिव्यासोऽअत्याः ॥ हुꣳसाऽइवश्श्रेणिशोयंतन्तेयदाक्षिषुर्द्दि
व्यमज्म्मश्वाः ॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्ष्णवर्व्वं
न्तवचित्तंव्वातऽइवध्ध्रजीमान् ॥ तवशृङ्गाणिविष्ठितापुरुत्त्रारण्येषु
जर्भुराणाचरन्ति ॥ २२ ॥ उपप्र ॥ उपप्प्रागाच्छसनंव्वाज्यर्व्वादे
वद्रीचामनसादीध्यानः ॥ अजःपुरोनीयतेनाभिरस्यानुपश्चात्क
वयोयन्तिरेभाः ॥ २३ ॥ उपप्र ॥ उपप्प्रागात्परमंय्यत्सधस्थम
र्व्वाँ२ऽअच्छापितरम्मातरञ्च ॥ अद्याद्देवाञ्जुष्टतमोहिगम्म्याऽऽअ

संहि· थाशांस्तेदाशुषेवार्य्याणि ॥ २४ ॥ [१३] समिंद्धोऽअद्य । मनुंषो उ· अ·
॥६८॥ दुरोणेदेवोदेवान्यंजसिजातवेदः ॥ आचवहंमित्रमहश्चिकित्वा ॥२९॥
न्त्वन्दूतःकविरंसिप्रचेताः ॥ २५ ॥ तनूंनपात्पथः ॥ तनूंनपात्प
थऽऋतस्ययानान्मद्ध्वासमञ्जन्त्स्वंदयासुजिह्व ॥ मन्मांनिधीभि
रुतयज्ञमृन्धन्देवत्राचंकृणुह्यध्वरन्नंः ॥ २६ ॥ नराशꣳसंस्यमहि
मानंम् ॥ नराशꣳसंस्यमहिमानंमेषामुपंस्तोषामयजतस्यंयज्ञैः ॥ ॥६८॥
येसुक्रतंवःशुचंयोधियन्धाःस्वदंन्तिदेवाऽउभयांनिहव्या ॥ २७ ॥

आजुह्वानऽईड्यः ॥ आजुह्वानऽईड्योवन्द्यश्चायाह्यग्नेवसुभिः

सजोषाः ॥ त्वन्देवानामसियह्वहोतासऽएंतान्यक्षीषितोयजीया

न् ॥ २८ ॥ प्राचीनम्बर्हिः । प्प्रदिशांपृथिव्यावस्तोरस्यावृज्यतेऽ

अग्ग्रेऽअन्हाम् ॥ व्युंप्प्रथतेवितरंवरीयोदेवेब्भ्योऽअदितयेस्योन

म् ॥ २९ ॥ व्यचंस्वतीरुर्व्विया । व्विश्श्रंयन्ताम्पतिब्भ्योनजनयः

शुम्भमानाः ॥ देवीर्द्वारोबृहतीर्व्विश्श्वमिन्वादेवेब्भ्योभवतसुप्प्रा

यणाः ॥ ३० ॥ आसुष्ष्वयन्ती । यजतेऽउपाकेऽउषासानक्कासद

संहि. तान्नियोनौ ॥ दिव्येयोषंणेबृहतीसुंरुक्मेऽअधिश्श्रयंᳪशुक्रपिंश उ. अ.
॥६९॥ न्दधांने ॥ ३१ ॥ दैव्याहोतांरा । प्प्रथमासुवाचामिमानायज्ञम्म ॥२९॥
नुंषोयजंध्यै ॥ प्रचोदयंन्ताविदथेषुकारूप्प्राचीनञ्ज्योतिःप्प्रदि
शांदिशन्तां ॥ ३२ ॥ आनंः ॥ आनोयज्ञम्भारंतीतूयंमेत्विडांम
नुष्वदिहचेतयंन्ती ॥ तिस्रोदेवीर्बर्हिरेदᳪस्योनᳪसरंस्वतीस्वपं
सᳪसदन्तु ॥ ३३ ॥ यऽइमे । द्यावांपृथिवीजनिंत्रीरुपैरापिंᳪशद्भु ॥६९॥
वनानिविश्वां ॥ तमुद्यहोतारिषितोयजीयान्देवन्त्वष्टारमिहयंक्षि

विद्वान् ॥ ३४ ॥ उपावंसृजत्मन्न्यां । समुञ्जन्देवानाम्पाथंऽऋतु
थाहवीᳬंषि ॥ वनस्प्पातिं÷शमितादेवोऽअग्निःस्वदन्तुहव्यम्मधु
नाघृतेनं ॥ ३५ ॥ सद्योजातः ॥ सद्योजातोव्यंमिमीतयज्ञमग्नि
र्देवानांमभवत्पुरोगाः॥अस्यहोतुं÷प्प्रदिश्यृतस्यंवाचिस्वाहांकृतᳬ
हविरंदन्तुदेवाः ॥ ३६ ॥ [१२] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नंकेतवे
पेशोंमर्य्याऽअपेशसें ॥ समुषाद्भिरजायथाः ॥ ३७ ॥ जीमूतंस्येव
भवति॥जीमूतंस्येवभवतिप्प्रतीकंव्यद्वर्म्मीयातिसमदांमुपस्थें ॥

संहि· अनांविद्धयातन्वाजयत्वꣳसत्वावर्म्मणोमहिमापिंपर्त्तु ॥ ३८ ॥ उ·अ·
॥७०॥ धन्वंनागाः ॥ धन्वंनाजिञ्जयेम धन्वंनातीव्राःसमदो ॥२९॥
जयेम ॥ धनुःशत्रोरपकामङ्कृणोतिधन्वंनासर्वाःप्रदिशोजयेम
॥३९॥ वक्ष्यन्तीवेत् ॥ वक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियꣳसखा
यम्परिषस्वजाना ॥ योषेवशिङ्क्तेवितताधिधन्वञ्ज्याऽइयꣳसमने ॥७०॥
पारयन्ती ॥४०॥ तेऽआचरन्ती ॥ तेऽआचरन्तीसमनेवयोषामा
तेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्विध्यताꣳसंविदानेऽआर्त्नीऽ

इमेव्विष्प्पुरन्तीऽअमित्रान् ॥ ४१ ॥ बह्वीनाम्पिता । बहुरस्यपुत्र
श्चिश्च्चाकृणोतिसमनावगत्य ॥ इषुधिःसङ्काःपृतनाश्चसर्व्वाःपृ
ष्ठेनिनद्धोजयतिप्प्रसूतः ॥ ४२ ॥ रथेतिष्ठन् ॥ रथेतिष्ठन्नयतिव्वा
जिनःपुरोयत्रंयत्रकामयतेसुषारथिः ॥ अभीशूनाम्महिमानम्प
नायतमनःपश्च्चादनुयच्छन्तिरश्म्मयः ॥४३॥ तीव्रान्घोषान् ॥
तीव्रान्घोषान्कृण्ण्वतेव्वृषपाणयोश्वारथेभिःसहव्वाजयन्तः ॥अव
क्रामन्तःप्प्रपदैरमित्रान्क्षिणन्तिशत्रूँ १ रनपव्ययन्तः ॥ ४४ ॥

संहि· रथवाहंणꣳ हविः ॥ रथवाहंणꣳ हविरस्यनामयत्रायुधन्निहितम उ· अ·
॥७१॥ स्यवर्म्मं ॥ तत्रारथमुपशग्मꣳ सदेमविश्वाहावयꣳ सुमनस्यमानाः ॥२९॥
॥ ४५ ॥ स्वादुषꣳसदः पितरः ॥ स्वादुषꣳसदः पितरोवयोधाः कृ
च्छ्रेश्रितःशक्तीवन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृध्राःस
तोवीराऽउरवोव्रातसाहाः ॥ ४६ ॥ ब्राह्मणासःपितरः ॥ ब्राह्म
णासःपितरःसोम्यासःशिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषानः ॥७१॥
पातुदुरितादृतावृधोरक्षामाकिर्नोऽअघशꣳसऽईशत ॥ ४७ ॥ सुप

णर्णंव्वंस्ते । मृगोऽअंस्यादन्तोगोभिः संनद्धापततिप्प्रसूंता ॥ यत्रान
रःसञ्चविचद्दवंन्तितत्रास्म्मब्भ्यमिषंवःशर्म्मयᳪसन् ॥ ४८ ॥
ऋजीतेपरिं । वृङ्ग्धिनोऽश्म्माभवतुनस्तनूः ॥ सोमोऽअधिब्र्ववीतुनो
दितिः शर्म्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥ आजंङ्घन्तिसान्न्वेषा
ञ्जघनाँ२उपंजिग्घ्नते ॥ अश्श्वाजनिप्प्रचेतसोश्श्वान्त्समत्सुचोदय
॥ ५० ॥ अहिंरिवभोगैः पर्य्येतिबाहुञ्ज्यायाहेतिम्पंरिबाधंमानः॥
हुस्तग्घ्नोव्विश्वांव्वयुनानिव्विद्वान्पुमान्पुमांᳪं सम्पंरिपातुव्विश्वतः

संहि॰ ॥ ५१ ॥ वनस्पते वीडङ्गः ॥ वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा उ॰ अ॰
॥७२॥ प्रतरणः सुवीरः ॥ गोभिः सन्नद्धो असि वीडयस्वास्थाता ते ज ॥२९॥
यतु जेत्वानि ॥५२॥ दिवस्पृथिव्याः ॥ दिवस्पृथिव्याः पर्योज
उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ॥ अपामोज्मानं परि गो
भिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥५३॥ इन्द्रस्य वज्रः ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ॥ से ॥७२॥
मान्नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥५४॥ उपश्वा

सय । पृथिवीमुतद्यामपुंरुत्रातैंमनुताविष्ठितञ्जगत् ॥ सदुंन्दुभेस

जूरिन्द्रैंणदेवैर्दूराद्दवीयोऽअपसेधशत्रून् ॥५५॥ आक्रेन्दय ॥ आ

क्रेन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्रो

थदुन्दुभेदुच्छुनांऽइतऽइन्द्रस्यमुष्टिरसिवीडयस्व ॥५६॥ आमूः ॥

आमूरजप्रत्यावर्त्तयेमाःकैतुमद्दुन्दुभिर्व्वावदीति ॥ समश्वपर्णा

श्चरन्तिनोनरोस्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्नेयःकृ

ष्णग्रीवः । सारस्वतीमेषीबभ्रुःसोम्यःपौष्णःश्यामःशिति

पृष्टोबार्हस्प्पत्यश्शिल्प्पोवैश्श्वदेवऽऐन्द्रोरुणोमारुतश्कल्म्माषंऽऐ
न्द्राग्नश्संᳫहितोधोरामःसावित्रोवारुण ॥ कृष्ण्णऽएकशितिपात्ये
त्वंः ॥ ५८ ॥ अग्नयेनीकवते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वा
न्धोरामौसावित्रौपौष्ष्णौरंजतनाभीवैश्श्वदेवौपिशङ्गौतूपरौमारु
तश्कल्म्माषंऽआग्नेयश्कृष्ष्णोजः सारस्वतीमेषीवारुणश्पेत्वंः ॥
॥ ५९ ॥ अग्नयेगायत्राय । त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्राय
त्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदेवेभ्यो

जागतेभ्यः सप्तदशेभ्योवैरूपेभ्योद्वादशकपालोमित्रावरु
णाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजाभ्याम्पयस्याबृ
हस्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुः सवित्रऽऔष्णिहायत्र
यस्त्रिशायरैवतायद्वादशकपालः प्राजापत्यश्चरुरदित्यैविष्णु
पत्न्यैचरुरग्नयेवैश्वानरायद्वादशकपालोनुमत्याऽ अष्टाकपालः
॥ ६० ॥[२४]॥ ४ ॥ इतिश्रीवाजसनेयसंहितायाएकोनत्रिंशोऽ
ध्यायः ॥ २९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ देवसवि

संहि· तःषट्तपसेकौलालꣳषोडशद्वौद्वाविꣳशतिः॥हरिःॐदेवंसवितꣳ॥ उ· अ·
॥७४॥ देवंसवितꣳप्प्रसुंवयज्ञप्प्रसुंवयज्ञपंतिम्भगाय ॥ दिव्योगंन्धर्वःकें ॥३०॥
तपूःकेतंन्नꣳपुनातुव्वाचस्प्पातिर्व्वाचंन्नꣳस्वदतु ॥ १ ॥ तत्संवितुः ॥
तत्संवितुर्व्वरेंण्यम्भर्गोंदेवस्यंधीमहि ॥ धियोयोनंः प्प्रचोदयात् ॥
॥ २ ॥ विश्वांनिदेव । सवितर्दुरितानिपरांसुव ॥ यद्भद्रन्तन्नऽआ
सुंव ॥ ३ ॥ विभक्तारꣳहवामहे ॥ विभक्तारꣳहवामहेवसोंश्चि ॥७४॥
त्रस्यराधंसꣳ ॥ सवितारंन्नृचक्षंसम् ॥ ४ ॥ ब्रह्मंणेब्राह्मणम् ॥

ब्रह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योवैश्यन्तपसेशूद्रन्तमसेत
स्करन्नारकायवीरहणम्पाप्मनेक्लीबमाक्रयायाऽ अयोगूङ्कामायपुं
श्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गी
तायशैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभꣳहसाय
कारिमानन्दायस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्य्याय
तक्षाणम् ॥ ६ ॥ [६] तपसेकौलालम् ॥ तपसेकौलालम्मायायै
कर्म्मारꣳरूपायमणिकारꣳशुभेवपꣳशरव्यायाऽइषुकारꣳहेत्यै

धनुष्कारम्मन्यवे ज्याकारन्दिष्टाय रज्जुसर्जम्मृत्यवे मृगयुमन्तका
यश्श्वनिनम् ॥ ७ ॥ नदीब्भ्यः पौञ्जिष्ठम् ॥ नदीब्भ्यः पौञ्जिष्ठमृ
क्षीकाब्भ्यो नैषादम्पुरुषव्याघ्राय दुर्म्मदङ्गन्धर्व्वाप्सरोब्भ्यो व्रात्यं
म्प्रयुग्भ्यऽउन्मत्तं सर्प्पदेवजनेब्भ्योऽप्रतिपदमयेब्भ्यः कितव
मीर्य्यतायाऽ अकितवम्पिशाचेब्भ्यो बिदलकारीं यातुधानेब्भ्यः
कण्टकीकारीम् ॥८॥ सन्धये जारम् ॥ सन्धये जारङ्गेहायोपपतिमा
र्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमराध्याऽ एदिधिषुःपतिन्निष्कृ

त्यैपेशस्कारीꣳसञ्ज्ञानायस्मरकारीम्प्रकामोद्यायोपसदंव्वर्णं

यानुरुधम्बलायोपदाम्॥९॥ उत्सादेभ्यः कुब्जम्॥उत्सादेभ्यः कु

ब्जम्प्रमुदेव्वामनन्द्वाभ्यः स्त्रामꣳस्वप्नायान्धमधर्म्मायबधिरम्प

वित्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्प्रश्निनमुपशिक्षा

याऽअभिप्प्रश्निनम्मर्यादायैप्प्रश्नविवाकम्॥ १० ॥ अर्म्मेभ्यो

हस्तिपम्॥अर्म्मेभ्योहस्तिपञ्जवायाश्वपम्पुष्ट्यैगोपालंव्वीर्यायया

विपालन्तेजसेजपालमिरायैकीनाशङ्कीलालायसुराकारम्भद्राय

संहि· गृहपᳪंश्रेयंसेवित्तधमाध्यंक्ष्यायायानुक्षत्तारम् ॥ ११ ॥ भायैदार्वाहार उ·अ·
॥७६॥ म् ॥ भायैदार्वाहारम्प्रभायांऽअग्न्येधम्ब्रध्नस्यंविष्टपांयाभिषेक्तारंव ॥३०॥
र्षीष्ठायनाकांयपरिवेष्टारन्देवलोकायंपेशितारम्मनुष्यलोकायं
प्प्रकरितारᳪंसर्वेभ्योलोकेभ्यंऽ उपसेक्तारमवंऽऋत्यैवधायोपम
न्थितारम्मेधायंवासᳪंपल्पूलीम्प्रंकामायंरजयित्रीम् ॥ १२ ॥
ऋतयैस्तेनहृदयम् ॥ ऋतयैस्तेनहृदयंवैरंहत्यायपिशुनंविविक्त्यैक्ष ॥७६॥
त्तारमौपंद्रष्ट्यायानुक्षत्तारम्बलांयानुचरम्भूम्नेपंरिष्कन्दम्प्रि

यायंप्प्रियवादिनमरिष्टयाऽअश्वसादᳬंस्वर्ग्गायंलोकायंभागदुघं
वर्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्यवेयस्तापम् ॥ मन्यवेय
स्तापङ्क्रोधायनिसरंय्योगाययोक्तारᳫं शोकायाभिसर्त्तारङ्क्षेमाय
व्विमोक्तारमुत्कूलनिकूलेब्भ्यस्त्रिष्ठिनंव्वपुषेमानस्कृतᳫं शीलाया
जनीकारीन्निर्ऋत्यैकोशकारीं᳭यमायासूम् ॥ १४ ॥ यमायंयम
सूम् ॥ यमायंयमसूमथर्वब्भ्योवतोकाᳬंसंव्वत्सरायपर्य्यायिणी
म्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्क

द्वरींवत्सरायविजर्जराᳫंसंवत्सरायपलिक्क्नीमृभुभ्योऽजिनसन्धᳫं
साध्येभ्यश्चर्म्मम्नम् ॥ १५ ॥ सरोभ्योधैवरम् ॥ सरोभ्योधैवरमु
पस्थावराभ्योदाशंवैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्कलम्पारा
यमार्ग्गारमवारायकेवर्त्तन्तीर्थेभ्यऽ आन्दंविषमेभ्योमैनालᳫं
स्वनेभ्यः पर्ण्णकङ्गुहाभ्यः किरातᳫंसानुभ्योजम्भकम्पर्वते
भ्यःकिम्पूरुषम् ॥ १६ ॥ बीभत्सायैपौल्कसम् ॥ बीभत्सायैपौ
ल्कसंवर्ण्णायहिरण्यकारन्तुलायैवाणिजम्पश्चादोषायग्ग्लावि

नंविश्वेभ्योभूतेभ्यः सिध्मलम्भूत्यैजागरणमभूत्यैस्वपनमा
र्त्यैजनवादिनंव्यृद्ध्याऽअपगल्भꣳसꣳशरायप्रच्छिदम् ॥ १७ ॥
अक्षराजायंकितवम् ॥ अक्षराजायंकितवङ्कृतायादिनवदर्शन्त्रेता
यैकल्पिनन्द्वापरायाधिकल्पिनमास्कन्दायसभास्थाणुम्मृत्य
वेगोव्यच्छमन्तकायगोघातङ्क्षुधेयोगाव्विकृन्तन्तम्भिक्षमाणऽ
उपतिष्ठतिदुष्कृतायचरकाचार्यम्पाप्मनेसैलगम् ॥ १८ ॥ प्रति
श्रुत्कायाऽअर्त्तनम् ॥ प्रतिश्रुत्कायाऽअर्त्तनङ्घोषायभषमन्ताय

संहि· बहुवादिनमनन्तायमूकꣳ शब्दायाडम्बराघातम्महसेवीणावा उ· अ·
॥७८॥ दङ्क्रोशायतूणवध्ममवरस्परायशङ्खध्मंवनायवनपमन्यतोर ॥३०॥
ण्यायदावपम् ॥ १९ ॥ नर्म्मायपुँश्चलूम् ॥ नर्म्मायपुँश्चलूꣳहसा
यकारिंयादसेशाबल्याङ्ग्रामण्यङ्गणकमभिक्रोशंकन्तान्महसे
वीणावादम्पाणिघ्नन्तूणवध्मन्तान्नृत्तायानन्दायतलवम् ॥ २० ॥
अग्नयेपीवानम् ॥ अग्नयेपीवानम्पृथिव्यैपीठसर्प्पिणंवायवेचाण्डा ॥७८॥
लमन्तरिक्षायवꣳशनर्त्तिनन्दिवेखलतिꣳसूर्य्यायहर्य्यक्षन्नक्षत्रे

ब्भ्यः किर्म्मिरञ्चन्द्रमसे किलासमन्हे शुक्लम्पिङ्गाक्षꣳ रात्र्यै कृष्ण
म्पिङ्गाक्षम् ॥२१॥ अथैतान् ॥ अथैतानष्टौ विरूपानालभतेतिदी
र्घञ्चातिह्रस्वञ्चातिस्थूलञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चा
तिकुल्वञ्चातिलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥
मागधः पुंश्चलीकितवः क्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥
॥२२॥[१६]इतिश्रीवाजसनेयसंहितायात्रिंशत्तमोऽध्यायः ॥३०॥
श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ सहस्रशीर्षाषोडशाद्यःसं

संहि· भूतःषट्द्वौद्वाविꣳशतिः । हरिःॐसहस्रशीर्षापुरुषः । सहस्राक्षः उ·अ·
॥७१॥ सहस्रपात् ॥ सभूमिꣳसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरु ॥३१॥
षऽएव ॥ पुरुषएवेदꣳसर्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उतामृतत्वस्ये
शानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य । महिमातोज्यायाँ
श्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्द्ध्वः ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततो ॥७१॥
विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोविराट् ॥ ततोवि

राडंजायतद्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यंरिच्यतपश्चाद्भू
मिमथौपुरः ॥ ५ ॥ तस्मांद्यज्ञात् ॥ तस्मांद्यज्ञात्सर्व्वहुतः सम्भृंत
म्पृषदाज्ज्यम् ॥ पशूँस्ताँश्चंक्रेवायव्यानारण्याग्ग्राम्म्याश्चये ॥६॥
तस्म्मांद्यज्ञात् ॥ तस्म्मांद्यज्ञात्सर्व्वहुतऽऋचः सामांनिजज्ञिरे ॥
छन्दांꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मांदजायत ॥ ७ ॥ तस्म्माद्
श्वाः ॥ तस्म्माद्श्वाऽअजायन्तयेकेचौभयादंतः ॥ गावौहजज्ञिरे
तस्म्मात्तस्मांज्जाताऽअंजावयंः ॥ ८ ॥ तंय्यज्ञम् ॥ तंय्यज्ञम्ब

संहि· हिर्षिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषं उ· अ·
॥८०॥ यश्चये ॥ ९ ॥ यत्पुरुषम् ॥ यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ॥ ॥३१॥
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ॥ १० ॥ ब्राह्म
णोस्य ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः ॥ ऊरूतदस्य
यद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसः ॥ च
न्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्श्रोत्राद्वायुश्चप्रा ॥८०॥
णश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीत् ॥ नाभ्याऽ

आसीदन्तरिक्षꣳशीर्ष्णो द्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रा
त्तथालोकाँ२ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेण । हविषादेवायज्ञ
मतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥
सप्तास्यासन् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवा
यद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ यज्ञेनयज्ञम् ॥ यज्ञे
नयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्म
हिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यः

संहि. सम्भृतꣳ । पृथिव्यैरसाच्चविश्वकर्म्मणꣳसमवर्त्तताग्ग्रे ॥ तस्यत्वष्टा उ. अ.

॥८१॥ विदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥ वेदाहम् ॥ ॥३१॥

वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसꣳपरस्तात् ॥ तमेव

विदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥१८॥ प्रजापति

श्चरति ॥ प्रजापतिश्चरतिगर्भेअन्तरजायमानोबहुधाविजाय

ते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिवि ॥८१॥

श्वा ॥ १९ ॥ योदेवेभ्यः ॥ योदेवेभ्यऽआतपतियोदेवानाम्पु

रोहितः ॥ पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुच
म्ब्राह्मम् ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैव
म्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्च ॥ श्रीश्चते
लक्ष्मीश्चपत्न्यांवहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इ
ष्णन्निषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण ॥ २२ ॥ [६] ॥ २ ॥
इतिश्रीवाजसनेयसंहितायांएकत्रिंशोऽध्यायः ॥ ३१ ॥ श्रीवेदपु
रुषायनमः ॥ अनुवाकसत्रम् ॥ तदेवसप्तवेनस्तन्नवद्धौषोडश ॥

संहि· हरिःॐतदेव॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः॥ तदेव उ·अ·
॥८२॥ शुक्रन्तद्ब्रह्मताऽआपःसप्रजापतिः॥ १ ॥ सर्व्वेनिमेषाः॥ सर्व्वेनि ॥३२॥
मेषाजज्ञिरेविद्युतःपुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमद्ध्येपरिज
ग्ग्रभत्॥ २ ॥नतस्य॥ प्प्रतिमाऽअस्तियस्यनाममहद्यशः॥हिर
ण्यगर्ब्भऽइत्येषमामाहिंसीदित्येषायस्मान्नजातऽइत्येषः ॥
॥३॥ एषोह। देवःप्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्ब्भेऽअन्तः॥ ॥८२॥
सऽएवजातःसजनिष्यमाणःप्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः॥४॥

यस्म्मांज्जातम् ॥ यस्म्मांज्जातन्नपुराकिञ्चनैवयऽआंबभूवभुवंना
निविश्श्वां ॥ प्रजापंतिःप्प्रजयांसꣳरराणस्त्रीणिज्ज्योतींꣳषिसच
तेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्राप्पृथिवीचंदृढायेनस्व
स्तभितंय्येननाकंः ॥ योऽअन्तरिंक्षेरजंसोव्विमानःकस्म्मैदेवाय
हविषांव्विधेम ॥ ६ ॥ यङ्क्रन्दंसी ॥ यङ्क्रन्दंसीऽअवंसातस्तभानेऽ
अब्भ्यैक्षेतांम्मनंसारेजंमाने ॥ यत्राधिसूरऽउदिंतोव्विभातिकस्म्मै
देवायंहविषांव्विधेम ॥ आपोंहयद्बृहतीर्य्यश्चिदापंः ॥ ७ ॥ [७]

संहि· वेनस्तत् ॥ वेनस्तत्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम् ॥ उ· अ·
॥८३॥ तस्मिन्निदꣳसञ्चविचैतिसर्वꣳसऽओतःप्प्रोतश्चविभूःप्प्रजासु ॥ ॥३२॥
॥ ८ ॥ प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वोधामविभृतङ्गुहास
त् ॥ त्रीणिपदानिनिहितागुहास्ययस्तानिवेदसपितुःपितासत् ॥
॥ ९ ॥ सनः ॥ सनोबन्धुर्जनितासविधाताधामानिवेदभुवनानि
विश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृतीयेधामन्नध्यैरयन्त ॥ १० ॥ ॥८३॥
परीत्यभूतानि । परीत्यलोकान्परीत्यसर्वाःप्प्रदिशोदिशश्च ॥

॥ ११ ॥
उपस्त्थायंप्प्रथमजामृतस्यात्त्मनात्त्मानंमभिसंव्विवेश ॥ ११ ॥
परिद्यावांपृथिवी।सुद्यऽइत्त्वापरिंलोकान्परिंदिशःपरिस्वः॥ ऋत
स्यतन्तुंव्वितंतंव्विचृत्यतदंपश्यत्तदंभवत्तदासीत् ॥१२॥ सदंसस्प
तिम् ॥ सदंसस्पतिमद्भुतम्प्रियमिन्द्रंस्यकाम्म्यंम् ॥ सनिम्मेधाम
यासिषंस्वाहां ॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगणाःपित
रंश्चोपासंते ॥ तयामामद्यमेधयाग्नेमेधाविनङ्कुरुस्वाहां ॥ १४ ॥
मेधाम्मे ॥ मेधाम्मेवरुंणोददातुमेधामग्निःप्प्रजापंतिः ॥ मेधामि

॥८४॥ न्द्रश्चवायुश्चमेधान्धातादंदातुमेस्वाहा ॥ १५ ॥ इदम्मे ॥ इद ॥३३॥
म्मेब्रह्मचक्षत्रञ्चोभेश्श्रियंमश्नुताम् ॥ मयिदेवादधतुश्श्रियमुत्त
मान्तस्यैतेस्वाहा ॥१६॥ [९] ॥२॥ इतिश्रीवाजसनेयसंहितायांद्वा
त्रिंशोऽध्यायः ॥ ३२ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥
अस्याजरासः सप्तदशापश्चित्द्वादशविभ्राट्चतुर्दशप्रवावृजएका
दशप्रवायुंप्रवीरयापंचदशकावानस्त्रयोदशसप्तसप्तनवतिः ॥ हरिः ॥८४॥
ॐअस्याजरासहं ॥ अस्याजरासोदमामरित्राऽअर्चद्धूमासोऽअग्न

यं॑÷पाव॒का॑श्॥श्वि॒तीच॑यं॑÷श्वा॒त्रा॒सो॑भु॒रण्य॑वो॒व्व॒न॒र्ष॑दो॒व्वा॒य॑वो॒नसो
मा॑ः ॥ १ ॥ हर॑यो॒धू॒मके॑तव॒ः ॥ हर॑यो॒धू॒मके॑तवो॒व्वा॒तं॑जू॒ता॒ऽउप॒द्य
वि॑ ॥ य॒तं॑न्ते॒व्वृ॒थं॑गु॒ग्नयं॑÷ ॥ २ ॥ य॒जा॑न॒ः ॥ य॒जा॑नो॒मि॒त्राव॑रु॒णा
य॒जा॑दे॒वाँ॑२ऋ॒तम्बृ॒हत् ॥ अग्ग्ने॒य॒क्षि॒स्वन्द॒मं॑म् ॥ ३ ॥ सु॒क्ष्वा॒हि ।
दे॒व॒हू॒तं॑माँ॒२अ॒श्वाँ॑२अग्ग्ने॒र॒थी॑रि॒व ॥ निहो॒ता॑पू॒र्व्यं॒॑श्सं॑द॒ः ॥ ४ ॥ द्वेवि
रू॒पे । चर॑त॒ःस्व॒र्थे॑ऽअ॒न्या॒न्यां॒व॒त्सम॒ुप॑धा॒पये॑ते ॥ हरि॑र॒न्य॒स्या॒म्भ
व॑ति॒स्व॒धावा॑ञ्छु॒क्रोऽअ॒न्यस्यां॑न्द॒द्दृ॒शे॒सु॒व॒र्च्चाः॑ ॥ ५ ॥ शतम् १७००

संहि· अयमिह । प्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ उ·अ·
॥८५॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे ॥ ६ ॥ त्रीणि ॥३३॥
शता । त्रीसहस्राण्यग्निन्त्रिᳬशच्चदेवानवचासपर्य्यन् ॥ औक्षन्घृ
तैरस्तृणन्बर्हिरस्म्माऽआदिद्धोतारन्न्यसादयन्त ॥७॥ मूर्द्धानन्दि
वः ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्नि
म् ॥ कविᳬसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ॥८५॥
॥ ८ ॥ अग्निर्वृत्राणि । जङ्घनद्द्रविणस्युर्विपन्यया ॥ समिद्धᳬशुक्रऽ

आहुतं ॥ ९ ॥ व्विश्वेभिः सोम्म्यम् ॥ विश्वेभिः सोम्म्यम्मद्ध्वग्न ऽ
इन्द्रेणव्वायुना ॥ पिबामित्रस्यधामभिः ॥ १० ॥ आयत् ॥ आय
दिषेनृपतिन्तेजऽआनट्शुचिरेतोनिषिक्तन्द्यौरभीके ॥ अग्निः शर्द्ध
मनवद्यं युवानं स्वाध्यञ्जनयत्सूदयंच्च ॥ ११ ॥ अग्नेशर्द्ध । मह
तेसौभगायतवद्युम्नान्युत्तमानिसन्तु ॥ सञ्जास्पत्यं सुयममा
कृणुष्वशत्रूयतामभितिष्ठामहांसि ॥ १२ ॥ त्वांहि । मन्द्र
तममर्कशोकैर्ववृमहेमहिनः श्रोष्यग्ने ॥ इन्द्रन्नत्वाशवसादेवता

संहि· व्वायुम्पूंणन्तिराधंसानृतंमाः ॥ १३ ॥ त्वेऽअंग्ने । स्वाहुतप्प्रियासंः उ· अ·
॥८६॥ सन्तुसूरयंः ॥ यन्तारोयेमघवांनोजनांनामूर्व्वान्दयंन्तगोनांम् ॥ ॥३३॥
॥ १४ ॥ श्रुधिश्श्रुत्कर्ण्ण ॥ श्रुधिश्श्रुत्कर्ण्णव्वह्निंहिभिर्द्देवैरंग्नेसयाव
भिः ॥ आसींदन्तुबर्हिषिंमित्रोऽअंर्य्यमाप्प्रांतर्य्यावांणोऽअद्ध्वर
म् ॥१५॥ व्विश्श्वेषामदितिः ॥ व्विश्श्वेषामदितिर्य्यज्ञियांनांव्विश्श्वेषा
मतिंथिर्म्मानुंषाणाम् ॥ अग्निर्द्देवानामवंऽआवृणानःसंमृडीकोभं ॥८६॥
वतुजातवेदाः ॥ १६ ॥ महोऽअग्नेः । संमिधानस्यशर्म्मण्यनागा

मि॒त्रे॒व्व॑रु॑णे॒स्व॒स्तयें ॥ श्रेष्ठैं॒स्याम॒सवि॒तुः॒सवीं॑मनि॒तद्दे॒वाना॒मवोऽअ॒
द्या॒वृ॑णीमहे ॥ १७ ॥[१७] आपं॑श्चित् ॥ आपं॑श्चि॒त्पि॒प्प्युस्त॒र्य्यो॒
नगावो॒नक्षं॒न्नृतज्ञं॒रि॒तारं॒स्तऽइन्द्र ॥या॒हिव्वा॒युर्न्नन्नि॒युतो॑नो॒ऽअच्छा॒
त्वꣳहि॒धीभि॒र्द॑यसे॒व्विवाजा॑न् ॥ १८॥ गाव॒ऽउप॑ ॥ गाव॒ऽउपा॑वता
व॒तम्म॒हीय॒ज्ञस्य॑र॒प्प्सुदा॑ ॥ उ॒भाकर्णा॑हि॒र॒ण्ण्यया॑ ॥१९॥ यदु॒द्य ।
सू॒र॒ऽउदि॒तेना॑गामि॒त्त्रोऽअ॒र्य्य॒मा ॥ सु॒वा॒तिं॑सवि॒ताभगः॑ ॥ २० ॥
आसु॒तेसिं॑ञ्च॒तश्श्रि॒यꣳरोदं॑स्योरभि॒श्श्रि॑यम् ॥ रसा॒दं॑धीतवृ॒षभम् ॥

तम्प्रत्नकथायंव्वेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आतिष्ठन्तम्परीरवि
श्श्वेऽअभूषञ्छ्रियोव्वसानः श्चरतिस्वरोचिः ॥ महत्तद्वृष्णोऽअसुर
स्यनामाव्विश्श्वरूपोऽअमृतानितस्त्थौ ॥ २२ ॥ प्रवः ॥ प्रवोमहेम
न्दमानायान्धसोर्च्चाव्विश्श्वानरायव्विश्श्वाभुवे ॥ इन्द्रस्ययस्यसुमं
खःसहोमहिश्श्रवोनृम्मणञ्चरोदसीसपर्य्यतः ॥ २३ ॥ बृहन्नित् ॥
बृहन्निदिध्ध्मऽएषाम्भूरिंशस्तम्पृथुःस्वरुः ॥ येषामिन्द्रोयुवास
खा ॥२४॥ इन्द्रेहि ॥ इन्द्रेहिमत्स्यन्धसोव्विश्वेभिःसोमपर्व्वभिः ॥

महाँ२ऽअभिष्टिरोजंसा ॥ २५ ॥ इन्द्रोवृत्रम् ॥ इन्द्रोवृत्रमंवृणो
छ्र्द्धनीतिंप्प्रमायिनामंमिनाद्वर्पणीतिः ॥ अहन्व्यंऽसमुशध
ग्वनेष्वाविद्धेनांऽअकृणोद्राम्म्याणाम् ॥२६॥ कुतस्त्वम् ॥ कुत
स्त्वमिन्द्रमाहिनंःसन्नेकोयासिसत्पतेकिन्तंऽइत्था ॥ सम्पृच्छसे
समराणःशुंभानैर्वोचेस्तन्नोहरिवोयत्तेऽअस्मे ॥ महाँ२ऽइन्द्रो
यऽओजंसाकदाचनस्तरीरंसिकदाचनप्प्रयुंच्छसि ॥ २७ ॥ आत
त्तंऽइन्द्रायवंः । पनन्ताभियऽऊर्वङ्गोमंन्तन्तितृंत्सान् ॥ सकृ

तस्वंस्येपुंरुपुत्राम्महीᳪंसहस्रंधाराम्बृहतीन्दुदुंक्षन् ॥ २८ ॥ इमा
न्तें ॥ इमान्तेधियम्प्रभंरेमहोमहीमस्यस्तोत्रेधिषणायत्तंऽआन
जे ॥ तमुत्सवेचंप्प्रसवेचंसासहिमिन्द्रंन्देवासंᳪंशवंसामदुन्ननु ॥
॥ २९ ॥ [१२] व्विभ्राड्बृहत् ॥ व्विभ्राड्बृहत्पिबतुसोम्म्यम्मद्ध्वायु
र्द्धधंद्यज्ञपंतावविं॑ह्रुतम् ॥ वातंजूतोजोऽअंभिरक्षंतित्त्मनांप्प्रजाः
पुंपोषपुरुधाव्विरांजति ॥ ३० ॥ उदुत्यम् ॥ उदुत्यञ्जातवेंदसन्देवं
वंहन्तिकेतवंः ॥ दृशेव्विश्वांयसूर्य्यम् ॥ ३१ ॥ येनांपावक ॥ येनां

पावकचक्षसाभुरण्यन्तञ्जनाँ२ऽअनु ॥ त्वंव्वरुणपश्यंसि ॥ ३२ ॥
दैव्यांवद्ध्वर्य्यूं ॥ दैव्यांवद्ध्वर्य्यूंऽआगंतह्रथैनसूर्य्यत्वचा ॥ मद्ध्वा
यज्ञꣳसमंञ्जाथे॥ तम्प्रत्नथायंव्वेनाश्चित्रन्देवानाम् ॥ ३३ ॥ आनं॥
आनऽइडाभिर्व्विदथेसुशास्तिव्विश्वानंरꣳसविताद्देवऽएंतु ॥ अपिय
थांयुवानोमत्संथानोव्विश्वञ्जगंदभिपित्वेमंनीषा ॥३४॥ यदद्य । क
च्चंवृत्रहन्नुदगांऽअभिसूंर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशें ॥३५॥ तरणिर्व्विश्व
दर्शतꣳ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदंसिसूर्य्य ॥ व्विश्वमाभांसि

संहि· रोचनम् ॥ ३६ ॥ तत्सूर्य्यस्य । देवत्वन्तन्महित्वम्मद्ध्याकर्त्तोर्व्वि उ. अ.
॥८९॥ ततꣳसञ्जभार ॥ यदेदयुक्तहरितः सधस्त्थादाद्रात्रीवासस्तनुतेसि ॥३३॥
मस्मै ॥ ३७ ॥ तन्मित्रस्य ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्यो
रूपङ्कृणुतेद्द्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्ध
रितꣳसम्भरन्ति ॥ ३८ ॥ बण्महान् ॥ बण्महाँ२ऽअसिसूर्य्यबडा
दित्यमहाँ२ऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअ ॥८९॥
सि ॥ ३९ ॥ बट्सूर्य्यश्श्रवसामहाँ२ऽअसिसत्त्रादेवमहाँ२ऽअसि ॥ म

न्हादेवानामसुर्र्य्यः पुरोहितोव्विभुज्ज्योतिरदाब्भ्यम् ॥४०॥ आयं
न्तऽइवसूर्य्यं ॥ आयन्तऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्षत ॥ व्वसूनि
जातेजनमानऽओजसाप्प्रतिभागन्नदीधिम ॥४१॥ अद्यादेवाः ॥
अद्यादेवाऽउदितासूर्य्यस्यनिरंहसः पिपृतानिरवद्यात् ॥ तन्नो
मित्रोव्वरुणोमामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः ॥ ४२ ॥
आकृष्णेन ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥
हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥४३॥ [१४]

प्रवांवृजे । सुप्प्रयाबर्हिरेषामाविश्पतीवबीरिंटऽइयाते ॥ व्विशाम्
क्क्षोरुषसंः पूर्व्वहूतौवायुश्पूषास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवा
यूबृहस्प्पतिम् ॥ इन्द्रवायूबृहस्प्पतिम्मित्त्राग्निम्पूषणम्भगम् ॥
आदित्यान्मारुंतङ्गणम् ॥ ४५ ॥ व्वरुणःप्प्राविता । भुवन्मित्त्रोव्वि
श्वाभिरूतिभिः ॥ करंतान्नःसुराधंसः ॥४६॥ अधिनः ॥ अधिनऽ
इन्द्रैषांव्विष्णोसजात्यानाम् ॥ इतामरुंतोऽअश्विना ॥ तम्प्रत्क्कथा
यंव्वेनोयेदेवासऽआनऽइडाभिर्व्विश्वैभिः सोम्म्यम्मद्धोमासश्चर्ष

णीधृतः ॥ ४७ ॥ अग्नऽइन्द्र । वरुणमित्रदेवाः शर्द्धः प्प्रयन्तमारु
तोतव्विष्णो ॥ उभानासत्यारुद्रोऽअधग्ग्नाः पूषाभगः सरस्वतीजु
षन्त ॥४८॥ इन्द्राग्नीमित्रावरुणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳ
स्वः पृथिवीन्द्यामरुतः पर्व्वताँ२ अपः ॥ हुवेव्विष्णुम्पूषणम्ब्रह्म
णस्पतिम्भगन्नुशꣳसꣳसवितारमूतये ॥ ४९ ॥ अस्म्मेरुद्राः ॥
अस्म्मेरुद्रामेहनापर्व्वतासोव्वृत्रहत्त्येभरहूतौसजोषाः ॥ यःशꣳसं
तेस्तुवतेधायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२ अवन्तुदेवाः ॥ ५० ॥

संहि· अर्वाञ्चौऽअद्य ॥ अर्वाञ्चौऽअद्याभंवतायजत्राऽआवोहार्दिंभयंमा उ· अ·
॥९३॥ नोव्ययेयम् ॥ त्राध्वंनोदेवानिजुरोवृकंस्यत्राध्वंकुर्त्तादंवपदोयज ॥२३॥
त्राः ॥ ५१ ॥ विश्वेऽअद्य । मरुतोविश्वंऽऊतीविश्वेभवन्त्वग्नयः
समिद्धाः ॥ विश्वेनोदेवाअवसागंमन्तुविश्वंमस्तुद्रविणंवाजोऽअ
स्मे ॥ ५२ ॥ विश्वेदेवाः । शृणुतेमꣳहवंम्मेयेऽअन्तरिक्षेयऽउप
द्यविष्ठ ॥ येऽअंग्निजिह्वाऽउतवायजंत्राऽआसद्यास्मिन्बर्हिषिमा ॥९३॥
दयध्वम् ॥ ५३ ॥ देवेभ्योहि । प्रथमंयज्ञियेभ्योमृतत्वꣳसुव

सिंभागमुंत्तममम् ॥ आदिद्दामानंऽसवितर्व्यूर्णुषेनूचीनाजीविता
मानुषेभ्भ्यः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवायुमच्छांबृहतीमंनी
षाबृहद्रंयिंविश्ववांरऽरथप्प्राम् ॥ द्युतद्यांमानियुतःपत्यंमानःकु
विःकविमिंयक्षसिप्प्रयुज्ज्यो ॥ ५५ ॥ इन्द्रंवायूऽइमे । सुताऽउप
प्प्रयोंभिरागंतम् ॥ इन्द्रंवोवामुशन्तिहि ॥ ५६ ॥ मित्रऽहुवे ।
पूतदंक्षंवरुंणञ्चरिशादंसम् ॥ धियंङ्घृताचीऽंसाधंन्ता ॥५७॥ दस्रां
युवाकंवः। सुतानासंत्यावृक्कबंर्हिषः ॥ आयांतऽरुद्रवर्त्तनी ॥ तम्प्र

त्कथायंव्वेनः ॥ ५८ ॥ व्विदद्यदीं ॥ व्विदद्यदीसरमारुग्णमद्रेर्म्महि
पाथंः पूर्व्यंꣳसध्र्यक्कः ꣳ ॥ अग्रंन्नयत्सुपद्यक्षराणामच्छारवंम्प्रथ
माजानन्तीगात् ॥ ५९ ॥ नहिस्पशं म् ॥ नहिस्पशमविदन्नन्यम
स्म्माद्वैश्वानरात्पुरऽएतारंमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यंवै
श्वानरङ्क्षैत्रंजित्यायदेवाः ॥ ६० ॥ उग्राव्विघनिनां ॥ उग्राव्विघ
निनामृधऽइन्द्राग्नीहंवामहे ॥ तानोम्मृडातऽईदृशे ॥ ६१ ॥ उपा ॥९२॥
स्म्मै । गायतानरःपवमानायेन्दवे ॥ अभिदेवाँ२ऽइयक्षते ॥६२॥

येत्वा । हिहत्यैमघवन्नवर्द्धन्येशाम्बरेहरिवोयेगविष्टौ ॥ येत्वानू
नमनुमदन्तिविप्राःपिबेन्द्रसोमंसगणोमरुद्भिः ॥ ६३ ॥ जनि
ष्ठाऽउग्रःसहसेतुरायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अवर्द्धन्नि
न्द्रम्मरुतश्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा ॥६४॥ आतु ॥ आतू
नऽइन्द्रवृत्रहन्नस्माकमर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥
॥ ६५ ॥ त्वमिन्द्र ॥ त्वमिन्द्रप्रतूर्तिष्वभिविश्वाऽअसिस्पृधः ॥
अशस्तिहाजनिताविश्वतूरसित्वन्तूर्यतरुष्यतः ॥६६॥ अनुते ॥

संहि॰ अनुंतेशुष्मंतुरयंन्तमीयतुःक्षोणीशिशुन्नमातरां ॥ विश्वास्तेस्पृ उ॰ अ॰
॥९३॥ धः श्नथयन्तमन्यवैर्वृत्रंय्यदिन्द्रतूर्व्वसि ॥ ६७ ॥ यज्ञोदेवानाम् ॥ ॥३३॥
यज्ञोदेवानाम्प्रत्यैतिसुम्नमादित्यासोभवंतामृडयन्तः ॥ आवो
र्वाचीसुमतिर्व्ववृत्यादंहोश्चिद्याव्वरिवोवित्तरासत् ॥ ६८ ॥ अदं
ब्धेभिःसवितः । पायुभिष्ट्वंःशिवेभिरद्यपरिपाहिनोगयंम् ॥ हि
रंण्ण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्न्नोऽअघशंःसऽईशत ॥ ॥९३॥
॥६९॥ [१५] प्रवीरया । शुचंयोदद्रिरेवामध्वर्युभिर्म्मधुमन्तःसु

तासं÷ ॥ व्वहंव्वायोनियुतोसाह्वयच्छापिबासुतस्यान्धंसोमदाय ॥
॥ ७० ॥ गावऽउपं ॥ गावऽउपांवतावतम्मुहीयुज्ञस्यंरप्प्सुदां ॥ उ
भाकर्ण्णाहिरण्ण्ययां ॥ ७१ ॥ काव्व्ययोराजानेषु ॥ काव्व्ययोराजा
नेषुक्रत्वादक्षंस्यदुरोणे ॥ रिशादंसासधस्त्थऽआ ॥ ७२ ॥ दैव्व्या
वद्ध्वर्य्यू ॥ दैव्व्यांवद्ध्वर्य्यूऽआगंतुह्रथेनसूर्य्यत्वचा ॥ मद्ध्वायुज्ञ६
समंञ्जाथे ॥ तम्प्रत्क्कथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्विततं६ ॥ ति
रश्चीनोव्विततोरश्मिरेषामधश्स्विदासी३ दुपरिस्विदासी३त् ॥

रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिःपरस्तात्

॥९४॥ ॥ ७४ ॥ आरोदसी । अपृणदास्वर्म्महज्जातंय्यदेनमपसोऽअधा ॥३३॥

रयन् ॥ सोऽअध्वरायपरिणीयतेकविरत्योनव्वाजसातयेचनोहितः

॥ ७५ ॥ उक्थेभिर्व्वृत्रहन्तमा ॥ उक्थेभिर्व्वृत्रहन्तमायामन्दाना

चिदागिरा ॥ आङ्गूषैराविवासतः ॥ ७६ ॥ उपनः । सूनवोगिरः

शृण्वन्त्वमृतस्यये ॥ सुमृडीकाभवन्तुनः ॥ ७७ ॥ ब्रह्माणिमे । ॥९४॥

मतयःशꣳसुतासःशुष्मऽइयर्त्तिप्रभृतोमेऽअद्रिः ॥ आशासते

प्प्रतिहर्य्यन्त्युष्कुमाहरींव्वहतस्तानोऽअच्छ ॥ ७८ ॥ अनुंत्तमा
ते । मघवन्नकिर्न्नुनत्वावाँ२ऽअस्तिदेवताव्विदानः ॥ नजायमानो
नशतेनजातोयानिकरिष्ष्याकृणुहिप्प्रवृद्ध ॥७९॥ तदित् ॥ तदि
दासभुवनेषुज्ज्येष्ठुंर्य्यतोजज्ञऽउग्रस्त्वेषनृम्म्णः ॥ सद्योजज्ञानोनि
रिणातिशत्रूननुयंव्विश्श्वेमदन्त्यूमाः ॥ ८० ॥ इमाऽउंत्वा । पुरूव
सोगिरोव्वर्द्धन्तुयाममं ॥ पावकवर्ण्णाःशुचयोव्विपश्श्चितोभिस्तोमै
रनूषत ॥ ८१ ॥ यस्यायम् ॥ यस्यायंव्विश्श्वऽआर्य्योदासःशेवधि

संहि· पाऽअरिः ॥ तिरश्चिदर्य्यैरुशमेपवीरवितुभ्भ्येत्सोऽअंज्ज्यतेरयिः उ· अ·
॥९५॥ ॥ ८२ ॥ अयꣳसहस्रम् ॥ अयꣳसहस्रमृषिंभिःसहंस्कृतःसमुद्रऽ ॥३३॥
इवपप्प्रथे ॥ सत्यःसोऽअस्यमहिमागृणेशवोयज्ञेषुंविप्प्रराज्ज्ये ॥
॥ ८३ ॥ अदब्धेभिःसवितः । पायुभिष्ट्वꣳशिवेभिरद्यपरिंपाहिनो
गयम् ॥ हिरण्ण्यजिह्वःसुवितायनव्यसेरक्षामाकिंर्न्नोऽअघशꣳसऽ
ईशत ॥ ८४ ॥ [१५] आनः ॥ आनोयज्ञन्दिविस्पृशंवायोयाहि ॥९५॥
सुमन्मभिः ॥ अन्तःपवित्रंऽउपरिंश्रीणानोयꣳशुक्रोऽअयामि

ते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशा । सुहवेहहंवामहे ॥ यथानुःसर्व्वऽ
इज्जनोनमीवःसङ्गमेसुमनाऽअसंत् ॥८६॥ ऋधगित्था । समर्त्यः
शशमेदेवतांतये ॥ योनूनम्मित्रावरुंणावभिष्टंयऽआचक्रेहव्यदां
तये ॥८७॥ आयातम् ॥ आयातमुपभूषतम्मद्ध्वःपिबतमश्विना ॥
दुग्गधम्पयोवृषणाजेन्यावसुमानोमर्द्धिष्टमागतम् ॥ ८८ ॥ प्रैतु ॥
प्रैतुब्रह्मणस्प्पतिःप्प्रदेव्येतुसूनृता ॥ अच्छावीरन्नर्य्यम्पङ्क्तिराधस
न्देवायज्ञन्नयन्तुनः ॥ ८९ ॥ चन्द्रमाऽअप्प्सु ॥ चन्द्रमाऽअप्प्स्वु

संहि· न्तरासुपर्णोधावतेदिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳहरिरे उ· अ·
॥९६॥ तिकनिक्रदत् ॥ ९० ॥ देवन्देवंवः ॥ देवन्देवंवोवसेदेवन्देवमभि ॥२३॥
ष्टये ॥ देवन्देवꣳहुवेमवाजंसातयेगृणन्तोदेव्याधिया ॥ ९१ ॥ दि
विपृष्टः ॥ दिविपृष्टोऽअरोचताग्निर्वैश्वानरोबृहन् ॥ क्ष्मयावृधानऽ
ओजंसाचनोहितोज्योतिषाबाधतेतमः ॥ ९२ ॥ इन्द्राग्नीऽअपा
त् ॥ इन्द्राग्नीऽअपादियम्पूर्वागात्पद्वतीभ्यः ॥ हित्वीशिरोजि ॥९६॥
ह्वयावावदच्चरंत्त्रिꣳशत्पदान्यक्रमीत् ॥ ९३ ॥ देवासोहिष्म्मा ।

मनवेसमन्यवोविश्वेसाकꣳसरातयः ॥ तेनोऽअद्यतेऽअपरन्तुचे
तुनोभवन्तुवरिवोविदः ॥९४॥ अपाधमत् ॥ अपाधमदभिशस्ती
रशस्तिहाथेन्द्रोद्युम्न्याभवत् ॥ देवास्तऽइन्द्रसख्यायर्येमिरेबृ
हद्भानोमरुद्गण ॥ ९५ ॥ प्रवः ॥ प्रवऽइन्द्रायबृहतेमरुतोब्रह्मा
र्च्चत ॥ वृत्रꣳहनतिवृत्रहाशतक्रतुर्व्वज्रेणशतपर्व्वणा ॥ ९६ ॥ अस्ये
त् ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳशवोमदेसुतस्यविष्णवि ॥ अद्या
तमस्यमहिमानमायवोनुष्टुवन्तिपूर्व्वथा ॥ इमाऽउत्वायस्यायम

संहि· यꣳसहस्रम्मूर्द्धऽऊषुणं÷ ॥ ९७ ॥ [१३] इतिश्रीवाजसनेयसंहिता उ· अ·
॥९७॥ यांत्रयस्त्रिंशोऽध्यायः ॥३३॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्र ॥३४॥
म् ॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृष्णेनपूषंतवदशकानतदष्टौ
षडष्टापंचाशत् ॥ हरिःॐयज्जाग्ग्रंतꣳ ॥ यज्जाग्ग्रंतोदूरमुदैतिदै
वन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनं÷
शिवसंङ्कल्पमस्तु ॥ १ ॥ येनकर्म्माणि ॥ येनकर्म्माण्ण्यपसोम ॥९७॥
नीषिणोयज्ञेकृण्वन्तिविदथेषुधीराꣳ ॥ यदपूर्वंय्यक्षमन्तःप्प्रजा

नान्तन्मेमनंः शिवसंङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञा
नंमुतचेतोधृतिंश्चयज्ज्योतिंरन्तरमृतंम्प्रजासु ॥ यस्म्मान्नऽऋते
किञ्चनकर्म्मंक्रियतेतन्मेमनंः शिवसंङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥
येनेदम्भुतम्भुवंनम्भविष्यत्परिंगृहीतममृतेंनुसर्व्वम् ॥ येनंयज्ञ
स्तायतेंसप्तहोंतातन्मेमनंः शिवसंङ्कल्पमस्तु ॥ ४ ॥ यस्म्मिन्नृ
चंः ॥ यस्म्मिन्नृचः सामयजूंᳪषियस्म्मिन्प्रतिंष्ठितारथनाभाविं
वाराः ॥ यस्मिँश्चित्तᳪसर्व्वमोतंम्प्रजानान्तन्मेमनंः शिवसंङ्कल्प

 मस्तु ॥ ५ ॥ सुषारथिरश्वांनिव ॥ सुषारथिरश्वांनिवयन्मनुष्या
न्नेनीयतेभीशुंभिर्वाजिनंऽइव ॥ हृत्प्रतिष्ठुन्न्यदंजिरञ्जविष्ठुन्तन्मे
मनः शिवसंङ्कल्पमस्तु ॥ ६ ॥ पितुन्न । स्तोषम्महोधर्म्माणन्तवि
षीम् ॥ यस्यंत्रितोव्योजंसावृत्रंविपर्वमर्दयंत् ॥ ७ ॥ अन्वित् ॥
अन्विदंनुमतेत्वम्मन्यासैशन्नंनस्कृधि ॥ क्रत्वेदक्षायनोहिनुप्रणऽ
आयूंᳬंषितारिषः ॥ ८ ॥ शतम् १८०० अनुंनः ॥ अनुंनोद्यानुंम ॥१९॥
तिर्य्यज्ञन्देवेषुमन्न्यताम् ॥ अग्निश्चंहव्यवाहंनोभवंतन्दाशुषेम

यं÷ ॥ ९ ॥ सिनीवालिपृथुष्टुके ॥ सिनीवालिपृथुष्टुकेयादेवानाम
सिस्वसा ॥ जुषस्वंहुव्यमाहुतम्प्रजान्देविदिदिड्ढिनः ॥१०॥ [१०]
पञ्चनद्य÷ ॥ पञ्चनद्य÷सरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतु
पञ्चधासोदेशेभवत्सरित् ॥ ११ ॥ त्वमग्ने । प्प्रथमोऽअङ्गिराऽऋ
षिर्द्देवोदेवानामभवःशिवःसखा ॥ तवव्व्रतेकवयोविद्मनापसोजा
यन्तमरुतोब्भ्राजदृष्टयः ॥ १२ ॥ त्वन्नं÷ ॥ त्वन्नोऽअग्नेतवदेवपा
युभिर्म्मघोनोरक्षतन्न्वश्चवन्द्य ॥ त्त्रातातोकस्यतनयेगवामस्यनि

मेषद्रक्षमाणस्तवंव्रते ॥ १३ ॥ उत्तानायामवं । भराचिकित्वान्स ॥३४॥
॥९९॥ द्यःप्रवीताव्वृषणञ्जजान ॥ अरुषस्तूपोरुशंदस्यपाजऽइडायास्पु
त्रोव्वयुनेजनिष्ट ॥ १४ ॥ इडायास्त्वा । पदेव्वयन्नाभापृथिव्याऽअ
धि ॥ जातवेदोनिधीमह्यग्नेहव्यायव्वोढवे ॥१५॥ प्रमंन्महे । शव
सानायंशूषमाङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत् ॥ सुवृक्तिभिस्तुवतऽऋ
ग्मियायार्च्चामार्क्कन्नरेव्विश्श्रुताय ॥१६॥ प्रवं÷ ॥ प्रवोमहेमहि न ॥९९॥
मोभरध्वमाङ्गूष्यंशवसानायसाम ॥ येनानःपूर्व्वेपितरं÷पदज्ञाऽ

अर्चन्तोऽअङ्गिरसोगाऽअविन्दन् ॥१७॥ इच्छन्तित्वा । सोम्म्या
सꣳसखायꣳसुन्वन्तिसोमन्दधतिप्प्रयाꣳसि ॥ तितिक्षन्तेऽअभि
शꣳस्तिञ्जनानामिन्द्रत्वदाकश्चनहिप्प्रकेतः ॥ १८ ॥ नतें । दूरेप
रमाचिद्रजाꣳस्यातुप्प्रयाहिहरिवोहरिभ्याम् ॥ स्त्थिरायव्वृष्ष्णेस
वनाकृतेमायुक्ताग्ग्रावाणः समिधानेऽअग्नौ ॥१९॥ अषाढꣳयुत्सु
पृतनासुपप्प्रिꣳस्वर्षामप्सावृजनस्यगोपाम् ॥ भरेषुजाꣳसुक्षि
तिꣳसुश्रवसञ्जयन्तन्त्वामनुमदेमसोम ॥ २० ॥ [१०] सोमो

५१

धेनुम् ॥ सोमोधेनुᳪंसोमोऽअर्व्वन्तमाशुᳪंसोमोव्वीरङ्कर्म्मण्यन्द
दाति ॥ सादन्यंव्विदथ्यᳪंसभेयम्पितृश्श्रवणंय्योददाशदस्मै ॥
॥ २१ ॥ त्वमिमाः ॥ त्वमिमाऽओषधीःसोमविश्वास्त्वमपोऽअ
जनयस्त्वङ्गाः ॥ त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषाव्वितमोव्वव
र्त्थ ॥ २२ ॥ देवेनंनः ॥ देवेनंनोमनसादेवसोमरायोभागᳪंसहसा
वन्नभियुद्ध्य ॥ मात्वातनदीशिषेव्वीर्य्यस्योभयेभ्यःप्रचिकित्सा
गविष्टौ ॥२३॥ अष्टौवि ॥ अष्टौव्व्यख्यत्ककुभःपृथिव्यास्त्रीधन्व

योजनासप्तसिन्धून् । हिरण्याक्षः सविता देवऽआगाद्दधद्रत्ना
दाशुषे वार्य्याणि ॥ २४ ॥ हिरण्यपाणिः सविता । विचर्षणिरुभे
द्यावापृथिवीऽअन्तरीयते ॥ अपामीवाम्बाधते वेति सूर्य्यमभिकृ
ष्णेन रजसा द्यामृणोति ॥ २५ ॥ हिरण्यहस्तोऽअसुरः । सुनीथः
सुमृडीकः स्ववाँ यात्वर्वाङ् ॥ अपसेधन्रक्षसो यातुधानानस्थाद्देवः
प्रतिदोषङ्गृणानः ॥ २६ ॥ येते ॥ ये ते पन्थाः सवितः पूर्व्यासोऽरेण
वः सुकृताऽअन्तरिक्षे ॥ तेभिर्नोऽअद्य पथिभिः सुगेभी रक्षाच नोऽ

अधिंचब्रूहिदेव ॥ २७ ॥ उभापिंबतम् ॥ उभापिंबतमश्विनोभा
॥१०१॥ नꣳशर्म्मँयच्छतम् ॥ अविद्रियाभिरूतिभिः ॥ २८ ॥ अप्नंस्वती ॥३४॥
माश्विना ॥ अप्नंस्वतीमाश्विनाव्वाचंमस्म्मेकृतन्नोदस्रावृषणामनी
षाम् ॥ अद्युत्त्येवंसेनिह्वंयेवांवृधेचंनोभवतंव्वाजंसातौ ॥ २९ ॥ द्यु
भिरक्तुभिः ॥ द्युभिरक्तुभिꣳपरिपातमस्म्मानरिष्टेभिराश्विनासौ
भगेभिꣳ ॥ तन्नोमित्त्रोव्वरुणोमामहन्तामदितिꣳसिन्धुःपृथिवीऽ ॥१०१॥
उतद्यौः ॥ ३० ॥ [१०] आकृष्णेन । रजसाव्वर्त्तमानोनिवेशयन्न

मृतम्मर्त्त्यँञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्
न् ॥ ३१ ॥ आरात्रि । पार्थिवहरजं÷पितुरंप्प्रायिधामंभिः॥दिवः
सदांछंसिबृहतीव्वितिष्ठसऽआत्त्वेषंवर्त्ततेतमं÷ ॥ ३२ ॥उषस्तत् ॥
उषस्तच्चित्रमाभरास्म्मब्भ्यँव्वाजिनीवति ॥ येनंतोकञ्चतनंयञ्चधा
मंहे॥ ३३ ॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रंछंहवामहेप्प्रातर्म्मि
त्रावरुणाप्प्रातरश्विनां ॥ प्रातब्भंगम्पूषणम्ब्रह्मणस्प्पतिंम्प्रातः
सोमंमुतरुद्रंछंहुवेम ॥ ३४ ॥ प्रातर्ज्जितम्भगंम् ॥ प्रातर्ज्जितम्भगं

संहि· मुग्रꣳहुवेमव्वयम्पुत्रमदितेर्य्यो विधर्त्ता ॥ आद्ध्रश्चिद्यम्मन्न्यमान उ· अ·
॥१०२॥ स्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ ३५ ॥ भगप्प्रणेतः ॥ भग ॥३४॥
प्प्रणेतर्ब्भगसत्यराधोभगेमान्धियमुदवाददन्नः ॥ भगप्प्रनोजन
यगोभिरश्वैर्ब्भगप्प्रनृभिर्न्नृवन्तः स्याम ॥ ३६ ॥ उतेदानीम् ॥ उत
दानीम्भगवन्तःस्यामोतप्प्रपित्वऽउतमद्ध्येऽअह्नाम् ॥ उतोदिता
मघवन्त्सूर्य्यस्यव्वयन्देवानाꣳसुमतौस्याम ॥ ३७ ॥ भगऽएव । ॥१०२॥
भगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तःस्याम ॥ तन्त्वाभगसर्व्वऽइ

ज्जोहवीतिसनौभगपुरऽएताभवेह ॥ ३८ ॥ समध्वरायं ॥ समध्वरा
योषसोनमन्तदधिक्रावेवशुचयेपदाय ॥ अर्वाचीनंवसुविदम्भगं
न्नोरथमिवाश्वावाजिनऽआवहन्तु ॥ ३९ ॥ अश्वावतीर्गोमतीः ॥
अश्वावतीर्गोमतीर्न्नऽउषासोवीरवतीः सदमुच्छन्तुभद्राः ॥ घृत
न्दुहानाविश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः ॥४०॥[१०]
पूषन्तव । व्रतेव्वयन्नरिष्येमकदाचन ॥ स्तोतारस्तऽइहस्मसि ॥
॥ ४१ ॥ पथस्पथःपरिपतिम् ॥ पथस्पथःपरिपतिंव्वचस्याकामे

नकृतोऽअभ्यानडुर्क्कम् ॥ सनौरासच्छुरुधंश्चन्द्राग्ग्राधियन्धि
यर्ठ्ठसीषधातिप्प्रपूषा ॥ ४२॥ त्रीणिंपदाव्विचंक्रमेव्विष्ष्णुंर्ग्गोपाऽ
अदांभ्यर्ठ्ठ ॥ अतोधर्म्माणिधारयंन् ॥ ४३ ॥ तद्विप्प्रांसर्ठ्ठ ॥ तद्वि
प्प्रांसोव्विपन्न्यवोंजागृवाठ्ठंसर्ठ्ठसमिन्धते ॥ व्विष्ष्णोर्य्यत्परमम्पद
म् ॥ ४४ ॥ घृतवंतीभुवंनानाम् ॥ घृतवंतीभुवंनानामभिश्श्रियो
र्व्वीपृथ्वीमंधुदुघेसुपेशसा ॥ द्यावांपृथिवीव्वरुणस्यधर्म्मणाव्विष्कं
भितेअजरेभूरिरेतसा ॥ ४५ ॥ येनंःसपत्नाऽअपतेभंवन्त्विन्द्रा

ग्निभ्यामवंबाधामहेतान् ॥ वसंवोरुद्राऽआंदित्याऽउंपरिस्पृशं
म्मोग्रञ्चेत्तांरमधिराजमंक्रन् ॥ ४६ ॥ आनांसत्या । त्रिभिरेका
दुशैरिहदेवेभिर्य्यातम्मधुपेयंमश्विना ॥ प्रायुस्तारिष्टन्नीरपांꣳसि
मृक्षतꣳसेधंतन्द्वेषोभवंतꣳसचाभुवा ॥४७॥ एषवं÷ ॥ एषवस्तो
मोमरुतऽइयङ्गीर्म्मीदाव्यस्यंमान्यस्यंकारोः ॥ एषयासिंष्टतन्वे
वयाविद्यामेषंवृजनंञ्जीरदांनुम् ॥४८॥ सहस्तोमाꣳसहच्छन्दसꣳ॥
सहस्तोमाꣳसहच्छन्दसऽआवृतं÷सहप्रमाऽऋषयꣳसप्तदैव्याꣳ ॥

संहि· पूर्व्वैषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरत्थ्योनरश्मीन् ॥४९॥ उ· अ·
॥१०४॥ आयुष्यंवर्च्चस्यम् ॥ आयुष्यंवर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ ॥३४॥
इदꣳहिरण्ण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ॥ ५० ॥ नतत् ॥ नत
द्रक्षांꣳसिनपिशाचास्तरन्तिदेवानामोजःप्प्रथमजꣳ ह्येतत् ॥
योबिभर्त्तिदाक्षायणꣳ हिरण्ण्यꣳसदेवेषुकृणुतेदीर्ग्घमायुꣳ समनु
ष्येषुकृणुतेदीर्ग्घमायुः ॥५१॥ यदाबध्नन् ॥ यदाबध्नन्दाक्षा ॥१०४॥
यणाहिरण्ण्यꣳशतानीकायसुमनस्यमानाꣳ ॥ तन्मऽआबध्नामि

शतशारदायायुंष्मान्जुरदंष्ट्रिर्थ्यथासम् ॥ ५२ ॥ उतनं÷ ॥ उत
नोहिर्बुध्न्य÷शृणोत्वजऽएकंपात्पृथिवीसमुद्रः ॥ विश्वेदेवाऽऋं
तावृधोहुवानास्तुतामन्त्राः कविशस्ताऽअवन्तु ॥ ५३ ॥ इमागि
रं÷ ॥ इमागिरंऽआदित्येभ्योघृतस्नूःसनाद्राजंभ्योजुह्वाजुहो
मि ॥ शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोवरुणोदक्षोऽअंशं÷ ॥ ५४ ॥ सप्तऽऋषंयः ॥ सप्तऽऋषंयःप्रातिहिताःशरीरेस
प्तरंक्षन्तिसदमप्रमादम् ॥ सप्तापःस्वपतोलोकमीयुस्तत्रंजागृ

तोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठब्रह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्प्रयन्तुमरुतःसुदानवऽइन्द्रप्प्राशूर्भवासचा ॥५६॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मणस्पतिर्म्मन्त्रंवदत्युक्त्थ्यम् ॥ यस्मिन्निन्द्रोवरुणोमित्रोऽअर्य्यमादेवाऽओकांसिचक्रिरे ॥ ५७ ॥ ब्रह्मणस्पते ॥ ब्रह्मणस्पतेत्वमस्ययन्तासूक्तस्यबोधितनयञ्चजिन्व ॥ विश्वन्तद्भद्रंय्यदवन्तिदेवाबृहद्वदेमविदथेसुवीराः ॥ यऽ ॥१०५॥
इमाविश्वाविश्वकर्म्मायोनःपितान्नपतेन्नस्यनोदेहि ॥ ५८ ॥

इतिश्रीवाजसनेयसंहितायांचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अपेतोदशापाघंद्वादशद्यौद्वाविंᳪ
शतिः ॥ हरिःॐअपेतः ॥ अपेतोयन्तुपणयोसुम्नादेवपीयवः ॥
अस्यलोकःसुतावतःᳪ ॥ द्युभिरहोभिरक्तुभिर्व्यक्तंᳪयमोददात्ववं
सानंमस्मै ॥ १ ॥ सवितातें ॥ सवितातेशरीरेभ्यःᳪपृथिव्याँल्लोक
मिच्छतु ॥ तस्मैयुज्यन्तामुस्त्रियाःᳪ ॥ २ ॥ वायुःपुंनातु । सवि
तापुंनात्वग्नेर्भ्राजसासूर्य्यस्यवर्चसा ॥ विमुच्यन्तामुस्त्रियाःᳪ ॥

संहि· ॥ ३ ॥ अश्वत्थेवंः ॥ अश्वत्थेवोंनिषदंनम्पर्णेवोंव्वसतिष्कृता ॥ उ·अ·
॥१०६॥ गोभाजऽइत्किलासथयत्सनवंथपूरुषम् ॥ ४ ॥ सवितातें । शरीरा ॥३५॥
णिमातुरुपस्त्थऽआवंपतु ॥ तस्म्मैपृथिविशम्भंव ॥ ५ ॥ प्रजापंतौ
त्वा । देवतांयामुपोदकेलोकेनिदंधाम्म्यसौ ॥ अपंनःशोशुंचदघ
म् ॥ ६ ॥ परंम्मृत्यो ॥ परंम्मृत्योऽअनुपरेहिपन्थांय्यस्तेऽअन्न्यऽ
इतरोदेवयानात् चक्षुष्म्मतेशृण्वतेतेब्रवीमिमानःप्प्रजाᳪंरी॥ ॥१०६॥
रिषोमोतव्वीरान् ॥ ७ ॥ शंव्वातःं । शᳪंहितेघृणिःशन्तेभवन्त्व

ष्ट्वंकाहं ॥ शन्तेंभवन्त्वग्नयहंपार्त्थिवासोमात्वाभिशूंशुचन् ॥ ८ ॥
कल्प्पंन्तान्ते । दिशुस्तुब्भ्युमापं÷शिवतंमास्तुब्भ्यंम्भवन्तुसिन्धं
वहं ॥ अन्तरिक्षॐशिवन्तुब्भ्यङ्कल्प्पंन्तान्तेदिशहंसर्व्वाहं ॥ ९ ॥ अ
श्म्मंन्वतीरीयतेसॐरंभद्धमुत्तिष्ठतप्प्रतंरतासखायहं ॥ अत्राजही
मोशिवायेऽअसंञ्छिवान्वयमुत्तंरेमाभिव्वाजान् ॥ १० ॥ अपाघ
म् ॥ अपाघमपकिल्बिषमपंकृत्यामपोरपं÷ ॥ अपामार्गत्वमस्म्म
दपंदुहंष्वप्न्यंॐसुव ॥ ११ ॥ सुमित्रियानं÷ ॥ सुमित्रियानऽआप

संहि· ओषंधयः॑सन्तुदुर्म्मित्त्रियास्तस्मै॑सन्तुयो॒स्मान्द्वेष्टि॒यञ्च॑व॒यन्द्वि उ· अ·
॥१०७॥ ष्म॒मः॑ ॥ १२ ॥ अ॒न॒ड्वाहं॑म॒न्वारं॑भामहे॒सौरं॑भेयऽँस्व॒स्तये॑ ॥ सन॒ऽ ॥३५॥
इन्द्रं॑ऽइवदे॒वेभ्यो॒वह्नि॑ः स॒न्तारं॑णोभव ॥ १३ ॥ उद्व॒यम्॥उद्व॒यन्त
मं॑स॒स्पारि॒स्वः॑ पश्य॑न्त॒ऽउत्त॑रम् ॥ दे॒वन्दे॑व॒त्रासूर्य॒मग॑न्म॒ज्ज्यो
ति॒रु॒त्तमम् ॥ १४ ॥ इ॒मञ्जी॒वेभ्य॑ः । परि॒धिन्द॑धामि॒मैषा॒न्नुगा॒द
परो॒ऽअर्थ॑मे॒तम् ॥ श॒तञ्जीव॑न्तु॒शरद॑ः पु॒रू॒चीरन्त॑र्म्मृ॒त्युन्द॑धता॒ ॥१०७॥
म्पर्व्वते॑न ॥ १५ ॥ अग्न॒ऽआयू॑षि॒ऽँषि । पव॒स॒ऽआसु॒वोर्ज॒मिषं॑च्च॒नः॑ ॥

आरेबांधस्वदुच्छुनांम् ॥ १६ ॥ आयुंष्म्मानग्ने । हृविषांवृधानोघृ
तप्प्रंतीकोघृतयौनिरोधि ॥ घृतम्पीत्वामंधुचारुगव्यंम्पितेवंपुत्रम
भिरंक्षतादिमान्त्स्वाहां । १७ ॥ परीमे । गामंनेषतपर्य्यग्निमंहृ
षत ॥ देवेष्ष्वंक्रतश्श्रवंःकऽइमाँ२ऽआदंधर्षति ॥ १८ ॥ क्रव्यादं
मग्निम् ॥ क्रव्यादंमग्निम्प्रहिंणोमिदूरंय्यंमराज्यंङ्गच्छतुरिप्प्रवा
हः ॥ इहैवायमितंरोजातवेंदादेवेब्भ्यौहृव्यंव्वंहतुप्प्रजानन् ॥ १९ ॥
व्वहंव्वपाम् ॥ व्वहंव्वपज्जांतवेदाःपितृब्भ्योयत्रैनान्वेत्थनिहिंतान्प

संहि· राके ॥ मेदसꣳकुल्याऽउपतान्त्स्रवन्तुसत्याऽ ऐषामाशिषꣳसन्नं उ· अ·
॥१०८॥ मंताᳪंस्वाहा ॥ २० ॥ स्योनापृथिवि । नोभवानृक्षरानिवेशनी॥ ॥३६॥
यच्छानꣳशर्म्मसप्रथाꣳ ॥ अपनꣳशोशुचदघम् ॥ २१ ॥ अस्मा
त्वम् ॥ अस्मात्त्वमधिजातोसित्वदयञ्जायताम्पुनः ॥ असौस्व
र्गायलोकायस्वाहा ॥ २२ ॥ इतिश्रीवाजसनेयसंहितायांपञ्चत्रिं
शोऽध्यायः ॥ ३५ ॥ श्रीवेदपुरुषायनमः॥ अनुवाकसूत्रम् ॥ ऋ ॥१०८॥
चंवाचꣳषोडशद्यौःशान्तिरष्टौद्वौचतुर्विꣳशतिः ॥ हरिःॐऋचं

वाचम् ॥ ऋचंवाचम्प्रपंद्येमनोयजुःप्प्रपंद्येसामंप्प्राणम्प्रपंद्येचक्षुः
श्रोत्रम्प्रपंद्ये ॥ वागोजः सहौजोमयिप्प्राणापानौ ॥ १ ॥ यन्मे ।
छिद्रञ्चक्षुंषोर्हृदंयस्यमनंसोवातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥
शन्नोंभवतुभुवंनस्ययस्प्पतिः ॥ २ ॥ भूर्भुवः ॥ भूर्भुवःस्वः तत्सं
वितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ३ ॥ कया
नः ॥ कयांनश्चित्रऽआभुंवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृ
ता ॥ ४ ॥ कस्त्वा । सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिं

दारुजेवसु॥५॥अभीषुणः । सखीनामविताजरितॄणाम्॥ शतम्भ
वास्यूतिभिः ॥ ६ ॥ कयात्वम्॥ कयात्वन्नऽऊत्याभिप्रमन्दसेवृ
षन्॥कयास्तोतृभ्यऽआभर॥७॥इन्द्रोविश्वस्यराजति । शन्नोऽअ
स्तुद्विपदेशञ्चतुष्पदे॥८॥शनोमित्रःशंवरुणःशन्नोभवत्वर्य्यमा॥
शन्नऽइन्द्रोबृहस्पतिःशन्नोविष्णुरुरुक्रमः॥९॥शन्नोवातः । पव
ताछंशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्रदद्देवःपर्ज्जन्योऽअभिवर्षतु
। १० ॥ अहानिशम् ॥ अहानिशम्भवन्तुनःशꣳरात्रीःप्प्रतिधीय

ताम्॥शन्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या ॥
शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुवितायशंय्योः ॥
॥११॥ शन्न॰ ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्यो
रभिस्रवन्तुनः॥ १२॥ स्योनापृथिवि । नोभवानृक्षरानिवेशनी॥
यच्छानःशर्म्मसप्प्रथाः॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽ
ऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥ योवः । शिवतमोरस
स्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५॥ तस्म्माऽअरं

म् ॥ तस्म्मा॒ऽअरं॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ॥ आपो॑ज॒नय॑था

च॒नः ॥ १६ ॥[१६] द्यौः॒शान्ति॑ः ॥ द्यौःशान्ति॒रन्तरि॑क्ष॒ᳫंशा

न्ति॑ः पृथि॒वीशान्ति॒राप॑ःशान्ति॒रोष॑धय॒ःशान्ति॑ः ॥ व्वन॒स्प्पत॑य॒ः

शान्ति॒र्व्विश्श्वे॑दे॒वाःशान्ति॒र्ब्ब्रह्म॒शान्ति॒ः सर्व्व॒ᳫंशान्ति॒ःशान्ति॑रे॒वशा

न्ति॒ःसामा॒शान्ति॑रेधि ॥ १७ ॥ दृते॒दृᳫं॑हमा॒मि॒त्रस्य॑मा॒चक्षु॑षा॒स

र्व्वा॑णिभू॒ता॒नि॒समी॑क्षन्ताम् ॥ मि॒त्रस्या॒हञ्चक्षु॑षा॒सर्व्वा॑णिभू॒ता॒नि॒स

मी॑क्षे ॥ मि॒त्रस्य॒चक्षु॑षा॒समी॑क्षामहे ॥ १८ ॥ दृते॒दृᳫं॑हमा ॥ ज्यो

क्तेसन्दृशिजीव्यासञ्ज्योक्तेसन्दृशिजीव्यासम् ॥ १९ ॥ नमस्ते
हरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तुहेत
यःपावकोऽअस्म्मब्भ्यꣳशिवोभव ॥ २० ॥ नमस्ते । अस्तुविद्यु
तेनमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तुयतःस्वःसमीहसे ॥ २१ ॥
यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्प्रजाब्भ्योभय
न्नःपशुब्भ्यः ॥ २२ ॥ सुमित्त्रियानः ॥ सुमित्त्रियानऽआपऽओषध
यःसन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मान्द्द्वेष्टियञ्चवयन्द्विष्म्मः

संहि. ॥ २३ ॥ तच्चक्षु÷ ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्ये उ.अ.
॥१११॥ मशरद÷शतञ्जीवेमशरद÷ शतꣳशृणुयामशरद÷ शतम्प्रब्रवाम ॥३७॥
शरद÷शतमदीनाःस्यामशरद÷शतम्भूयश्चशरद÷शतात् ॥२४॥
[८] इतिश्रीवाजसनेयसंहितायांषट्त्रिंशोऽध्यायः ॥ ३६ ॥ श्रीवेद
पुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ देवस्यत्वादशयमायत्वैकादश
द्वावेकविꣳशतिः ॥ हरिःॐदेवस्यत्वा । सवितुःप्प्रसवेश्विनोर्ब्बाहु ॥१११॥
ब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ आददेनारिरसि ॥१॥ युञ्जतेमन÷ ॥

युञ्जतेमनंऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रस्यबृहतोव्विपश्चितः ॥ व्वि
होत्रांदधेव्वयुनाविदेकऽइन्महीदेवस्यंसवितुःपरिंष्टुतिः ॥२॥ देवीं
द्यावापृथिवी । मखस्यंवामद्यशिरौराद्ध्यासन्देवयजंनेपृथिव्याः ॥
मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ३ ॥ देव्यौव्वम्म्र्यः ॥ देव्यौव्वम्म्र्यो
भूतस्यंप्प्रथमजामखस्यंवोद्यशिरौराद्ध्यासन्देवयजंनेपृथिव्याः ॥
मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ४ ॥ शतम् १९०० ॥ इयत्यग्ग्रे ॥
इयत्यग्ग्रंऽआसीन्मखस्यंतेद्यशिरौराद्ध्यासन्देवयजंनेपृथिव्याः ॥

मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ५ ॥ इन्द्रस्यौजं÷ ॥ इन्द्रस्यौजं
स्त्थमखस्यंवोद्यशिरौराध्यासन्देवयजंनेपृथिव्याः ॥ मखायंत्वा
मखस्यंत्वाशीर्ष्णे ॥ मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ मखायंत्वा
मखस्यंत्वाशीर्ष्णे ॥ ६ ॥ प्रैतु । ब्रह्मंणस्पतिंप्रदेव्यैतुसूनृतां ॥
अच्छांवीरन्नर्य्यंम्पङ्क्तिरांधसन्देवायज्ञन्नंयन्तुनः ॥ मखायंत्वाम
खस्यंत्वाशीर्ष्णे ॥ मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ मखायंत्वाम
खस्यंत्वाशीर्ष्णे ॥ ७ ॥ मखस्यशिरं÷ ॥ मखस्यशिरौसि ॥ मखा

यंत्वामुखस्यंत्वाशीुर्ष्णौं ॥ मुखस्युशिरौंसि ॥ मुखायंत्वामुखस्यं
त्वाशीुर्ष्णौं ॥ मुखस्युशिरौंसि ॥ मुखायंत्वामुखस्यंत्वाशीुर्ष्णौं ॥
मुखायंत्वामुखस्यंत्वाशीुर्ष्णौं ॥ मुखायंत्वामुखस्यंत्वाशीुर्ष्णौं ॥
मखायंत्वामुखस्यंत्वाशीुर्ष्णौं ॥ ८ ॥ अश्वंस्यत्वा । वृष्णं÷शुक्ना
धूंपयामिदेुवयजंनेपृथिुव्याः ॥ मखायंत्वामुखस्यंत्वाशीुर्ष्णौं ॥
अश्वंस्यत्वावृष्णं÷शुक्नाधूंपयामिदेुवयजंनेपृथिुव्याः ॥ मखायं
त्वामुखस्यंत्वाशीुर्ष्णौं ॥ अश्वंस्यत्वावृष्णं÷शुक्नाधूंपयामिदेुवय

जंनेपृथिव्याः ॥ मखायंत्वामखस्यंत्वाशीष्ष्णें ॥ मखायंत्वामख
स्यंत्वाशीष्ष्णें ॥ मखायंत्वामखस्यंत्वाशीष्ष्णें ॥ मखायंत्वामख
स्यंत्वाशीष्ष्णें ॥ ९ ॥ ऋजवेत्वा । साधवेत्वासुक्षित्यैत्वा ॥ मखा
यंत्वामखस्यंत्वाशीष्ष्णें ॥ मखायंत्वामखस्यंत्वाशीष्ष्णें ॥ मखा
यंत्वामखस्यंत्वाशीष्ष्णें ॥ १० ॥ [१०] सुमायंत्वा । मखायंत्वा
सूर्यैस्यत्वातपंसे ॥ देवस्त्वांसवितामद्ध्वांनक्कुपृथिव्याःस(ं)स्पृशं ॥११३॥
स्पाहि ॥ अर्चिरंसिशोचिरंसितपोसि ॥ ११ ॥ अनांधृष्टापुरस्तां

त् ॥ अनाधृष्टापुरस्ताद्‌ग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिण
तऽइन्द्रस्याधिपत्येप्प्रजाम्मेदाः सुखदापश्चाद्देवस्यसवितुराधिप
त्येचक्षुर्म्मेदाऽआश्श्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः॥
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽ ओजोमेदाविश्वाभ्योमाना
ष्ट्राभ्यस्पाहिमनोरश्वासि ॥ १२ ॥ स्वाहामरुद्भिः । परिश्रीय
स्वादिवःसᳪस्पृशस्पाहि ॥ मधुमधुमधु ॥ १३ ॥ गर्भोदेवानाम् ॥
गर्भोदेवानाम्पितामतीनाम्पतिःप्प्रजानाम् ॥ सन्देवोदेवेनस

संहि· वित्रागंतसꣳसूर्य्यैणरोचते ॥ १४ ॥ समग्निः ॥ समग्निरग्निनांगत उ· अ·
॥११४॥ सन्दैवेनसवित्रासꣳसूर्य्यैणारोचिष्ट ॥ स्वाहासमग्निस्तपसागतस ॥३७॥
न्दैव्येनसवित्रासꣳसूर्य्यैणारूरुचत ॥१५॥ धर्त्तादिवः ॥ धर्त्तादि
वोव्विभांतितपंसस्पृथिव्यान्धर्त्तादेवोदेवानाममंर्त्यस्तपोजाः ॥ व्वा
चंमस्म्मेनियंच्छदेवायुवंम् ॥ १६ ॥ अपंश्यङ्गोपाम् ॥ अपंश्यङ्गो
पामनिंपद्यमानमाचपरांचपथिभिश्चरंन्तम् ॥ ससध्रीचीःसव्वि ॥११४॥
षूचीर्व्वसानऽआवरीवर्त्तिभुवनेष्वन्तः ॥१७॥ विश्वांसाम्भुवाम् ॥

व्विश्श्वांसाम्भुवाम्पतेव्विश्श्वंस्यमनसस्प्पतेव्विश्श्वंस्यव्वचसस्प्पतेसर्व्वस्य
व्वचसस्प्पते ॥ देवश्श्रुत्वन्देंवघर्म्मदेवोदेवान्पाह्यत्रप्प्राचीरनुंवा
न्देववीतये ॥ मधुमाद्धीभ्याम्मधुमाधूंचीभ्याम् ॥ १८ ॥ हृदे
त्वा । मनंसेत्वादिवेत्वासूर्र्यायत्वा ॥ ऊर्द्ध्वोऽअंद्धरन्दिविदेवेषुंधे
हि ॥ १९ ॥ पितानं÷ ॥ पितानोंसिपितानोंबोधिनमंस्तेऽअस्तुमा
मांहिᳬसीः ॥ त्वष्टृंमन्तस्त्वासपेमपुत्रान्पशून्मयिंधेहिप्प्रजाम्
स्म्मासुंधेह्यरिष्टाहᳬसहपंत्याभूयासम् ॥ २० ॥ अहं÷केतुनां ।

संहि· जुषताᳪंसुज्ज्योतिज्र्योतिषाुस्वाहा ॥ रात्रिः केतुनाजुषताᳪंसु उ· अ·
॥११५॥ ज्ज्योतिज्र्योतिषाुस्वाहा ॥ २१॥ [११] इतिश्रीवाजसनेयसंहिता ॥३८॥
यासप्तत्रिंशोऽध्यायः॥३७॥श्रीवेदपुरुषायनमः॥अनुवाकसूत्रम् ॥
देवस्यत्वाष्टौयमायत्वाक्षत्रस्यत्वादशकौत्रयोष्टाविᳪंशतिः ॥ हरिः
ॐ देवस्यत्वा । देवस्यत्वासवितुः प्प्रंसवेश्विनोर्बाहुब्भ्यांपूष्णोहस्ता
ब्भ्याम् ॥ आददेदित्यैरास्नासि ॥ १ ॥ इडऽएहि ॥ इडएह्यदितऽ ॥११५॥
एहिसरस्वत्येहि ॥असावेह्यसावेह्यसावेहि ॥२॥ अदित्यैरास्नासी

न्द्राण्याऽउष्णीषं÷ ॥ पूषासिंघर्म्मायंदीष्व॥३॥ अश्विभ्यांम्पि
न्वस्वसरंस्वत्यैपिन्वस्वेन्द्रांयपिन्वस्व ॥ स्वाहेन्द्रंवत्स्वाहेन्द्रंवत्स्वा
हेन्द्रंवत् ॥४॥ यस्ते । स्तनं÷शशयोयोमंयोभूर्य्यौरत्नधावंसुविद्वं÷
सुदत्रं÷ ॥ येनविश्वापुष्यंसिवार्य्यांणिसरंस्वतितमिहधातवेकः॥
उर्व्वन्तरिंक्षमन्वेंमि ॥ ५ ॥ गायत्रञ्छन्दं÷ ॥ गायत्रञ्छन्दोंसि
त्रैष्टुंभञ्छन्दोंसिद्यावांपृथिवीभ्यांन्त्वापरिंगृह्णाम्म्यन्तरिंक्षेणोपं
यच्छामि ॥ इन्द्राश्विनामधुंनःसारघस्यंघर्म्मम्पांतवसंवोयजंत

वाट् ॥ स्वाहासूर्य्यस्यरश्मयेवृष्टिवनये ॥ ६ ॥ समुद्रायत्वा । वा
तायस्वाहासरिरायत्वावातायस्वाहा ॥ अनाधृष्यायत्वावाताय
स्वाहाप्रतिधृष्यायत्वावातायस्वाहा ॥ अवस्यवेत्वावातायस्वा
हाशिमिदायत्वावातायस्वाहा ॥ ७ ॥ इन्द्रायत्वा । वसुमतेरुद्रव
तेस्वाहेन्द्रायत्वादित्यवतेस्वाहेन्द्रायत्वाभिमातिघ्नेस्वाहा ॥ सवि
त्रेत्वऽ ऋभुमतेविभुमतेवाजवतेस्वाहाबृहस्पतयेत्वाविश्वदेव्या ॥११६॥
वतेस्वाहा ॥ ८ ॥ [८] यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहा

घर्म्मायस्वाहाघर्म्मःपित्रे ॥९॥ विश्वाऽआशाः ॥ विश्वाऽआशा
दक्षिणसद्विश्वान्देवानयाडिह ॥ स्वाहाकृतस्यघर्म्मस्यमधोःपिब
तमश्विना ॥१०॥ दिविधाः ॥ दिविधाऽइमंय्यज्ञमिमंय्यज्ञन्दि
विधाः ॥ स्वाहाग्नयेयज्ञियायशंय्यजुर्भ्यः ॥ ११ ॥ अश्विनाघ
र्म्मम् ॥ अश्विनाघर्म्मम्पातंहार्द्दानमहर्दिवाभिरूतिभिः ॥ तन्त्रा
यिणेनमोद्यावापृथिवीभ्याम् ॥ १२ ॥ अपातामश्विना । घर्म्म
मनुद्यावापृथिवीऽअंमꣳसाताम् ॥ इहैवरातयःसन्तु ॥१३॥ इषे

पिन्वस्व ॥ इषेपिन्वस्वोर्ज्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षुत्रायपिन्वस्व
द्यावापृथिवीभ्यांपिन्वस्व ॥ धर्म्मासिसुधर्म्मामेन्यस्मेनृम्णानि
धारयब्रह्मधारयक्षुत्रन्धारयविशन्धारय ॥ १४ ॥ स्वाहापूष्णे
शरसेस्वाहाग्ग्रावभ्यःस्वाहाप्प्रतिरवेभ्यः ॥ स्वाहापितृभ्यऽऊ
र्द्ध्वबर्हिभ्योघर्म्मपावभ्यःस्वाहाद्यावापृथिवीभ्याᳬस्वाहाविश्वे
भ्योदेवेभ्यः ॥ १५ ॥ स्वाहारुद्रायरुद्रहूतयेस्वाहासञ्ज्योति
षाज्ज्योतिः ॥ अहःकेतुनाजुषताᳬसुज्ज्योतिर्ज्ज्योतिषास्वाहा ॥

रात्रिं÷केतुनांजुषताॐसुज्ज्योतिज्ज्योतिषास्वाहा ॥ मधुंहुतमि
न्द्रंतमेऽ अग्नावश्यामंतेदेवघर्म्मनमंस्तेऽ अस्तुमामांहिᳫंसीः ॥
॥ १६ ॥ अभीमम् ॥ अभीमम्मांहिमादिवंविप्प्रोबभूवसप्प्रथाः॥
उतश्श्रवंसापृथिवीॐसᳫंसीदस्वमहाँ २ असिरोचंस्वदेववीतमः ॥
व्विधूममंग्नेऽअरुषम्मियेद्ध्यसृजप्प्रंशस्तदर्शतम् ॥ १७ ॥ यातें
घर्म्मदिव्व्याशुग्ग्यागांयत्र्याॐहंविर्द्धानें ॥ सातऽआप्प्यांयतान्नि
ष्ट्यांयतान्तस्यैतेस्वाहा ॥ यातेंघर्म्मान्तरिक्षेशुग्ग्यात्रिष्टुब्भ्या

५४

॥११८॥ ग्नीध्रे ॥ सातऽआप्प्यायतान्निष्ट्यायतान्तस्यैतेस्वाहा ॥ यातेघर्म्म
पृथिव्याꣳशुग्ग्याजगत्याꣳसदस्या ॥ सातऽआप्प्यायतान्निष्ट्या ॥३८॥
यतान्तस्यैतेस्वाहा ॥ १८ ॥ [१०] क्षत्रस्यत्वा । परस्पायब्रह्मण
स्तन्वम्पाहि ॥ विशस्त्वाधर्म्मणाव्वयमनुक्क्रामामसुवितायनव्यसे
॥ १९ ॥ चतुःस्रक्तिर्न्नाभिः ॥ चतुःस्रक्तिर्न्नाभिर्ऋतस्यसप्प्रथाः ॥११८॥
सनोव्विश्वायुःसप्प्रथाःसनःसर्व्वायुःसप्प्रथाः ॥ अपद्वेषोऽअपह्व
रोन्यव्व्रतस्यसश्चिम ॥ २० ॥ घर्म्मैतत् ॥ घर्म्मैतत्तेपुरीषन्तेनव

र्द्धस्व चार्चम्प्यायस्व ॥ व्वर्द्धिषीमहिंचव्वयमार्चम्प्यासिषीमहि ॥
॥ २१ ॥ अचिक्रदुद्वृषाहरिर्म्महान्मित्रोनदर्शतः ॥ सꣳसूर्य्येणदि
द्युतदुदधिर्न्निधीः ॥ २२ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽ
ओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयन्द्वि
ष्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमसस्पपरिस्वः पश्यन्तऽउत्तर
म् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ २४ ॥ एधोसि ॥
एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥ २५ ॥ याव

तीद्यावापृथिवी । यावच्चसप्तसिन्धवोवितस्थिरे ॥ तावन्तमिन्द्र
तेग्ग्रहंसूर्ज्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ॥ २६ ॥ मयित्य
त् ॥ मयित्यदिन्द्रियम्बृहन्मयिदक्षोमयिक्क्रतुः ॥ घर्म्मस्त्रिशुग्ग्वि
राजतिविराजाज्ज्योतिषासहब्रह्मणातेजसासह ॥ २७ ॥ पयसो
रेतः ॥ पयसोरेतऽआभृतन्तस्यदोहमशीमह्युत्तरामुत्तराꣳसमा
म् ॥ त्विषःसंवृक्क्त्वेदक्षस्यतेसुषुम्म्णस्यतेसुषुम्म्णाग्निहुतः ॥ इन्द्र

पीतस्यप्प्रजापतिभक्षितस्यमधुमतऽ उपहूतऽउपहूतस्यभक्षया

मि ॥२८॥ [१० ॥इतिश्रीवाजसनेयसंहितायाअष्टत्रिंशोऽध्यायः
॥ ३८ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ स्वाहाप्राणेभ्यः
षडुग्रश्चसप्तद्वौत्रयोदश ॥ हरिः ॐ स्वाहांप्प्राणेभ्यंः ॥ स्वाहांप्प्रा
णेभ्यःसाधिंपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षाय
स्वाहांव्वायवेस्वाहां ॥ दिवेस्वाहासूर्य्यायस्वाहां ॥ १ ॥ दिग्भ्यःस्वा
हां । चन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहाव्वरुणायस्वाहां ॥
नाभ्यैस्वाहांपूतायस्वाहां ॥ २ ॥ व्वाचेस्वाहां । प्प्राणायस्वाहांप्प्रा

॥१२०॥ णायस्वाहा ॥ चक्षुषेस्वाहाचक्षुषेस्वाहाश्रोत्रायस्वाहाश्रोत्राय

स्वाहा ॥ ३ ॥ मनसःकामम् ॥ मनसःकाममाकूतिंवाचःसत्यम ॥३९॥

शीय ॥ पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्मयिस्वाहा ॥

॥ ४ ॥ प्रजापतिःसम्भ्रियमाणःसम्राट्सम्भृतोवैश्वदेवःसꣳसन्नो

घर्म्मःप्रवृक्तस्तेजऽउद्यतऽआश्विनः पयस्यानीयमानेपौष्णोवि

ष्यन्दमानेमारुतःक्लथन् ॥ मैत्रःशरसिसन्ताय्यमानेवायव्योह्रि ॥१२०॥

यमाणऽआग्नेयोहूयमानोवाग्घुतः ॥५॥ सविताप्प्रथमेऽहन्नग्नि

द्धितीयेव्वायुस्तृतीयऽआदित्यश्चतुर्थैचन्द्रमाःपञ्चमऽऋतुःषष्ठेम
रुतं÷सप्तमेबृहस्पतिरष्टमेमित्रोनवमेव्वरुणोदशमऽइन्द्रऽएका
दशेव्विश्वेदेवाद्वादशे ॥ ६ ॥ उग्ग्रश्च । भीमश्चध्वान्तश्चधुनिश्च ॥
सासह्वाँश्चाभियुग्ग्वाचंव्विक्षिपःस्वाहा ॥ ७ ॥ अग्निᳬहृदयेन ॥
अग्निᳬहृदयेनाशनिᳬ हृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंय्य
क्का ॥ शर्व्वम्मतस्नाभ्यामीशानम्मन्न्युनामहादेवमन्तःपर्शव्ये
नोग्ग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ ८ ॥

संहि· उग्रंल्लोहितेनमित्रꣳसौव्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतो उ· अ·
॥१२१॥ बलेनसाध्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महा ॥३९॥
देवस्ययकृच्छर्वस्यवनिष्ठुःपशुपतेःपुरीतत् ॥ ९ ॥ लोमभ्यःस्वा
हा । लोमभ्यःस्वाहात्वचेस्वाहात्वचेस्वाहालोहितायस्वाहालोहि
तायस्वाहामेदोभ्यः स्वाहामेदोभ्यःस्वाहामाꣳसेभ्यःस्वाहा
माꣳसेभ्यःस्वाहास्नावभ्यःस्वाहास्नावभ्यःस्वाहास्थभ्यः ॥१२१॥
स्वाहास्थभ्यःस्वाहामज्जभ्यः स्वाहामज्जभ्यःस्वाहा ॥ रेतं

न्यायव्वें स्वाहां ॥१०॥ आयासायस्वाहां । प्रायासायस्वाहां
संयासायस्वाहांव्वियासायस्वाहांद्युासायस्वाहां ॥शुचेस्वाहाशोचं
तेस्वाहाशोचंमानायस्वाहाशोकांयस्वाहां ॥११॥ तपंसेस्वाहा । त
प्यंतेस्वाहातप्यंमानायस्वाहांतप्तायस्वाहांघर्म्मायस्वाहां ॥ नि
ष्कृत्यैस्वाहाप्रायंश्चित्यैस्वाहांभेषजायस्वाहां ॥१२॥ यमायस्वा
हां ॥यमायस्वाहान्तंकायस्वाहांमृत्यवेस्वाहां॥ब्रह्मंणेस्वाहांब्रह्मह
त्यायैस्वाहाव्विश्वेभ्योदेवेभ्यःस्वाहाद्यावांपृथिवीभ्याᳪंस्वाहां

संहि· ॥१३॥ इतिश्रीवाजसनेयसंहितायाएकोनचत्वारिंशातितमोऽध्या उ· अ·
॥१२२॥ यः ॥ ३९ ॥ श्रीवेदपुरुषायनमः ॥ अनुवाक्सूत्रम् ॥ ईशावास्यम ॥४०॥
ष्टावंधंतमोनवद्वैसप्तदश ॥ हरिःॐईशावास्यम् ॥ ईशावास्यमि
दꣳसर्वँय्यत्किञ्चजगंत्याञ्जगंत् ॥ तेनंत्यक्तेनंभुञ्जीथामागृधःक
स्यंस्विद्धनम् ॥१॥ कुर्वन्नेव ॥ कुर्वन्नेवेहकर्म्माँणिजिजीविषेच्छतꣳ
समाः ॥ एवन्त्वयिनान्यथेतोऽस्तिनकर्म्मँलिप्प्यतेनरे ॥ २ ॥ असु ॥१२२॥
र्य्यानाम । तेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्प्रेत्यापिंगच्छ

…कचांत्महनोजनांः ॥ ३ ॥ अनेय्देकंम् ॥ अनेय्देकम्मनं
सोजवींयोनैनंद्देवाऽआंप्नुवन्पूर्व्वमर्शंत् ॥ तद्धावंतोन्यानत्यैतिति
ष्टत्तस्मिन्नपोमातरिश्वांदधाति ॥ ४ ॥ तदेंजति । तन्नैजंतितद्दूरेत
द्वन्तिके ॥ तदुन्तरंस्यसर्व्वंस्यतदुसर्व्वंस्यास्यबाह्यतः ॥५॥ यस्तु॥य
स्तुसर्व्वाणिभूतान्यात्मन्न्येवानुपश्यंति ॥ सर्वभूतेषुंचात्मानन्ततो
नव्विचिकित्सति ॥६॥ यस्मिन्त्सर्व्वाणिभूतान्यात्मैवाभूंद्विजान
तः ॥ तत्रकोमोहुःकःशोकंऽएकुत्त्वमंनुपश्यंतः ॥७॥ सपरिं॥सप

संहि. र्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम् ॥ कविर्म्म उ.अ.
॥१२३॥ नीषीपरिभूः स्वयम्भूर्य्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यꣳ ॥४०॥
समाभ्यꣳ ॥ ८ ॥ अन्धन्तमꣳ । प्प्रविशन्तियेसम्भूतिमुपासते॥
ततोभूयऽइवतेतमोयऽउसम्भूत्याꣳरताः ॥ ९ ॥ अन्यदेव ॥ अ
न्यदेवाहुःसम्भवादन्यदाहुरसम्भवात् ॥ इतिशुश्रुमधीराणांये
नस्तद्विचचक्षिरे ॥ १० ॥ सम्भूतिञ्च । विनाशञ्चयस्तद्वेदोभयꣳ ॥१२३॥
सह ॥ विनाशेनमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्ध

न्तमः॑। य्यऽविंशंतिये विद्यामुपासंते ॥ ततो भूयंऽइव ते तमो यऽउ विद्यायां ऽरताः॥ १२॥ अन्यदेव ॥ अन्यदेवाहुर्विद्यायांऽअन्यदाहुरविद्यायाः॥ इतिशुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३॥ विद्याञ्च ॥ विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह ॥ अविद्यया मृत्युन्तीर्त्वा विद्ययामृतमश्नुते ॥ १४॥ वायुरनिलम् ॥ वायुरनिलममृतमथेदम्भस्मान्तं शरीरम् ॥ ओ३म् क्रतो स्मर ॥ क्लिबे स्मर ॥ कृतं स्मर ॥ १५॥ अग्नेनय । सुपथा राये ऽअस्मान्विश्वानिदे

वव्वयुनांनिव्विद्वान् ॥ युयोद्ध्युस्म्मज्जुंहुराणमेनोभूयिंष्ठान्तेनमंऽउ
क्किम्विधेम ॥१६॥ हिरण्मयेंनपात्रेंण। सत्यस्यापिंहितम्मुखंम् ॥
योसावांदित्येपुरुषःसोसावहम् ॥ १७ ॥ ॐ३ ॥ खम्ब्रह्म ॥१८॥
इतिश्रीवाजसनेयसंहितायांचत्वारिंशत्तिमोऽध्यायः ॥ ४० ॥
॥ श्रीवेदपुरुषार्पणमस्तु ॥ ॥ दशाध्यायेसमाख्यातानुवाकाः सर्व
संख्यया ॥ शतंदशानुवाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तष
ष्टिश्चितोज्ञेयासौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत्पंचात्रिं

शांतिखलेस्मृताः ॥ २ ॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंत्र्यधिकंमतं ॥ ३ ॥ इतिश्रीवाजसनेयसंहितायामनुवाकःसमाप्तः ॥ ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं मोहमय्यां निर्णयसागरयंत्रालयाधिपतिना स्वकीये मुद्रणालये मुद्रापितम् ॥ तत्र न्यग्रोध [वलसाड] पुरनिवासिना शुक्लकल्याणजीतनुजवल्लभरामेण संशोधितम् ॥

संवत् १९६३ शकाब्दः १८२९

सन्मूलो यजुराख्यवेदविटपी जीयात् स माध्यंदिनीशाखा यत्र युगेंदुकांडसहिता यत्रास्थिता संहिता ॥
यत्राभ्राद्रिलता विभांति सरशैलार्कैंदुभिर्र्ककदलैः पंचाब्धीषुनभोंकवर्णमधुपैः खाग्न्यर्कगुंगुंजितैः ॥ १ ॥

इति श्रीवाजसनेयसंहिताउत्तरविंशतिः समाप्ता ॥

अथ याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रम अनुवाकसूत्रप्रारम्भः ॥

॥ अथ याज्ञवल्क्यशिक्षाप्रारम्भः ॥

श्रीगणेशाय नमः ॥ ॥ अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ॥
उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ॥ लक्षणं वर्णयिष्यामि दैवतं
स्थानमेव च ॥ १ ॥ शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते ॥
श्यामं तु स्वरितं विंद्यादग्निमुच्चस्य दैवतम् ॥ २ ॥ नीचे सोमं वि
जानीयात्स्वरिते सविता भवेत् ॥ उदात्तं ब्राह्मणं विंद्यान्नीचं क्षत्रि
यमुच्यते ॥ ३ ॥ वैश्यं तु स्वरितं विंद्याद्भारद्वाजमुदात्तकम् ॥

नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ॥ ४ ॥ विंद्यादुदात्तं
गायत्रं नीचं त्रैष्टुभमुच्यते ॥ जागतं स्वरितं विंद्यादत एवं नियो
गतः ॥ ५ ॥ गांधर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः ॥ त एव
वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥ ६ ॥ उच्चौ निषादगांधारौ नीचौ
ऋषभधैवतौ ॥ शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपंचमाः ॥
॥ ७ ॥ षड्जो वेदे शिखंडिः स्यादृषभः स्यादजामुखे ॥ गवा रंभं
ति गाधारं क्रौंचाश्चैव तु मध्यमम् ॥ ८ ॥ कौकिलः पंचमो ज्ञेयो

निषादं तु वदेद्गजः ॥ आश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते ॥९॥ निमेषमात्रः कालः स्याद्विद्युत्कालस्तथापरे ॥ अक्षरात्तुल्य योगाच्च मतिः स्यात्सोमशर्मणः ॥ १० ॥ सूर्यरश्मिप्रतीकाशात्क णिका यत्र दृश्यते ॥ अणवस्य तु सा मात्रा मात्रा च चतुराणवा ॥ ११ ॥ मानसे चाणवं विंद्यात्कंठे विंद्याद्विराणवम् ॥ त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ॥ १२ ॥ अवग्रहे तु कालः स्या दर्धमात्रा विधीयते ॥ पदयोरंतरे काल एक मात्रा विधीयते ॥

॥ १३ ॥ ऋचोर्द्धे तु द्विमात्रः स्यात्रिमात्रः स्याद्दृगंतके ॥ रिक्तं तु
पाणिमुत्क्षिप्य द्वैमात्रे धारयेद्बुधः ॥१४॥ एकमात्रो भवेद्ध्रस्वो द्वि
मात्रो दीर्घ उच्यते ॥ त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्द्धमात्रकम्
॥ १५ ॥ विवृतौ चावसाने च ऋचोर्द्धे च तथापरे ॥ पदे च पादसं
स्थाने शून्यहस्तं विधीयते ॥ १६ ॥ प्रणवं तु प्लुतं कुर्याद्व्याहृतीर्मा
तृका विदुः । चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् ॥१७॥
शिखी वदति त्रिमात्रा मात्राणामिति संस्थितिः ॥ वर्णौ जातिश्च

मात्रा च गोत्रं छंदश्च दैवतम् ॥ १८ ॥ एतत्सर्वं समाख्यातं याज्ञ
वल्क्येन धीमता ॥ हस्तौ तु संयतौ धार्यौ जानुभ्यामुपरि स्थितौ
॥ १९ ॥ गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत् ॥ ऊरुभागे तृतीये
तु करं विन्यस्य दक्षिणं ॥ २० ॥ प्रसन्नमानसो भूत्वा किंचिन्निम्न
मधोमुखं ॥ प्रणवं प्राक् प्रयुंजीत व्याहृतीस्तदनंतरं ॥ २१ ॥ सावि
त्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥ कूर्मोऽङ्गानीव संहृत्य चेष्टां
दृष्टिं दृढं मनः ॥२२॥ स्वस्थः प्रशांतो निर्भीतो वर्णानुच्चारयेद्बुधः ॥

नाभ्याहन्यान्न निर्हन्यान्न गायेन्नैव कंपयेत् ॥ २३ ॥ यथैवोच्चार
येद्वर्णांस्तथैवैतान्समापयेत् ॥ निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनु
चिंतयेत् ॥२४॥ सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च ॥ स्वरश्चैव
तु हस्तश्च द्वावेतौ युगपद्भवेत् ॥ २५ ॥ हस्तभ्रष्टः स्वरभ्रष्टो न वेद
फलमश्नुते ॥ न करालो न लंबोष्ठोनाव्यक्तो नानुनासिकः ॥ गद्गदो
बद्धजिह्वश्च न वर्णान्वक्तुमर्हति ॥ २६ ॥ प्रकृतिर्यस्य कल्याणी दं
तोष्ठौ यस्य शोभनौ ॥ प्रगल्भश्च विनीतश्च स वर्णान्वक्तु मर्हति

॥ २७ ॥ शंकितं भीतमुद्घृष्टमव्यक्तमनुनासिकं ॥ काकस्वरं मूर्द्धि
गतं तथा स्थानविवर्जितं ॥ २८ ॥ विस्वरं विरसं चैव विश्लिष्टं विष
माहतं ॥ व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश ॥ २९ ॥ संहिता
सारबहुलः पदसंज्ञासमाकुलः ॥ क्रमसंधिसमाकीर्णो दुस्तरो मंत्र
सागरः ॥ ३० ॥ ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ॥ साम्नां
वा सरहस्या च सर्वपापैः प्रमुच्यते ॥ ३१ ॥ संहिता नयते सूर्यं पदं
च शशिनः पदं ॥ क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयं ॥ ३२ ॥

कालिंदी संहिता ज्ञेया पदयुक्ता सरस्वती ॥ क्रमेणावर्त्तयेद्गंगा
शंभोर्वाणी तु नान्यथा ॥३३॥ यथा महान्हदं प्राप्य क्षिप्तो लोष्ठो
विनश्यति ॥ एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ॥ ३४ ॥ आ
म्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ वाग्यतः प्रातरुत्थाय
भक्षयेद्दंतधावनं ॥ ३५ ॥ खादिरश्च कदंबश्च करवीरकरंजकौ ॥
एते कंटकिनः पुण्याः क्षीरिणस्तु यशस्विनः ॥ ३६ ॥ तेनास्यकरणे
सूक्ष्मं माधुर्यं चैव जायते ॥ त्रिफला लवणाक्तेन भक्षयेच्छिष्य

कः सदा ॥ क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ॥ ३७ ॥ हस्त
हीनं तु योऽधीते मंत्रं वेदविदो विदुः ॥ न साधयति यजूंषि भुक्त
मव्यंजनं यथा ॥ ३८ ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितं ॥ ऋ
ग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ३९ ॥ ऋचो यजूंषि
सामानि हस्तहीनानि यः पठेत् ॥ अनृचो ब्राह्मणस्तावद्यावत्स्वारं
न विंदति ॥ ४० ॥ ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये ॥ पठ
न्मात्रापपाठात्तु पंके गौरिव सीदति ॥ ४१ ॥ स्वरवर्णप्रयुंजानो ह

स्तेनाधीतमाचरन् ॥ ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात्
॥ ४२ ॥ न कुर्वीत पदं दीर्घं न कुर्वीत विलंबितं ॥ पदस्य गृहमो
क्षौ च यथा शीघ्रगतिर्हयः ॥ ४३ ॥ आगमं कुरु यत्नेन कारणं
हि तदात्मकम् ॥ आस्येन च शयं कुर्यात्पठन्नान्यमतिर्भवेत् ॥
॥ ४४ ॥ न चास्य मुष्टिबंधी स्यान्नचात्युत्तममाचरेत् ॥ चुलुर्नौका
स्फुटोदंडी स्वतिकोमुष्टिराकृतिः ॥ एते वै हस्तदोषाः स्युः परशु
श्चैव सप्तमः ॥ ४५ ॥ यथा वाणी तथा पाणी रिक्तं तु परिवर्जये

त् ॥ यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ॥ ४६ ॥ यथा धनुष्यावितते शरे क्षिप्ते पुनर्गुणः ॥ स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ॥ ४७ ॥ उत्तानं सोन्नतं किंचित्सुव्यक्तांगुलिरंजितं ॥ स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनं ॥ ४८ ॥ अंगुष्ठस्योत्तरे पर्वे तर्जन्योपरि यद्भवेत् ॥ प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करं ॥ ४९ ॥ मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं व्रजेत् ॥ नामितं करपृष्ठे तु सुव्यक्तांगुलिमोक्षणं ॥ ५० ॥ स्वरिते त्र्यंगुलं विंद्यान्निपाते

तु षडंगुलं ॥ उत्थाने तु नवांगुल्यमेतत्स्वरस्य लक्षणं ॥ ५१ ॥
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमा ॥ शिष्याणामुपदे
शार्थं कुर्याद्वृत्तिं विलंबितां ॥ ५२ ॥ ऐंद्री तु मध्यमा वृत्तिः प्रा
जापत्या विलंबिता ॥ अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निंदिता
॥५३॥ मुष्ट्याकृतिर्मकारे तु नस्वारे तु नकाग्रतः ॥ अनुस्वारेंऽगुष्ठ
क्षेप ऊष्मांतेंऽगुलिमोक्षणं ॥५४॥ उदात्तं भुवि पातेन प्रचयं नो
ग्र एव च ॥ शेषं षडंगुलं विंद्यान्निचितं तु विधीयते ॥ ५५ ॥ षडं

गुलं तु जात्यस्य हस्तस्यानुपथस्य च ॥ तच्चतुर्भागमात्रं तु हस्त
स्तेनैव वर्तयेत् ॥५६॥ ककाराते टकारांते ङणे चांगुलिनामयेत् ॥
पंचागुल्यमकारे च तकारे कुंडलाकृतिः॥५७॥ ऊर्ध्वक्षेपाच्च योष्मा
च अधः क्षेपाच्च यो भवेत् ॥ एकैकामुत्सृजेद्धीरः स्वरिते तूभयं
क्षिपेत् ॥५८॥ अंगुष्ठाकुंचनं लब्धौ अनुस्वारे त्वपाठंरसं ॥ दीर्घे
रंगे च तर्जन्याः प्रसारः परिकीर्तितः ॥ ५९ ॥ तर्जन्यंगुष्ठयोः स्प
र्शेप्युदात्तं प्रतिविद्यते ॥ नीचं तु मध्यमं कुर्याच्छेषं नीचतरं क्र

मात् ॥ ६० ॥ स्वरितं यद्भवेत्किंचिद्दकारसहसंयुतं ॥ ऊष्माणं तद्वि
जानीयान्निक्षिपेदुभयोरपि ॥ ६१ ॥ स्वरितसंज्ञे च निक्षिप्ते संयो
गो यत्र दृश्यते ॥ द्विमात्रिके भवेदेकमात्रिके तूभयं क्षिपेत् ॥
॥ ६२ ॥ जात्ये च स्वरिते चैव वकारो यत्र दृश्यते ॥ कर्तव्यस्तू
भयोः क्षेपो वायव्य इति दर्शनम् ॥ ६३ ॥ शृंगवद्वाथ वत्सस्य कु
मारीकुचयुग्मवत् ॥ उभक्षेपस्वरो यत्र स विसर्ग उदाहृतः ॥ ६४ ॥
विसर्गांतस्वरो यत्र स्वरितो यत्र दृश्यते ॥ दीर्घश्चैव तुकारश्च तत्रोभ

याज्ञव. क्षेप उच्यते ॥ ६५ ॥ त्रिविधस्तु भवेदूष्मा प्रचिता बलकातरा ॥ शिक्षा.
॥ ८ ॥ स्वरिते प्रचिता विद्यान्निपाते बलकां विदुः ॥ ६६ ॥ उत्थाने तु
तथा तारा एताभिस्त्रिभिरूष्मभिः ॥ मात्रामात्रां विदित्वा तु
ततः क्षेपं प्रयोजयेत् ॥ ६७ ॥ अक्षरं भजते काचित्काचिद्वित्ते
प्रतिष्ठितं॥समाने जातिका काचित्काचिदूष्माप्रदायिका ॥६८॥
यथा बालस्य सर्पस्य उच्छ्वासो लघुचेतसः ॥ एवमूष्मा प्रयोक्तव्या ॥ ८ ॥
हकारः परिवर्जितः ॥ ६९ ॥ विवृतिं प्रत्यया ऊष्मां प्रवदंति म

नीषिणः ॥ तामेव प्रतिषेधंति यथा आईऊएइति निदर्शनं ॥ ७० ॥
अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणं ॥ जात्योभिनिहितक्षै
प्रप्रश्लिष्टश्च तथापरः ॥ ७१ ॥ पादवृत्तस्तथा भाव्य इति स्वराः ॥
एकपदे नीचपूर्वः सयवोजात्यः ॥ एकपदइत्याह ॥ ७२ ॥ नीच
पूर्वः सयकारवकारौ वा जात्यः स्वरितो भवति ॥ यथाजात्यं मनु
ष्यानिति सुद्धेति चम्वींव धान्यम् कन्या इवस्वः वीर्यं एवꣳह्या
हयानि चान्यानीदृग्लक्षणानि पदानि भवंति ॥ एओ आभ्यामु

दात्ताभ्यामकारोरिफितश्च यः ॥ अकारो यत्र लुप्येत तं चाभिनि
हितं विदुः ॥७३॥ यथा कुक्कुटः-असि कुक्कुटोसि ॥ वेदः-असि वे
दोसि ॥ भागः-असि भागोसि॥मारुतः-असि मारुतोसि ॥ श्वात्रः-
असि श्वात्रोसि ॥ तेअप्सरसाम्-तेप्सरसाम् ॥ ते-अवंतु तेवंतु ॥
कः-असि कोसि॥सः-अहं सोहं ॥ एवङ्हि यानि चान्यानि ईदृग्ल
क्षणानि पदानि भवंति ॥ इउवर्णौ यदोदात्तावापद्येते यवौ क्वचि
त् ॥ अनुदात्ते पदे नित्यं विंद्यात्क्षैप्रस्य लक्षणम् ॥ ७४ ॥ यथा

त्रि-अंबकम् त्र्यंबकम्॥द्रु-अन्नः द्रुन्नः ॥वीडु-अंगःवीड्वंगः ॥ वाजी-
अर्वन् वाज्यर्वन् ॥ एवंआद्याहयानि० ॥ इकारोयत्र दृश्येत इका
रेणैव संयुतः ॥ उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥ ७५ ॥
अभि-इन्धताम् अभीन्धताम् ॥ अभि-इमं अभीमं ॥ वि-इहि वी
हि ॥ स्रुचि-इव स्रुचीव॥ चम्वी-इव चम्वीवेति ॥ एवंआद्याहयानि
चान्यानि० ॥ उदात्तपूर्वं यत्किंचिच्छंदसि स्वरितं पदं ॥ एषसर्वे
बहुस्वारस्तैरोव्यंजन उच्यते ॥ ७६ ॥ इडे रंते हव्ये काम्ये चंद्रे

ज्योते अदिति सरस्वती महि विश्रुतीति भवंति ॥ एवꣳह्याह
यानि० भवंति ॥ अवग्रहात्परोयस्तु स्वरितः स्यादनंतरं ॥ तैरो
विरामं तं विंद्यादुदात्तो यद्यवग्रहः ॥ ७७ ॥ यथा गोमदितिगो-
मत् ॥ गोपतावितिगो-पतौ ॥ प्रप्रेतिप्र-प्र ॥ विततेतिवि-तता ॥
समिद्धइतिसम्-इद्धः ॥ एवꣳह्याहयानि० भवंति ॥ स्वरेति स्व
रिते चैव विवृतिर्यत्र दृश्यते ॥ पादवृत्तोभवेत्स्वारः श्वित्रआदि ॥१०॥
त्येति निदर्शनं ॥ श्वित्रः-आदित्याना श्वित्र आदित्याना ॥ पुत्रः-

ईंधे-पुत्रईंधे ॥ दात्रे-एधि दात्रएधि ॥ कः-ईम् कईम् ॥ ताः-अस्य
ताअस्य ॥ एवꣳह्याहयानि० ॥ उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्व
वग्रहः ॥ तथा भाव्यं भवेत्कंपंस्तनूनप्त्रेति निदर्शनम् ॥ ७८ ॥
यथातनूनप्त्रइति-तनूनप्त्रे ॥ तनूनपादिति तनू-नपात् ॥ तनून
पातमिति तनू-नपातम् ॥ एवꣳह्याहयानि पदानि लक्षणानि
भवंति ॥ इत्यष्टपदसमाम्नाये वैशेषिके याज्ञवल्क्यवचनाना प
दानां पाठः समाप्तः ॥ ॥ माध्यंदिनविरोधि स्यात्तथा भाव्यस्तु

यः स्मृतः ॥ स्वरो नैवात्र दृश्येत भिन्नोदात्तानुदात्तकौ ॥ १ ॥
स्वराः स्पर्शान्तःस्थोष्माणः ॥ कंठ्यजिह्वामूलीयतालव्यमूर्धन्य
दंत्यओष्ठ्ययमा विसर्जनीयनिपाताद्याश्च किंवर्णदैवत्यलिंगाः
स्वराः शुक्लाः नानादैवत्याः॥ स्पर्शाः कृष्णाः ॥ कपिला अंतस्थाः॥
ऊष्माणोऽरुणाः॥ नीला यमाः ॥ हरिता नासिक्याः॥ पीतोनुऽस्वा
रः ॥ रक्तो जिह्वामूलीयः॥ पीत उपध्मानीयः॥ श्वेतो विसर्जनीयः॥ ॥११॥
शबलो रंगः॥नीलोऽनुनासिक्यः॥दंत्यंतर्मध्यमयोर्नासिक्यं विद्या

त् ॥ द्विरुदात्ताख्या इति स्मृतः ॥ उदमनुदनिपाते आद्ये चोप
सर्गे नामाख्याते चोपसर्गनिपाताश्चेति किं दैवत्याः ॥ अक्षराणां
च के पुरुषाः ॥ काः स्त्रियः ॥ कानि नपुंसकानि इत्यत्र ब्रूमः ॥
कंठ्या आग्नेयाः अकारादयः ॥ जिह्वामूलीया नैर्ऋत्याः कका
रादयः ॥ तालव्याः सौम्याः चकारादयः ॥ वायव्या मूर्धन्याष्ट
कारादयः ॥ रौद्रा दंत्याः तकारादयः ॥ औष्ठ्या आश्विन्याः पका
रादयः ॥ शेषा वैश्वदेवाः ॥ अं इत्येवमादयः ॥ स्वरास्तु ब्राह्मणा

ज्ञेया वर्गाणा प्रथमाश्च ये ॥ द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः ॥ २ ॥ वर्गाणा पंचमा वैश्या अंतस्थाश्च तथैव च ॥ ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिताः ॥ ३ ॥ शुक्लवर्णानि नामानि आख्याता रोहिता मताः॥ कपिंजलास्तूपसर्गाः कृष्णा श्चैव निपातकाः ॥ ४ ॥ भार्गवगोत्राणि नामानि भारद्वाजा आ ख्याताः ॥ वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः ॥ पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णकः ॥ सर्वं तु सौम्यमाख्यातं

नाम वायव्यं दृश्यते ॥ आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृ
तः ॥ ५ ॥ प्रथमाश्च तथांतस्थाः स्त्रीलिंगाः परिकीर्तिताः ॥ शेषा
क्षराणि षंढानि प्राहुर्लिंगविवेचकाः ॥ ६ ॥ नाम्नामिंद्रो देवता
वरुणः उपसर्गाणामादित्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो
यमाश्च पुँल्लिंगाः ॥ ङञणनमा यरलवाः स्त्रीलिंगाः ॥ शेषाण्यक्ष
राणि नपुंसकलिंगानीति ॥ संधिश्चतुर्विधोभवतीति ॥ लोपागमौ
वर्णविकारः प्रकृतिभावश्चेति ॥ तद्यथा-तत्र लोपो भवति अय

क्ष्माः-मा अयक्ष्मामा ॥ शततेजाः-वायुः शततेजावायुः ॥ ति
ग्मतेजाः-द्विषतः तिग्मतेजाद्विषतः ॥ इतिलोपः ॥ आगमोभव
ति-यथा प्रत्यक्सोमःप्रत्यङ् सोमः ॥ प्राक्सोमः प्राङ्सोमः ॥
अस्मान् सीते अस्मान्त्सीते ॥ त्रीन् समुद्रान् त्रीन्त्समुद्रान् ॥
इतिआगमः ॥ विकारोभवति आ-इदम् एदम् ॥ आ-इमे एमे ॥
आ-इष्टयःएष्टयः ॥ प्र-इषितः प्रेषितः ॥ इतिविकारः ॥ प्रकृति
भावः यथा-आशुः शिशानः ॥ युञ्जानः प्रथमम् ॥ अदितिः षो

डशाक्षरेण ॥ देवोवःसविता ॥ इतिप्रकृतिभावः ॥ आकाशस्था यथा विद्युत्स्फुटितं मणिसूत्रवत् ॥ एषच्छेदोविवृतीना यथा बा लेषु कर्तरि ॥ ७ ॥ द्वयोस्तु स्वरयोर्मध्ये संधिर्यत्र न दृश्यते ॥ विवृतिस्तत्र विज्ञेया यईशेति निदर्शनम् ॥ ८ ॥ पिपीलिका पा कवती तथा वत्सानुसारिणी ॥ वत्सानुसंसृता चैव चतस्रस्तु वि वृत्तयः ॥ ९ ॥ पंचरंगाः प्रवर्तंते घातनिर्घातवज्रिणः ॥ अहरम्ह रोज्ञेय अइउऋओइति निदर्शनं ॥ १० ॥ पिपीलिका आद्यंतदी

र्घा नाभ्याआसीदिति निदर्शनम् ॥ पाकवत्युभयोर्ह्रस्वा विनइ
न्द्रेति निदर्शनम् ॥ ११ ॥ अंते च वत्सानुसृजता तानेत्यसौ आ
वोढमश्विनेति नि० ॥ वत्सानुसारिणी चादौ दीर्घा ताअस्येति नि०
॥ १२ ॥ करिणी कुर्विणी चैव हरिणी हारिणीति च ॥ तथा हंस
पदा नाम पंचैताः स्वरभक्तयः ॥ १३ ॥ करिणी रहयोर्योगे कु
र्विणी लहकारयोः ॥ हरिणी रषयोर्योगे हारितं ऋषकारयोः ॥
॥ १४ ॥ या तु हंसपदा नाम सा तु रेफषकारयोः ॥ हरिणी ह

रयोर्विंद्यात्कुर्विंणी लहकारयोः ॥ १५ ॥ देवंबर्हिरिति करिणी
उपव्हरेति कुर्विंणी ॥ हरिणीं अरेषसइत्याहुर्हारिणी शतवल्हेति
च ॥ १६ ॥ वर्षौवर्षीयतेसीति तथा हंसपदेति च ॥ स्वरभक्तिं
प्रयुंजानस्त्रीन्दोषान्परिवर्जयेत् ॥ १७ ॥ इकारं चाप्युकारं च
ग्रस्तदोषं तथैव च ॥ एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता
॥ १८ ॥ सम्यक् पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥ अ
र्धमात्रास्वरंकिंचित्पृथङ्न्यूनमिवोच्चरन् ॥ऋकारे चहकारेचल्हत्कं

ठमनसानि च ॥ १९ ॥ नैतत्स्वरितपूर्वांगे नापरागे कथंचन ॥
न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥ २० ॥ परांगस्य
तु यत्पूर्वं पूर्वांगस्य तु यत्परं ॥ उभयार्द्धार्द्धसंयोगे स्वारं कुर्याद्विच
क्षणः ॥ २१ ॥ संयोगे तु परं स्वार्थं परं संयोगनायकम् ॥ संयुक्तस्य
तु वर्णस्य न स्वार्थं पूर्वमक्षरम् ॥ २२ ॥ उदात्तादनुदात्ते तु वा
मायाभ्रुव आरभेत् ॥ उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्य
सेत् ॥ २३ ॥ स्वरितादनुदात्ता ये प्रचयास्तान्प्रचक्षते ॥ एकस्व

रंरापि चातानाहुस्तत्वार्थचिंतकाः ॥ २४ ॥ प्रचयो यत्र दृश्येत
तत्र हन्यात्स्वरं बुधः ॥ स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत्
॥२५॥ दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः ॥ एवं व्यंजनमासा
द्य अकारो हरते स्वरम् ॥ २६ ॥ उच्चादुच्चतरं नास्ति नीचान्नीच
तरं तथा ॥ अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च ॥ २७ ॥
स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ॥ स्वरप्रधानैस्तैः स्वा
र्यं व्यंजनं तेन सस्वरम् ॥ २८ ॥ व्यंजनान्यनुवर्तंते यत्र तिष्ठ

ति सस्वरः ॥ स्वरप्रधानं त्रैस्वर्यं आचार्याः प्रवदंति हि ॥ २९ ॥
मणिवद्व्यंजनं विद्यात्सूत्रवच्च स्वरं विदुः ॥ आचार्याः सममिच्छं
ति पदच्छेदं तु पंडिताः ॥ ३० ॥ स्त्रियो मधुरमिच्छंति विकृष्ट
मितरे जनाः ॥ उदात्तं नानुवर्तंते नीचन्नस्वरितं तथा ॥ ३१ ॥
विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम् ॥ हरिवरुणवरेण्येषु
धारापुरुषेषु च ॥ स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता
नकाराः ॥ ३२ ॥ द्वौ वरुणौ च स्वरितौ ॥ उदुत्तमं वरुणधारयेवरे

रुधारा उरुधारा च होइते ॥ मात्रिकं वा द्विमात्रं वा स्वरितं यदि
हाक्षरम् ॥ तस्यादितोर्द्धमात्रा वै शेषं च परतोभवेत् ॥ ३३ ॥ न
कारांते पदे पूर्वे श्मश्रुभिः परतः स्थिते ॥ छकारं न प्रयुंजीत अश
संधिं समुच्चरेत् ॥ ३४ ॥ ओकारं प्लुतविज्ञेयं प्लुतमग्नाद्वितीयकं ॥
लाजीं छाचीं तृतीयं च विवेशोति चतुर्थकं ॥ ३५ ॥ अधः स्विदा
सीत्पंचमं चोपरिस्विदासीच्च षष्ठकं ॥ सप्तमं तु भ्रुवोस्मार अष्टमं
नैव विद्यते ॥ ३६ ॥ उच्चस्थानगते हस्ते स्वरितं नोपपद्यते ॥ अंध

स्यातु यदागच्छेत्स्वरितं न तदाभवेत् ॥ कचटतपा दृश्यंते संधि
स्थानेषु नित्यशः॥स्ववर्गेणैव संयुक्ता मोक्षं तत्र न कारयेत् ॥ तका
राते पदे पूर्वे सकारे परतः स्थिते ॥ प्रत्यारंभं न कुर्वीत पापाविति
निदर्शनम् ॥ ककाराते पदे पूर्वे सकारे परतः स्थिते ॥ खसवर्णं
विजानीयात् भिखक्सेति निदर्शनम् ॥ तकारांते पदे पूर्वे चवर्गे
परतः स्थिते ॥ मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनं ॥ ङका
राते पदे पूर्वे सकारे परतः स्थिते ॥ कसवर्णं विजानीयात्प्राङ्सो

मेति निदर्शनम् ॥ टकारांते पदे पूर्वें सकारे परतः स्थिते ॥ टसवर्णं विजानीयात्संम्राट् संभृतेति निदर्शनम् ॥ तकारांते पदे पूर्वें सकारे परतः स्थिते ॥ छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम् ॥ नकाराते पदे पूर्वें सकारे परतः स्थिते ॥ तसवर्णं विजानीयात्त्री न्त्समुद्रेति निदर्शनम् ॥ पकारांते पदे पूर्वें शकारे परतः स्थिते ॥ छासवर्णं विजानीयादनुष्टुप्छारदीति निदर्शनम् ॥ मकारांते पदे पूर्वें सवर्णें परतः स्थिते ॥ मसवर्णं विजानीयादिमम्मेति निदर्श

॥१८॥ नम् ॥ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः ॥ द्विमात्रे मात्रि
को ज्ञेयः संयोगाद्यस्य यो भवेत् ॥ अनुस्वारो द्विमात्रः स्याद्दवर्ण
व्यंजनादिगः ॥ ऱ्हस्वाद्वा यदि वा दीर्घाद्देवानाꣳहृदयेभ्य इति ॥
अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते ॥ दीर्घं तं तु विजानीया
च्छ्रोताग्रावाणेति निदर्शनम् ॥ अनुस्वारस्योपरिष्टात्संयोगो यत्र
दृश्यते ॥ ऱ्हस्वं तं तु विजानीयात्सꣳस्थेति निदर्शनम् ॥ अनुस्वा ॥१८॥
रश्च यो दीर्घादक्षराद्यो भवेत्परः ॥ स तु ऱ्हस्वइति ज्ञेयो मंत्रेष्वेव

विभाषया ॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च ॥ जिव्हा
मूलमुपध्मा च गतिरष्टविधोष्मण: ॥ यथा भावप्रसंधानमुकारा
दिपरं पदम् ॥ स्वरांतं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मण: ॥ उभा
वादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत् ॥ विवृत्तं प्रति या ऊ
ष्मा विज्ञेया विकटानना ॥ लीढातिलीढविद्युच्च शषसेषु प्रकीर्ति
ता: ॥ जिव्हामूले च रेफे च विज्ञेया विठकाशठा ॥ उपध्मानी
यसहिता पुष्पिणीं तां विनिर्दिशेत् ॥ अन्यत्र यो भवेदूष्मा सुलभा

तां विनिर्दिशेत् ॥ पादाद्यंतं पदाद्यंतं तथावग्रहकालिकं ॥ ईषत्स्पृ
॥१९॥ ष्टं विजानीयात्तस्मिन्काले तु कारयेत् ॥ पादादौ च पदादौ च
संयोगावग्रहेषु च ॥ यः शब्द इति विज्ञेयो योन्यः स य इति स्मृ
तः ॥ उपसर्गपरो यस्तु पदादिरपि दृश्यते ॥ ईषत्स्पृष्टं यथा विद्यु
त्पदच्छंदात्परं भवेत्॥ त्वदर्थवाचिनौ वो वां वावैयदि निपातजौ ॥
आदेराजविकल्पार्थां ईषत्स्पृष्टा इति स्मृताः ॥ विभाषयामेका ॥१९॥
रः स्यात्तथा नेतैः पदात्परः ॥ भवंतेत्यपि पूर्वैव तथा च सपदाद

पि ॥ यदेव लक्षणं यस्य वकारस्यापि तद्भवेत् ॥ यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते ॥ वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः ॥ आदौ गुरुर्लघुर्मध्ये पदांते तु लघूत्तरः ॥ उपांशु त्वरितं चैव योधीते हृदि संज्ञकः ॥ अपिरूपसहस्रेषु सदेहेषु प्रवर्तते ॥ पंचविद्यां न गृह्णंति जडास्तब्धाश्च ये नराः ॥ आलस्याश्चैव रोगाश्च येषां च विस्मृतं मनः ॥ अहिरिव गुणाद्भीतः संमानान्नरकादिव ॥ राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ न भोजनविलंबी स्या

न्न च नारीनिबंधनः ॥ सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत् ॥ यथा
नखात्खनित्रेण नरोवार्यधिगच्छति ॥ तथा गुरुगतां विद्यां शुश्रू
षुरधिगच्छति॥ सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ॥
सुखिनस्तु कुतो विद्या सुखं विद्यार्थिनः कुतः ॥ गुणिता शतशो
विद्या सहस्रावर्तिता पुनः ॥ आगमिष्यति जिह्वाग्रे स्थलनिम्न
मिवोदकम् ॥ शतेन गुणिता विद्या सहस्रेण च तिष्ठति ॥ शतानां
च सहस्रेण प्रत्यंचदवतिष्ठति ॥ जलमभ्यासयोगेन शिलाया कुरु

ते क्षयं ॥ कर्काणांमृदुतस्तस्य किमभ्यासान्न साध्यते ॥ गुरुशुश्रू
षया विद्या पुष्कलेन धनेन वा ॥ अथवा विद्यया विद्या चतुर्थं
नोपलभ्यते ॥ शुश्रूषारहिता विद्या ह्यल्पमेधागुणैःसह ॥ वंध्या च
यौवनी तस्या न विद्या फलिनी भवेत् ॥ हयानामिव जात्याना
मर्धमात्रार्द्धशायिनाम् ॥ न हि विद्यार्थिना निद्रा चिरं नेत्रेषु ति
ष्ठति ॥ यथा ॥ पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महान् ॥
न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम् ॥ अंजनस्य क्षयं दृष्ट्वा व

ल्मीकस्य तु संचयं ॥ अवंध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥
॥२१॥ अन्नव्यंजनयोर्भागस्तृतीयमुदकस्य च ॥ वायोः संचारणार्थाय
चतुर्थमुपकल्पयेत् ॥ हाकारं पंचमैर्युक्तमंतस्थैश्चापि संयुतं ॥ औ
रसं तं विजानीयात्कंठ्यमाहुरसंयुतं ॥ हकारो यत्र पूर्वस्थो अंत
स्थाद्यो भवेत्परः ॥ पदकाले वियुज्येत संहितायां स ओरसः ॥ मेघ
दुंदुभिनिर्घोषो ज्ञायते पयसो ह्रदात् ॥ एवं नादं प्रयोक्तव्यं सिंहस्य ॥२१॥
रुदितं यथा ॥ मासे भाद्रपदे मेघाः शब्दं कुर्वंति यादृशम् ॥ एवं

गव्हरमासाद्य शुकं दुदुन्हेति दर्शनं ॥ शेषाणां वानरा युद्धमुत्पतं
ति पतंति च ॥ एवं वर्णाः प्रयोक्तव्या इहेहैषान्निदर्शनम् ॥ यथा
पुत्रवती स्नेहाच्चुंबते निजमौरसम् ॥ एवं वर्णाः प्रयोक्तव्या युञ्जा
नेति निदर्शनं ॥ दुर्दरो जयदेशे च प्रफतेषुर्नयाप्ययया ॥ एवं वर्णाः
प्रयोक्तव्या अपां फेनेति निदर्शनम् ॥ यथा भारभराक्रांता निश्व
संति नरा भुवि ॥ एवं वर्णाः प्रयोक्तव्या अभ्यः संभृत इत्यपि ॥
कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत् ॥ एवं वर्णाः प्रयोक्तव्याः

कुक्कुटोसीति दर्शनम् ॥ वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा ॥
एवं वर्णाः प्रयोक्तव्याः सदुंदुभेति दर्शनम्॥ रंगे चैव समुत्पन्नेनोग्र
सेत्पूर्वमक्षरम्॥ स्वरं दीर्घं प्रयुंजीत पश्चान्नासिक्यमाचरेत् ॥ यथा
सौराष्ट्रिका नारी अराँ इत्यभिभाषते॥ एवं रंगः प्रवक्तव्यो ङकारः
परिवर्जितः ॥ द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः ॥
अंते प्रयुंजते रंगः पंचमैः सानुनासिकः ॥ यथा सौराष्ट्रिका नारी
अराँ इत्यभिभाषते ॥ एवं रंगं विजानीयात् ङकारपरिवर्जितम् ॥

अनंतरं मकारस्य यो रंगस्तत्र रंज्यते ॥ सर्वानुनासिकं विंद्यादेषा
मध्योपधानिका ॥ यरलवशषसहरज्यंते चोपधानिका ॥ गर्वांते
रंगते यस्तु सर्वैः सर्वानुनासिका ॥ नासादुत्पद्यते रंगः कांस्येन
समानिःस्वनः ॥ मृदुश्चैव द्विमात्रः स्याद्दृष्टिमान्स्यान्निदर्शनम् ॥
यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत् ॥ भीता पतनभेदा
भ्या तद्वद्वर्णान्प्रयोजयेत् ॥ मधुरं च नचाव्यक्तं व्यक्तं चापि न पी
डितम् ॥ स नाथस्यैकदेशस्य न वर्णाः शंकरं गताः ॥ यथा सुमत्त

नागेंद्रः पदात्पदं निधापयेत् ॥ एवं पदं पदाद्यंतं दर्शनीयं पृथक्
पृथक् ॥ गीती शीघ्री शिरःकंपी यथालिखितपाठकः ॥ अनर्थ
ज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छे
दस्तु सुस्वरः ॥ धैर्यं लयसमत्वं च षडेते पाठका गुणाः ॥ चतुर
क्षरषट्कं च निवर्तेत पुनः पुनः ॥ आवर्तते पदं यच्च द्विस्त्रिराम्रेडितं
हि तत् ॥ यथा धाम्ने धाम्नेति यजुषे यजुषेति निदर्शनम् ॥ ही
यते वर्धते चापि पदं यत्र कृशोदरम् ॥ उपचारः स विज्ञेय उभे

सुश्चंद्रेति निदर्शनम् ॥ ॥ अथ सप्तविधाः संयोगपिंडाः ॥ ॥ अयः पिंडो दारुपिंड ऊर्णापिंडो ज्वालापिंडो मृत्पिंडो वायुपिंडो व ज्रपिंडश्चेति ॥ यमान्विद्यादयः पिंडान्सातस्थं दारुपिंडवत् ॥ अंतस्थं यमवर्जं तु ऊर्णापिंडं विनिर्दिशेत् ॥ अंतस्थं यमसंयोगे विशेषो नोपलभ्यते ॥ अशरीरं यमं विंद्यादंतस्थः पिंडनायकम् ॥ ज्वालापिंडान्सनासिक्यान्सानुस्वारांस्तु मृन्मयान् ॥ सोपध्मा वायुपिंडाश्च जिव्हामूले तु वज्रिणः ॥ अयःपिंडोनामयथा ॥

अग्नीः पक्कीः नातनच्मि ॥ दारुपिंडोनामयथा ॥ अश्वः सूर्यः वि श्वाजतीतिभवति ॥ तत्रऊर्णापिंडोनामयथा ॥ यस्मिन् अत्यस्मि न् अमुष्मिन् इतिभवति ॥ तत्रज्वालापिंडोनामयथा ॥ ब्रह्मा वन्हिः गृह्मामीति भवति॥तत्र मृत्पिंडोनामयथा ॥ साꣳस्थासꣳ स्कर्त्तार सꣳस्वर्तइति ॥ तत्र वायुपिंडोनामयथा ॥ देवसवितः । सु ज्ञानःप्रथमम् । प्रादिवःककुत्सुक्षमितिभवति ॥ तत्रवज्रपिंडोनाम यथा ॥ इष्कृतिःनिष्कृतिः॥ऋक्सामइति भवति ॥ प्रथममेव षका

रेण सकारेणैव संयुतं ॥ एतत्स्वरं समासाद्य अग्निष्वात्तान्निदर्श
नम् ॥ प्रथमेन ठकारेण थकारेणैव संयुतम् ॥ एतत्स्वरं समासाद्य
अधिष्ठाननिदर्शनम् ॥ प्रथममेव णकारेण नकारेणैव संयुतम् ॥
एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिंशाविति निदर्शनम् ॥ प्रथम
मेव रंगेण नकारेणैव संयुतम् ॥ एतद्रञ्जितमासाद्य वृष्टिमानिति
निदर्शनम् ॥ एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्या
ताः शनैश्चरदैवत्याः ॥ चत्वार्यन्तस्था यरलवाः कपिलवर्णाः

अग्निदैवत्याः ॥ चत्वार्यूष्माणः शषसहा अरुणवर्णाः आदित्यदै
वत्याः ॥ त्रयस्त्रिंशद्व्यंजनानि स्पर्शा अंतस्था ऊष्माणश्चेति च
तुर्विधं करणम् ॥ स्पृष्टमस्पृष्टं संवृतं विवृतं चेति ॥ संवृतो घोषा वि
वृता अघोषाः ॥ विंशतिर्घोषास्ते गजडदबा घझढधभा ङञणन
नमाः यरलवाश्चेति ॥ त्रयोदश अघोषास्ते कचटतपाः खछठथ
फाः शषसाश्चेति ॥ अष्टौ वर्णस्थानानि भवंति ॥ उरः कंठ्यमूर्ध
न्यतालुदंत्यजिह्वामूलयमानुनासिक्याश्चेति ॥ द्वौ औरस्यौ ह

हा इति । अआआ ३ त्रयः कंठ्याः ॥ ऋषट्मूर्द्धन्याः टठडढ
णष ॥ इति ॥ दश तालव्याः चछजझञयशइईई ३ इति ॥
अष्ट दंत्याः ॥ तथदधनलृलसाः ॥ एकादश ओष्ठ्याः ॥ पफब
भमाउऊऊ ३ छउपध्माचेत्यादयः ॥ एकोदंतमूलीयोरेफः ॥
जिह्वामूलीयाः पंच कुंखुंगुंघुंङुंइति ॥ क्मख्मग्मघ्मकुंखुंगुंघुंइति
यमाश्चत्वारः ॥ रुक्मेति प्रथमोज्ञेयः सक्इत्यपरो भवेत् ॥ तृती
यः सघ्नइत्याहुः उपध्मेति चतुर्थकः ॥ प्रथमौ चौष्ठनासि

क्यौ द्वितीयः कंठ्यदंतश्च नासामूलमुपाश्रितः ॥ तृतीयः कंठ्य
जिह्वाग्रे नासायामेव निर्दिशेत् ॥ चतुर्थोंहृदि नासिक्यः कंठे
चाभिहिता यमाः ॥ आपंचमैश्चैकपादः संयुक्तं पंचमाक्षरम् ॥
यमास्तत्रनिवर्तन्ते श्मशानादिव बांधवाः ॥ यत्किंचिद्वाङ्मयंलो
के सर्वमत्र प्रतिष्ठितम् ॥ सर्वमत्र प्रतिष्ठितमिति ॥ ऋवर्णोंतित्परे
सादावनुस्वारोद्विमात्रकः॥संयोगे परभूतेषु र्‍ह्रस्व एवोच्यते बुधैः॥ ॥२६॥
इति श्री याज्ञवल्क्यशिक्षासमाप्ता ॥ ॥ ॥ ॥

॥ अथ प्रतिज्ञासूत्रम् ॥

॥ श्रीगणेशायनमः ॥ अथप्रतिज्ञामन्त्रब्राह्मणयोर्वेद नामधेयं तस्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदात्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरितः एवं जात्यादयोभिहिता ब्राह्मणेतूदात्तानुदात्तौ भाषिकस्वारौतानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥ अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्यापिरेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्या

याज्ञव. वसानेषूच्चारणे जकारोच्चारणं द्विर्भावेप्प्येवमथापरातस्थस्यायुक्ता प्रति.
॥२७॥ न्यहलसंयुक्तस्योष्मऽऋकारैरेकारसहितोच्चारणमेवं तृतीयातस्थ
स्य क्वचिद्दकारस्य तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्य
स्यान्तस्थाना पदादिमध्यान्तस्थस्य त्रिविधं गुरुमध्यमलघुवृ
त्तिभिरुच्चारणमथोमूर्द्धन्योष्मणोऽसंयुक्तस्यटुमृते संयुक्तस्यचख
कारोच्चारणमध्ययनादिकर्मस्वर्थवेलाया प्रकृत्या ॥ २ ॥ अथानु ॥२७॥
स्वारस्य६इत्यादेशः शषसहरेफेषु तस्य त्रैविध्यमाख्यातम् ॥

ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परोदीर्घोगुरौ परे गुरुः परसवर्णैषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्विरामःपदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवतीति ॥ ३ ॥ इति कात्यायनपरिशिष्टप्रतिज्ञासूत्रं समाप्तम् ॥ ॥ ॥ ॥ ॥

॥ अथ सर्वानुक्रमसूत्रम् ॥

श्रीगणेशायनमः ॥ ॐमंडलं दक्षिणमक्षिहृदयं चाधिष्ठितं येन शुक्लानि यजूꣳषि भगवान्याज्ञवल्क्योयतः प्राप तं विवस्वंतं

त्रयीमयमर्चिष्मंतमभिध्यायमाध्यंदिनीये वाजसनेयके यजुर्वे
दाम्नाये सर्वे सखिले सशुक्रियऋषिदैवतछंदांस्यनुक्रमिष्यामो
यजुषामनियताक्षरत्वादेकेषा छंदोन विद्यते द्रष्टारो ऋषयः स्म
र्तारः परमेष्ठ्यादयोदेवता मंत्रातर्भूताध्यादिकाहविर्भाजस्तुति
भाजोवानः शाखोखाशम्योपवेषकपालेध्मोलूखलादयश्च प्रति
माभूताश्छंदांसि गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते
जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भ

वत्यथातराश्वगर्त्तंवापद्यते स्थाणुं वर्छति प्रमीयते वा पापीयान्भ
वत्यथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योर्थवित्तस्य वी
र्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते ॥ १ ॥ इषेत्वादि
खं ब्रह्मांतं विवस्वानपश्यत्ततः प्रतिकर्मविभागेन ब्राह्मणानुसारे
ण ऋषयो वेदितव्याः परमेष्ठी प्राजापत्योदर्शपूर्णमासमंत्राणामृ
षिर्देवा वा प्राजापत्या इषेत्वाशाखानुष्टुब्विनियोगः कल्पकारो
क्त एवमूर्जेत्वा वायवो वायव्यं देवोव ऐंद्रं यजमानस्य शाखाव

सोर्वायव्यं द्यौर्मातरिश्वन उखा वसोर्वायव्यं देवस्त्वापयः काम-
धुक्षः प्रश्नः सा विश्वायुस्त्रीणि गव्यानींद्रस्यैंद्रं विष्णो पयः ॥ २ ॥
यो अग्न इदमाग्नेये कस्त्वा प्राजापत्यं कर्मणे स्रुक्शूर्पं प्रत्युष्टं
द्वे राक्षसे उरुब्रह्मरक्षोघ्नꣳ सर्वत्र धूरसिधूर्देवानां विष्णुस्त्वानऽउ
रुहविष्याऽअपहतꣳरक्षोयच्छंताꣳहविष्या देवस्यत्वा सावित्रꣳस
र्वत्राग्नेये लिंगोक्ते भूताय त्वा हविः स्वः सूर्यो दृꣳहंतां गृहाः पृथि
व्यास्त्वा हव्यं पवित्रे लिंगोक्तꣳसवितुर्देवीः प्रोक्षिता आपान्यग्न

ये लिंगोक्ते दैव्याय पात्राणि ॥ ३ ॥ शर्मास्यदित्याः कृष्णाजिन
मवधूतꣳ राक्षसमद्रिर्ग्रावोलूखले अग्नेर्हविर्बृहत्स इमम्मौसले हवि
ष्कृदधिदैवतं वागधियज्ञं पत्नी कुक्कुटो वाग्वर्षवृद्धꣳशूर्पं प्रतित्वा
हविः परापूतमपहतꣳराक्षसे वायुर्वोदेवो वस्तंडुलाधृष्टिरूपवेषोपा
ग्न आदेवयजमाग्नेये ध्रुवमसिपण्णा कपालान्यग्ने ब्रह्माग्नेयं धि
षणासि दार्षदंदिवः शम्या धिषणौपलं धान्यमसि षण्णाꣳहविर्म
हीनामाज्यम् ॥ ४ ॥ संव्वपामि हविः समाप आपं जनयत्त्यै त्वे

दꣳहविरिषेत्वाज्यं घर्म्मोसि षण्णापुरोडाशस्त्रिताय त्रयाणा त्रितो
द्वितः क्रमेणाददइंद्रस्य स्फ्यः पृथिवीवेदिर्व्रजं पुरीषं वर्षंतु वेदि
र्बंधानसावित्रमपाररुमररो आसुरेन्द्रप्सस्ते वेदिर्गायत्रेण त्रीणि वै
षणवानि सूक्ष्मा त्रयाणा वेदिः पुराघशꣳसोपशयच्चाद्रमसी त्रिष्टु
भं प्रोक्षणीः प्रैषोद्विपतः आभिचारिकमनिशितः स्रुवो निशिता
स्रुगदित्यै विष्णोर्योक्रमूर्जं त्रयाणामाज्यꣳसवितुरार्षं तेजोसिधा
माज्यं ॥ ५ ॥ इति० संहितायां प्रथमोऽध्यायः ॥ कृष्णोसीध्मो वे

दिर्बर्हिर्लिंगोक्ते अदित्या आपं विष्णोः प्रास्तरमूर्णम्रदसं वेदिर्भु
वपतये त्रीण्याग्नेयानि गंधर्वस्त्रयाणा परिधयो वीतिहोत्रं त्विश्वा
वसुराग्नेयीं गायत्रीॐसमिदाग्नेय८सूर्यस्त्वालिंगोक्त८सवितुर्विंधृ
तीऊर्णम्रदसमात्वाप्रास्तरे धृताच्यसि त्रयाणा जुहूपभृद्धुवाः क्र
मेण प्रियेण हविर्ध्रुवा असदन्पाहि मां वैष्णवे अग्नेवाजजिदा
ग्नेयं नमोदैवॐस्वधापितृभ्य८सुयमे स्रुचावंध्रिणा वैष्णवं वसुमती
माग्नेयमितऐंद्र८संज्योतिषाज्यं मयीदमाशीप्रतिग्रहणमुपहूता

द्यावापृथिव्यम् ॥ ६ ॥ ब्रह्मत्वंप्रतिष्ठातं बृहस्पतिरांगिरसोपश्य
दग्नेष्ट्वा प्राशित्रमेतंते वैश्वदेवमेषा तेनुष्टुबाग्नेय्यग्नेवाजजिदाग्नेय
मग्नीषोमयोश्चत्वारि लिंगोक्तानि वसुभ्यस्त्रयाणा परिधयः संज्ञा
नाथाव्यंतु प्रास्तरे मरुता कपिर्बृहतीं प्रास्तरीमंत्यः पाद आग्नेयो
यंपरिधिं देवलआग्नेयीं त्रिष्टुभं विराड्रूपा यजुरंतामग्नेः प्रियं य
जुःसꣳस्त्रवभागाः सोमसूक्ष्मोवैश्वदेवीं त्रिष्टुभं यजुरंताꣳस्वाहा
वाज्यजुर्घृताचीस्रुचौयज्ञनमः शूर्पं यवमान्कपिरुद्दालवां धाना

स. नु. ॥३१॥ सू. अ. १ ॥३१॥

तर्वांनिति पंचार्षेयोयज्ञोदेवताग्नेदब्धायोगार्हपत्योग्नये दक्षिणा
ग्निः सरस्वत्यै लिङ्गोक्तं वेदोसि वेदो देवामनसस्पतिर्वातदेवत्या
विराजꣳसंबर्हिर्लिंगोक्ता त्रिष्टुब्विराड्रूपा कस्त्वा प्राजापत्यꣳरक्ष
साꣳरक्षसम् ॥ ७ ॥ अथयाजमानꣳसंवर्चसा त्वाष्ट्री त्रिष्टुब्दि
विविष्णुस्त्रीणि वैष्णवान्यस्माद्भागोस्यैभूमिरगन्म दैवꣳसंज्योति
षा हवनीयः स्वयंभूः सूर्यस्य सौरे अग्ने गृहपतेग्नार्हपत्यः सूर्य्यस्य
सौरमग्न इदमाग्नेये ॥ ८ ॥ पितृयज्ञः प्रजापतेरार्षमग्नये सोमा

स. नु. य द्वेदैवेस्वाहा कारयश्रुतेरपहता असुरं ये रूपाणि कव्यवाहनोग्नि सू. अ.
॥३२॥ त्रिष्टुबत्रामीमदंत पित्र्यै नमोवः षड्लिंगोक्तानि परे पित्र्ये आध १
त्त पित्र्यागायत्र्यूर्ज्जमापिविराट्॥ ९॥ इति०संहितायां द्वितीयोऽ
ध्यायः॥ अग्न्याधेयं प्रजापतेरार्षम् देवानामग्नेर्गंधर्वाणां वा स
मिधाग्नेय्यश्चतस्रो गायत्र्यः समिधाविरूप आंगिरसः सुसमिद्धा
य वसुश्रुतस्त्वां भरद्वाजो भूर्भुवःस्वस्तिस्रो महाव्याहृतयोग्निवा ॥३२॥
युसूर्यदेवत्याः क्रमेण द्यौरिव यजमानाशीर्लिंगोक्तदेवतायंगौः सा

परांड्यस्तृचो गायत्र्योग्निःपरावररूपेण देवता ॥ १० ॥ अग्निहो
त्रं प्रजापतेरार्षम् अग्निर्ज्योतिः सप्तलिंगोक्तदेवता गायत्र्य आ
द्याः पंचैकपदा अग्निर्वर्चोंद्वे तक्षापश्यत्पराजीवलश्चैलकिः ॥११॥
यजमानाद्युपस्थानं बृहद्देवानामार्षम् उपप्रयंत इत्यनुवाक आ
द्ये द्वे आग्नेय्यौ गायत्र्यावुपवत्यागोतमो राहूगणो मूर्द्धन्वत्या वि
रूप उभावां भरद्वाज ऐंद्राग्नीं त्रिष्टुभमयंते देवश्रवादेववातश्चभा
रतावाग्नेयीमनुष्टुभमयमिहवामदेवोजगतीमस्यप्रत्नामवत्सारोग

स. नु. व्या वाग्नेयीं वा पयोदेवत्या वा गायत्रीं तनूपाआग्नेयानींधाना सू. अ.
॥३३॥ आग्नेयीं महापंक्तिस्त्र्यवसाना ॥१२॥ चित्रावसोरात्रिदेवत्यमृषयो १
पश्यन्त्संत्वमाग्नेयमंधस्थरेवतीः सꣳहितेति त्रीणि गव्यान्युप
त्वाग्नेयं तृचं गायत्रं मधुछंदा वैश्वामित्रोग्नेत्वं चतस्रो द्विपदा
आग्नेयीर्बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुरेकैकश इडेकाम्यागव्ये सो
मानं ब्रह्मणस्पत्यं तृचं गायत्रं ब्रह्मणस्पतिर्मेधातिथिर्वामहित्री ॥३३॥
णाꣳसत्यधृतिर्वारुणिरादित्यदैवतं तृचं गायत्रं पथि स्वस्त्ययनं

कदाचनैंद्रीं पथ्याबृहतीं मधुच्छंदास्तत्सवितुर्विश्वामित्रः सावित्रीं
गायत्री परिते वामदेवआग्नेयीमनिरुक्तां गायत्रीं ॥१३॥ क्षुल्लको
पस्थानमासुरेरार्षम् भूर्भुवः स्वः प्रवत्स्यदुपस्थानमागतोपस्थानं
चादित्यस्यार्षं नर्यगार्हपत्यःशꣳ स्याहवनीयोथर्वदक्षिणाग्निराग
न्माहवनीयोनुष्टुबयमग्निर्न्यंकुसारिणीबृहती गार्हपत्योयमग्निर
न्वाहार्यपचनोनुष्टुब्गृहामा त्रिष्टुब्विराड्रूपा येषामानुष्टुबुपहूता
महापंक्तिर्व्यवसानास्तिस्रोपिवास्तवीः शंयुर्बार्हस्पत्यः ॥ १४ ॥

चातुर्मास्यानि प्रजापतेरार्षम् प्रघासिनोमारुती गायत्री यद्ग्राम सू. अ.
मारुत्यनुष्टुबनिरुक्ता मोषूणोगस्त्यऐंद्रामारुतीं विराजमकेनननि १
रक्ताग्नेय्यनुष्टुबवभृथयज्ञदैवतं पूर्णादर्विद्वे औणवाभऐंद्रयवनुष्टु
भावक्षंद्वे गोतमऐंद्र्यौ पंक्ती मनोनुमानसं तृचं बंधुर्गायत्रं वय६
सौमीं गायत्रीं बंधुरेष ते द्वे रौद्रे अवरुद्र६रौद्रयावेकापंक्तिरपरा
ककुप् त्र्यंबकं द्वे अनुष्टुभौ पूर्वस्या वसिष्ठएतस्तारपंक्तिस्त्र्यायुषं ॥३४॥
नारायणउष्णिहं यजमानाशीर्ष६शिवोनाम क्षौरं निवर्त्तयामि

लिंगोक्तदैवतमाशीःप्रायम् ॥ १५ ॥ इति० संहितायातृतीयोऽ
ध्यायः ॥ अग्निष्टोमःप्रजापतेरार्षम् एदंद्वे अत्यष्टीत्यवसाने आ
द्यावर्द्धर्चौ देवयजनदेवत्याविमाआपओषधे कुशतरुणꣳस्वधिते
क्षौरमापोऽअस्मानापंदीक्षातपसोर्वासोमहीना नवनीतं वृत्रस्या
जनं चित्पतिर्द्वे प्राजापत्ये देवोमा सावित्रमावोदैव्यनुष्टुबासीस्वा
हायज्ञं चतुर्णां यज्ञआकूत्यै चतुर्णांमौद्गृभणानामग्निरापोदेवी
लिंगोक्तदेवताविराट् ॥ १६ ॥ विश्वोदेवस्य स्वस्त्यात्रेयः सावित्री

 मनुष्टुभमृक्सामयोः कृष्णाजिने शर्मासि कृष्णाजिनमूर्गस्यागिरो
 भिर्दृष्टंमैखलꣳसोमस्यनीर्विष्णोर्वासइंद्रस्य सुसस्याः कृष्णविषा
णोच्छ्रयस्वदंडोव्रतंयज्ञोदैवींधीयेंदेवावाक्प्राणोदानौ चक्षुःश्रोत्र
मध्यात्ममग्निर्मित्रावरुणावादित्योविश्वेदेवा अधिदैवतꣳधात्रा
आपोजगतीयंतेलोष्टमपोमूत्रंपृथिव्या लोष्टमग्नेत्वमाग्नेय्यनुष्टुप्पु
नर्मन आग्नेयं त्वमग्ने वत्सआग्नेयीं गायत्रीछंदास्वेयत्सौम्यमे
षातेहिरण्याज्यदैवतं जूरसिवाग्दैवतꣳशुक्रमसिहिरण्यं चिदसि

गौः सोमक्रयणी वाग्रूपाध्यारोपकल्पनया ॥ १७ ॥ वस्व्यस्यनुष्टु
प्बृहतीसोमक्रयण्यास्तुतिरदित्या आज्यमस्मेषण्णां लिंगोक्ता
देवताः समख्येपत्न्याशीरास्तारपंक्तिरेषतेलिंगोक्तदेवतमास्माको
सिसौम्यमभित्यꣳसावित्र्यष्टिः प्रजाभ्यस्त्वाप्रजास्त्वा शुक्रंत्वा
सौम्यानि सग्मेस्मेलिंगोक्तेतपसोर्ध्वंजार्द्धंसोमोमित्रोन इंद्रस्य सौ
म्येस्वानादीनिधिष्ण्यानामानिपारिमाग्नेयीपुरस्ताद्बृहती प्रतिपंथा
मनुष्टुप्पथिदेवत्यादित्याः कृष्णाजिनमदित्यै सौम्यमस्तभ्नात्रि

स. नु. ष्टुभौवारुण्यौ सूर्यस्यानुष्टुप्कृष्णाजिनमुस्रावूर्ध्वबृहत्यानडुही भ सू. अ.
॥३६॥ द्रोमेसौम्यं नमोमित्रस्याभितपनः सूर्यः सौरीं जगतीं वरुणस्य २
पंचवारुणानि याते सौमीत्रिष्टुभंगौतमः ॥ १८ ॥ इति०संहिता
याचतुर्थोऽध्यायः ॥ अग्नेस्तनूरसिपंच वैष्णवान्यग्नेः शकलं वृष
णादर्भतरुणैकेउर्वश्यासित्रयाणां लिंगोक्ता देवता गायत्रेण त्रीण्या
ग्नेयानि भवतंनः पंक्तीरग्नावग्निर्विराडेतयोर्निर्मथ्याहवनीयाव ॥३६॥
ग्नीदेवते आपतये वायव्यमनाधृष्टमाज्यमग्नेव्रतपा आग्नेमयहृश्

र६शुःप्रकृतिश्चतुरवसानासौम्यंत्योर्द्धचौं लिंगोक्तदैवतोयातेत्री
ण्याग्नेयानि तप्तायनीचत्वारि पार्थिवानि विदेदाग्नेयमग्नेअंगिरो
स्यामनुत्वालिंगोक्तानिसिंहासि त्रयाणां वेदिरिंद्रघोषश्चतुर्णामु
त्तरवेदिरिदमहमापञ्चसिंहासि पंचाना वाग्भूतेभ्यः स्रुग्ध्रुवोसि
परिधयस्त्रयाणामग्नेःसंभारागुल्गुल्वादयः ॥ १९ ॥ युञ्जतेश्यावा
श्वः सावित्रीं जगतीमिदंविष्णुर्मेधातिथिर्वैष्णवीं गायत्रीमिराव
तीवसिष्ठस्त्रिष्टुभंदेवश्रुतावक्षधुरौप्राचीस्वंगोष्ठमत्रहविर्द्धानेविष्णो

स. नु. नुतिस्रोवैष्णव्यस्त्रिष्टुभआद्ये द्वे यजुरंते विष्णोर्नुप्रद्दीर्घतमा सू. अ.
॥३७॥ ओतथ्यो विष्णोरराटंपंच वैष्णवान्याददेग्निरिदमहꣳरक्षोघ्नं बृह २
न्नौपर्वाणीदमहंपंच लिंगोक्तानि स्वराडस्यौपर्वाणि चत्वारि रक्षो
हणोवः सप्त वैष्णवानि यवोसि यवोदिवेत्वौदुंबरीशुंधंतां पित्र्ये
उद्दिवं पंचानामौदुंबरी घृतेनद्यावापृथिव्यामिंद्रस्यैंद्रं परित्वा मधु
च्छंदा अनिरुक्तामैंद्रीमनुष्टुभमिंद्रस्यैंद्राणि त्रीणि चतुर्थवैश्वदे
वम् ॥ २० ॥ विभूरस्यष्टानां धिष्ण्याअग्नयः संम्राडाहवनीयः ॥३७॥

परिषद्योबहिष्पवमानदेशोनभोसि चात्वालोमृष्टोसि शामित्रक्ष
तधामौदुंबरीसमुद्रोसि ब्रह्मासनमजोसि शालाद्वार्योहिरासिम्राज
हितोवागसिसदक्षतस्य द्वार्येअध्वनाꣳसूर्योमित्रस्यार्त्विजोग्नयो
धिष्ण्याः ॥ २१ ॥ ज्योतिरसिवैश्वदेवं त्वꣳसोमक्रतुर्भार्गवःसौमीं
गायत्रीमनवसानां जुषाणो अष्टुदेवत्यैकपदाविराड्यजुरंताग्नेन
यागस्त्य आग्नेयीं त्रिष्टुभमयन्नास्त्रिष्टुब्यजुरंताग्नेयीउरुविष्णोवै
ष्णव्यनुष्टुब्यजुरंता देवसवितः सावित्रमेतत्त्वꣳसौम्यꣳस्वाहा नि

स. नु॰ लिंगोक्तदेवतामग्नेव्रतपा आग्नेयमत्यन्यान्वनस्पतिरोषधेकुशत सू. अ.
॥३८॥ रुणꣳस्वधितेपरशुर्द्यांमातस्त्वंवनस्पतिः ॥ २२ ॥ इति॰ संहिता २
यांपंचमोऽध्यायः ॥ अग्रेणीः शकलं देवस्त्वासूपः सुपिप्पलाभ्य
श्च बालं द्यामग्रेणयूपोयाते दीर्घतमासूपदेवत्या त्रिष्टुभं ब्रह्मदꣳह
सूपदेवत्ये विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौगायत्र्यौ परि
वीर्यूपोदिवस्वरुरेषते यूपउपावीस्तृणमुपदेवा लिंगोक्तमृतस्यत्वा ॥३८॥
पशुरग्नीषोमाभ्यां लिंगोक्तमब्द्योपां पशुरापोदेवीरापꣳसंते पशुर्घृ

तेन स्वरुशासौरेवतीवाग्वर्षौतृणꣳस्वाहादैवे ॥ २३ ॥ माहिर्भूर
ज्जुर्नमस्ते यज्ञोदेवीरापोर्द्धमापमर्द्धमाशीर्वाचंते मनस्तेपशु शं
लिंगोक्तमोषधेतृणꣳस्वधिते सीरक्षसांलिंगोक्तं निरस्तमिदमहꣳ
रक्षोहणीघृतेनद्यावापृथिव्यंवायोवायव्यमग्निराज्यस्याग्नेयꣳस्वा
हाकृतेवपाश्रपण्याविदमापआपीमहापंक्तिस्त्र्यवनसानापावमान
श्चांत्यःपादःसंते हृदयꣳरेडासिवसाग्रयुतं लिंगोक्तं घृतं वैश्वदेवं दि
शः पंचदिश्यान्यैंद्रः प्राणः पश्वंगः प्राणदानं लिंगोक्तंदेवत्वाष्ट्री

अ. नु. त्रिष्टुप् ॥ २४ ॥ समुद्रंलिंगोक्तानि द्वादश दिवंतेस्वरुर्मापोहृदय सू. अ.
३९॥ शूलंधाम्नोवारुणं सदाहुर्वारुणी गायत्र्यनवसाना सुमित्रियान २
आपऋहविष्मतीर्लिंगोक्तदेवतानुष्टुबग्नेर्वश्चत्वासार्पाग्न्यमूरापीं गा
यत्रीं मेधातिथिर्हृदेत्वा सौम्यनुष्टुप् सोमराजन्त्सौम्येशृणोतु
लिंगोक्तदेवतात्रिष्टुब्देवीरापऽआपीपंक्तिः कार्षिराज्यमनुष्टुप्सम
द्रस्य समाप आपो ऽस्यमग्नेमधुच्छंदाआग्नेयीं गायत्रीमाददेग्रावा ॥३९॥
निग्राभ्याआपामिंद्रायत्वा पंचसौम्यानि यत्तेसौमी विपरीता बृह

ती श्वात्राः पथ्याबृहती माभेः सौम्यमर्द्धंद्यावापृथिव्यमर्द्धंप्राग
पाक्सौम्युष्णिक् त्वमंगगोतमऐंद्रीं पथ्याबृहतीम् ॥ २५ ॥ इति॰
संहितायांषष्ठोऽध्यायः ॥ वाचस्पतयेप्राणदेवत्याविराट् मधुमती
लिंगोक्तं यत्ते सौम्यꣳस्वाहोरुयजुषीलिंगोक्ते स्वाङ्कृतोस्युपाꣳ
शुर्देवेभ्यस्त्वा दैवं देवाꣳशोलिंगोक्तमाभिचारिकं प्राणायाग्रहो
व्यानायउपाꣳशुसवननउपयामगृहीतोस्यंतरैंद्रमंतस्ते मघवदेव
त्यात्रिष्टुबुदानायग्रह आवायो वसिष्ठोवायव्यां त्रिष्टुभमिंद्रवायू

स. नु. मधुछंदा ऐंद्रवायवींगायत्रीमयंवागृत्समदोमैत्रावरुणीᳯरायाव सू. अ.
॥४०॥ यं त्रसदस्युस्त्रिष्टुभं यावां मेधातिथिराश्विनीं गायत्रीं तंप्रत्नथा २
वत्सारःकाश्यपोवैश्वदेवीं जगतीमच्छिन्नस्यसौम्यᳯसाप्रथमैंद्री
त्रिष्टुप्तृपंत्वयाऽग्नीलिंगोक्ते ॥ २६ ॥ अयंवेनोवेनस्य त्रिष्टुप्सो
मस्तुतिरधिदैवतमधियज्ञं च मनोनात्रिष्टुप्सोमस्तुतिरधियज्ञानु
वादिन्यपमृष्टः शंडोपमृष्टोमर्कआभिचारिके देवास्त्वा शुक्रामं ॥४०॥
थिनावनाधृष्टासिदक्षिणोत्तरवेदिश्रोण्योसुवीरः सुप्रजाः शुक्रामं

थिनौ निरस्तोद्बे आभिचारिके शुक्रस्य मंथिनः शकलं येदेवासः
परुच्छेपोवैश्वदेवीं त्रिष्टुभमरग्रयणोसिलिंगोक्तदैवतम् ॥ २७ ॥
सोमः पवते वैश्वदेवमिंद्रायत्वा पंच लिंगोक्तानि मूर्द्धानं भर
द्वाजोवैश्वानरीं त्रिष्टुभं ध्रुवोसिध्रुवोध्रुवं ध्रुवेण बृहती पूर्वोर्द्धर्चौ
ध्रौवउत्तरऐंद्रोयस्ते देवश्रवाः सौमीं त्रिष्टुभं यजुरंता देवानां चा
त्वालदैवतं प्राणायमे लिंगोक्तदेवतान्येकादश कोसिप्राजापत्यो
षिणग्वर्द्धमानामधवेत्वा लिंगोक्तदेवतानि त्रयोदश ॥ २८ ॥ इंद्रा

स. नु. ॥४१॥

ग्नीं विश्वामित्रऐंद्राग्नीं गायत्री माघत्रिशोकआग्नेंद्रीमोमासोमधु सू. अ. २
च्छंदा वैश्वदेवीं विश्वेदेवा सोगृत्समदइंद्रमरुत्वश्चतस्रोविश्वामि
त्रऐन्द्रामारुतीस्त्रिष्टुभोमरुतात्वासजुर्मरुत्वतीयंमहाँ इंद्रोभरद्वा
जोमाहेंद्रीत्रिष्टुभयं ओजसा वत्सोगायत्रीमुदुत्यंप्रस्कण्वः सौरीं
गायत्री चित्रं कुत्स आंगिरसस्त्रिष्टुभ६रूपेणवोदक्षिणाश्चतुर्णां
ब्राह्मणमद्य लिंगोक्तदेवतान्यष्टौ ॥ २९ ॥ इति० संहितायांसप्त ॥४१॥
मोऽध्यायः ॥ विष्णोर्वैष्णवं कदाचनादित्यदेवत्येबृहत्यौ यज्ञो

देवानां कुत्सस्त्रिष्टुभं विवस्वन्यजुः श्रदस्मै जगत्याशीर्वाममद्य
भरद्वाजोबार्हस्पत्यः सावित्रींत्रिष्टुभꣳसावित्रोसिसावित्रꣳसुशर्मा
सि वैश्वदेवं बृहस्पतिसुतस्य लिंगोक्तमहंप्रजापतिरूपेणाऽऽत्मा
देवतात्रिष्टुबग्नाँ ३ इपत्नीवन्नाग्नेयं प्रजापतिः प्राजापत्यꣳहरिर
स्यृक्सामेहर्योर्यस्तेलिंगोक्तेदेवकृतस्याऽऽग्नेयानिषट् ॥ ३० ॥ स
मिन्द्रात्रिर्वैश्वदेवीं त्रिष्टुभं धातालिंगोक्तबहुदेवत्यासुगावोदेवी
याँ२ आवहोवयमाग्नेऽस्यौयज्ञयज्ञमेपतेलिंगोक्तेयजुषीउरुꣳहिशु

नःशेपोवारुणीं त्रिष्टुभं नमोवारुणमग्नेरनीकमाग्नेयी त्रिष्टुप् समु
द्रेते सौमी विराड्देवीरापःपंक्तिबृहती वा पूर्वोऽर्द्धर्चआपउत्तरः
सौम्योदेवानामाग्नेयमेजतु त्र्यवसानामहापंक्तिर्यस्यैते वशापुरु
दस्मोगर्भोमरुतोयस्य गोतमोमारुतीं गायत्रीं महीद्यौर्मेधाति
थिर्द्यावापृथिव्यामित्यग्निष्टोमः ॥ ३१ ॥ अथषोडश्यातिष्ठगोतम
ऐन्द्रीमनुष्टुभं सुक्ष्वाहि मधुच्छंदा इंद्रमिद्गोतमोयस्मान्नैंद्री त्रि
ष्टुप्परब्रह्मरूपेण षोडशिनस्तुरिंद्रश्चैंद्रावारुणी षोडशिदेवत्या

वायजुरंताग्नेपवस्व वैखानस आग्नेयीं गायत्रीमुत्तिष्ठन्कुरुस्तुतिरै
न्द्रीमदृश्रं प्रस्कण्वः सौरीं तिस्रोपियजुरन्ताउदुत्यं देवानामार्ष
माजिघ्रेडेकौसुरूबिंदुर्गव्ये महापंक्तिप्रस्तारपंक्ती विनःशासोभा
रद्वाजऐन्द्रीमनुष्टुभं वाचस्पतिं वैश्वकर्मणीं त्रिष्टुभं विश्वकर्मन्नै
न्द्रीवैश्वकर्मण्यग्नयेत्वा देवार्षण्यदाभ्यदेवत्यानि त्रेशीनांत्वा सौ
म्यानि ॥ ३२ ॥ सत्रोत्थानं देवानामार्षमिहरतिः पशुदैवतमुप
सृजन्नुष्णिगाग्नेयी सत्रस्य बृहती यजमानानामात्मस्तुवियुवंतं

स. नु. परुछेपऐंद्रीमत्यष्टिंत्र्यवसानामाद्योर्द्धर्चऐंद्रापार्वतः परमेष्ठीनै सू. अ.
॥४३॥ मित्तिकान्याध्यायाद्वसिष्ठस्यार्षं लिंगोक्तदेवतानि चतुस्त्रिंशद्य २
योर्वैष्णववारुणीं त्रिष्टुब्देवादिवमार्शीर्लिंगोक्तदेवताश्चतुस्त्रिंश
द्धर्मदेवत्यापंक्तिस्त्रिष्टुब्वायज्ञस्य यज्ञदेवत्या त्रिष्टुबापवस्व सौमीं
गायत्रीं नैध्रुविः कश्यपः ॥ ३३ ॥ इति० संहितायांअष्टमोऽध्या
यः ॥ अथवाजपेयोबृहस्पतेरार्षम् इंद्रस्य च देवसवितः सावित्री
त्रिष्टुप् ध्रुवसदमैंद्राणित्रीण्यपाङ्सदेवत्यानुष्टुब्ग्रहालिंगोक्तदेव ॥४३॥

तानुष्टुप्संपृचौ यजुषीन्द्रस्य रथोवाजस्य पार्थिव्यतिजगत्यंत्यः
पादःसावित्रोऽप्स्वन्तरश्वदेवत्यानवसानापुरउष्णिग्वातोवाति
स्त्रोऽश्वस्तुतयउष्णिकृत्रिष्टुब्जगत्योवाजिनोऽश्वादेवस्याहं लिंगोक्ता
नि वाजिनोऽश्वाएषस्य द्वे दधिक्रावावामदेव्योक्तदेवत्ये जगत्यौ
शन्नोवसिष्ठोविराजंतेनोनाभानेदिष्ठोजगतीं वाजेवाजे वसिष्ठस्त्रि
ष्टुभमामाप्राजापत्यांवाजिनोक्ताः ॥ ३४ ॥ आपयआयुर्यज्ञेन
प्राजापत्यानि प्रजापतेः स्वरमृतायजमानोस्मेदिशोनमः पृथि

स. नु. वीयमासंदीयंतासुन्वन्वाजस्य प्राजापत्यं तृचं त्रैष्टुभꣳसोमं तृ सू. अ.
॥४४॥ चंतापसऽआद्या वैश्वदेव्यनिरुक्तानुष्टुब्द्वितीया लिंगोक्तदेवता २
तृतीयाऽऽग्नेयीप्रनोलिंगोक्ता गायत्री सरस्वत्यैसुन्वन्नग्निःसप्तदश
लिंगोक्तदेवतानि ॥ ३५ ॥ अथराजसूयोवरुणस्यार्षम् एषते पार्थि
वमग्निनेत्रेभ्योदेवार्षाण्याध्यायाद्दशाद्यानि दैवान्यग्नेसहस्व देव
श्रवादेववातश्च भारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्रीणि रक्षोघ्नानि ॥४४॥
सविताद्वेयजमानः ॥ ३६ ॥ इति॰ संहितायानवमोऽध्यायः ॥

आपोदेवाआपीत्रिष्टुप् वृषणऊर्म्मिर्लिंगोक्तानि मधुमतीरनाधृष्टा
आपसोमस्य चर्मा्ग्नयेर्लिंगोक्तान्यनिभृष्टमापङ्सधमादोवारुणी
त्रिष्टुप् क्षरस्य चतुर्णांतार्प्यपांड्वाधीवासोष्णीषाणींद्रस्य धनुर्म्मि
त्रस्य बाहूत्वयायंधनुर्द्दबाषणामिषवआविः प्राजापत्यंपराणि लिं
गोक्तानि ॥ ३७ ॥ अवेष्टामृत्युनाशनं प्राचीं पंचानां यजमानः
प्रत्यस्तमासुरं मृत्योरोजोसिरुक्मोहिरण्यरूपौमैत्रावरुणीत्रिष्टु
ब्यजुरन्तासोमस्यसुन्वन्प्रपर्वतस्यापीत्रिष्टुब्विष्णोस्त्रीणिलिंगो

क्तानि सुन्वन्प्रजापतेन प्राजापत्यात्रिष्टुब्यजुंमध्योयममुष्यजू
रुद्रयद्रौद्रं ॥ ३८ ॥ इंद्रस्यालिंगोक्तानि माते संवरणः प्राजापत्य
ऐंद्रीत्रिष्टुभममग्नये लिंगोक्तानि पृथिविमातर्भूमिर्हंसोवामदेवः
सौरी ॐसप्रपंचपरब्रह्माभिधायिनीमतिजगतीमियच्छतमानावू
र्गासिशाखेन्द्रस्य बाहूस्योनास्यासंदीक्षत्रस्याधीवासंस्योनांसु
न्वान्निषसाद शुनःशेपोवारुणीं गायत्रीमाभिभूरस्यक्षायजमानो
वाब्रह्मॐस्त्वमामंत्रणानि पंच लिंगोक्तानींद्रस्य स्फ्योग्निःपृथुरा

ग्नेयॐस्वाहा कृताअक्षाः सवित्रालिंगोक्तदैवतम् ॥३९॥ अथचरक
सौत्रामण्यश्विनोरार्षम् अश्विभ्यां त्रीणि लिंगोक्तानि वायुः सौमी
गायत्री कुवितृचꣳसुकीर्तिः काक्षीवतआद्या सौम्यनिरुक्ता त्रिष्टु
ब्युवमनुष्टुप्पुत्रमिवत्रिष्टुबश्विसरस्वतींद्रदेवत्येअश्विसरस्वतींद्रदेव
त्ये ॥ ४० ॥ इति० संहितायांदशमोऽध्यायः ॥ इतिसर्वानुक्रम
णिकायाम्प्रथमोऽध्यायः ॥ १ ॥ अथाग्निंप्रजापतिरपश्यत् साध्या
वापश्यन्त्सोग्निःपंचचितिकः प्रथमाचितिः प्रजापतेर्द्वितीया दे

स. नु. वानांतृतीयेंद्राग्न्योर्विश्वकर्मणश्चतुर्य्यूर्षीणां पंचमीपरमेष्ठिनोऽथ
॥४६॥ प्रतिकर्मदर्शिनो युञ्जानोष्टौसावित्राणिसवितापश्यदाद्यातृतीया सू. अ.
चानुष्टुप्चतुर्थीषष्ठ्यौजगत्यौ द्वितीयागायत्रीपंचमीत्रिष्टुबिमंनो २
यजुरंतागायत्र्यनवसानाददेभ्रिर्हस्तेनुष्टुब्व्यजुरंता ॥ १ ॥ प्रतू
र्तंनाभानेदिष्ठः आश्वीमास्तारपंक्तिर्युजाथांकुश्रिर्गार्दभीं गायत्रीं
योगेयोगेशुनः शेपआजींप्रतूर्वंस्त्रिष्टुब्विराड्रूपायजुर्गर्भोरुयजुःपृ ॥४६॥
थिव्यास्त्रीण्याग्नेयान्यन्वग्निराग्नेयीं त्रिष्टुभं पुरोधसआगत्य मयो

भुव आश्वीनमनुष्टुभमाक्रम्याऽनुष्टुप् द्यौस्तेबृहत्युत्क्रामविराडुद
क्रमीत्रिष्टुबात्वाद्वे गृत्समदआग्नेय्यौपरिसोमकोगायत्रीं परित्वा
पायुरनुष्टुभंत्वमग्नेगृत्समदोजगतीम् ॥ २ ॥ पृथिव्याआग्नेयं अपां
पुष्करपर्ण्णꣳस्वराट्पंक्तिःशर्मद्वेअनुष्टुभौकृष्णाजिनपुष्करपर्ण्णे पु
रीष्योग्निस्त्वामग्नेतृचंभारद्वाजआग्नेयं गायत्रꣳसीदहोतर्देवश्रवा
देववातश्च त्रिष्टुभं निहोतागृत्समदः सꣳसीदस्वप्रस्कण्वोबृहतीम्
॥ ३ ॥ अपोदेवीः सिंधुद्वीपआपीन्यंकुसारिणीꣳसंतेत्रिष्टुप्पार्थि

स. नु. वोद्धौवायव्योर्द्धः सुजातोनुष्टुबाग्नेय्युदुतिष्ठविश्वमनाः पथ्याबृह सू. अ.
॥४७॥ तीमूर्द्धःकण्वउपरिष्टाद्बृहतीठं सजातस्त्रितस्त्रिष्टुभष्ट् स्थिरोरासभे २
य्यनुष्टुबुष्णिग्वाशिवोभवाजीपथ्या बृहती प्रैतुलिंगोक्तमहापंक्ति
स्त्र्यवसानाग्नेगायत्र्येकपदाग्नेय्यतमग्निमाग्नेये ओषधयस्त्रिष्टुबनु
ष्टुभावोषधिदेवत्येव्यस्यन्नाग्नेयोर्द्धर्चौविपाजसोत्कीलः कात्यआ
ग्नेयीं त्रिष्टुभम् ॥ ४ ॥ आपोह्यापष्ट्सिंधुद्वीपस्तृचंगायत्रंमित्रउप ॥४७॥
रिष्टाद्बृहतीमैत्रीरुद्रा अनुष्टुब्रौद्रीसष्ट्सृष्टां द्वे सिनीवालीदेवत्ये

उखामादित्यामखस्य मृत्पिंडोवसवस्त्वा लिंगोक्तानि सर्वत्रादि
त्यैरास्नादितिरौषंकृत्वायादित्योष्णिगदितिरावटंदेवानां पंचौखा
नि मित्रस्य विश्वामित्रोमैत्रीं देवस्त्वा सावित्री बृहत्युत्थायपूर्वो
र्द्धचंऔपउत्तरोमैत्रः ॥ ५ ॥ आकूतिं लिंगोक्तान्यौद्भमणानि मा
स्वौख्यौगायत्री त्रिष्टुभावग्निश्च पादाआग्नेयोद्वंनः सोमाहुतिरा
ग्नेयीं गायत्रीं परस्याविरूपऽआंगिरसः परमस्याऽआरुणिरनुष्टु
भं यदग्ने द्वे जमदग्निरहरहर्नाभानेदिष्ठस्त्रिष्टुभौ याःसेना अनुष्टुभः

स. नु. सर्वाआग्नेय्योंत्योपरिष्टाद्बृहती ॥ इति० संहितायां एकादशोऽध्याय सू. अ.
॥४८॥ यः ॥ ६ ॥ इशानोवत्सप्री त्रिष्टुभं॑ंरौक्मींनक्कोषासा कुत्सऽआ २
ग्नेयीं विश्वाश्यावाश्वःसावित्रीं जगतीं॑ंसुपर्ण्णःकृतिश्चतुरवसाना
गारुत्मी विषघ्नी विष्णोर्लिंगोक्तान्यक्रंदद्वत्सप्रीराग्नेयीं त्रिष्टुभम
ग्नऊर्ध्वबृहत्यग्ने महाबृहतीपुनर्गायत्र्यावात्वाध्रुवोनुष्टुभमुदुत्त
मं॑ंशुनःशेपोवारुणींत्रिष्टुभमग्रेत्रितआग्नेयीं॑ंहं॑ंसउक्ता जगती ॥४८॥
ह यजुरन्तांतेबृहद्यजुः सीदत्वमाग्नेयी त्रिष्टुभमंतरग्नेनुष्टुभौ ॥७॥

दिवस्पर्य्याग्नेयंत्रैष्टुभंद्वादशर्चैवत्सप्रीभर्भालंदनः समिधाग्निं विरू
पाक्षआंगिरस आग्नेयं गायत्रमुदुत्वातापसोनुष्टुभं प्रेदनुष्टुप्प्रप्राय
माग्नेयीं वसिष्ठस्य त्रिष्टुभमापोदेवीराप्यप्स्वग्ने विरूपऽआग्नेयीं
गायत्रीगर्भोअसितिस्रोनुष्टुभोबोधामे दीर्घतमास्त्रिष्टुभꣳसबोधि
सोमाहुतिराग्नेयीं यजुरंतां गायत्रीं यजुर्वैश्वकर्म्मणं पुनस्त्वात्रि
ष्टुबाग्नेयी ॥८॥ अपेतालिंगोक्तबहुदेवत्या संज्ञानमूषदैवत्यमग्नेःसि
कताश्वितः परिश्रितोयꣳसः पंचर्चमाग्नेयं त्रैष्टुभं विश्वामित्रश्चतु

र्थ्यनुष्टुबयंतेनुष्टुप्त्विदैष्टकेलोकंलिंगोक्तानुष्टुप्ताअस्यापींद्रियमे
धऐंद्रइंद्रंजेतामाधुच्छंदसऐंद्रीᳫं समितञ्चतस्रोद्याग्निदेवत्याउष्णि
गुपरिष्टाद्बृहत्युष्णिकपंक्तयोमातेवोरवास्तुतिस्त्रिष्टुप् ॥ ९ ॥ असु
न्वंतं नैर्ऋतं तृचं त्रैष्टुभं यंतेयजमानदेवत्यानमोविद्भूतिदेवत्ये
कपदा निवेशन आग्नेयीं त्रिष्टुभं विश्वावसुर्देवगंधर्वः सीराद्वे सी
रदेवत्येबुधः सौम्योगायत्री त्रिष्टुभौशुनंचतस्रःसीतादेवत्याः कु
मारहारितोद्वे त्रिष्टुभौ तृतीयापंक्तिश्चतुर्थ्यनुष्टुब्विमुच्यध्वमान

डुहीगायत्री सजूलिंगोक्तदेवतम् ॥ १० ॥ याऽओषधीः सप्तविꣳ
शतिरनुष्टुभऽओषधिस्तुतिमाथर्वणोभिषङ्मुंचंतुबंधुर्द्वादशानार
भ्याधीतामामाहिरण्यगर्भः कार्यींत्रिष्टुभमभ्यावर्त्तस्वोष्णिगाग्ने
य्यग्नेयद्गायत्रीयं त्रिष्टुबग्नेतवपावकोग्निराग्नेयꣳषड्टृचंप्रथमेविष्टा
रपंक्तिस्तिस्रः सतोबृहत्यउपरिष्टाज्ज्योतिः षष्ठ्याप्यायस्वगोतमः
सौम्योगायत्री त्रिष्टुबुष्णिह आतेवत्सारस्तुभ्यंताद्वेविरूपस्तिस्रो
गायत्र्यआग्नेय्यः ॥ ११ ॥ इति० संहितायाद्वादशोऽध्यायः ॥

मयिककुबाग्नेयी ब्रह्मादित्यदेवत्यात्रिष्टुब्भिरण्यगर्भः कार्यीत्रिष्टु
भं द्रप्सोदेवश्रवाआदित्योनमोस्तुसार्प्पंतृचमानुष्टुभंकृणुष्वपंच
प्रतिसराराक्षोघ्नादेवानामार्षंसर्वास्त्रिष्टुभआग्नेयीर्वामदेवश्चापरुय
दग्नेष्वायजुराग्नेयामिंद्रस्यैंद्रंभुवस्त्रिशिराआग्नेयींत्रिष्टुभं ॥ १२ ॥
ध्रुवास्यूर्ध्वबृहतीप्रजापतिरनुष्टुप्भूरसिप्रस्तारपंक्तिरसा॑स्वयमा
तृणादेवताविश्वस्माइत्येतस्य च सजुषः कांडात्कांडादानुष्टुभंद्व्यृ
चमग्निनादृष्टंदूर्वेष्टकादैवतंयास्तआग्नेयं द्व्यृचमानुष्टुभमिन्द्राग्नि

भ्या दृष्टं विराडयंलोकःस्वराडसौलोकःप्रजापतिर्ष्टाविश्वज्योतिषं
मधुश्चर्तुर्देवतमषाढासिसवितापश्यद्देवावापश्यंनिष्टकादैवतं
॥ १३ ॥ मधुव्वाताःवैश्वदेवंतृचंगायत्रंगोतमोपांगंभन्पंक्तिस्त्रीन्तसमु
द्रास्त्रिष्टुप्कौर्म्यं द्व्यृचं ध्रुवासित्रिष्टुबिषबृहत्यौरवंद्व्यृचमग्नेसुक्ष्वा
ग्नेयंद्व्यृचं गायत्रमाद्यायां भरद्वाजोद्वितीयस्यां विरूपःसम्यक्त्रि
ष्टुब्लिंगोक्तदेवतचैत्वाबृहत्याग्निज्योंतिषोष्णिगादित्यंगर्भं पंचर्च्च
माग्नेयं त्रैष्टुभमिमंमापंचर्च्चमाग्नेयं त्रैष्टुभमेवद्वेद्वेचातेयज्ञुषीत्वंय

विष्ठोशनाः काव्यआग्नेयीमनिरुक्तांगायत्रीमपात्वाविꣳशतिरैष्ट
कान्ययंपुरः पंचाशत्प्राणभृद्देवत्यानि लोकंताइंद्रं तिस्रः प्रतीको
क्ता एवꣳसर्वत्र ॥ १४ ॥ इति॰ संहितायांत्रयोदशोऽध्यायः ॥
अथद्वितीयाचितिः ॥ ध्रुवक्षितिःपंचाश्विन्यस्तासा प्रथमाविराड्वृत
स्त्रात्रिष्टुभोयजुरंताः शुक्रश्चर्तव्यꣳसजूःपंच विश्वेषा देवानामार्षं
ता एव देवताः प्राणंमे पंच वायव्यान्यपःपंचायानिमूर्द्धावय ए
कोनविꣳशतिर्लिंगोक्तदेवतानि ॥ १५ ॥ अथतृतीयेंद्राग्नीअनुष्टुप्

पूर्वोर्द्धर्च्चऐंद्राग्न उत्तरः स्वयमातृणादेवतोविश्वकर्मावायव्यꣳरा
ज्ञ्यसि पंचदिग्देवत्यानि विश्वकर्मावायव्यं नभश्चेषश्चर्तव्येआयुर्मे
दश लिंगोक्तदेवतानि माच्छंदश्चषट्त्रिꣳशन्मूर्द्धानुष्टुब्यंत्रीपरोष्णि
क्चतुर्दशयजूꣳषि प्राणदेवत्यानि ॥ १६ ॥ अथचतुर्थ्यांशुरष्टाद
शाग्नेर्दशैकया सप्तदशसर्वाणि लिंगोक्तदेवतानि सहश्चर्तव्यम् ॥
॥ १७ ॥ इति० संहितायांचतुर्दशोऽध्यायः ॥ अथपंचम्यग्नेजा
तानाग्नेय्यौत्रिष्टुभौषोडशीचतुश्चत्वारिꣳशल्लिंगोक्ते अग्नेस्त्रिष्टुप्ए

वश्चत्वारिंशद्ग्रश्मिनैकान्नत्रिंशद्राड्यसि पंचायंपुरःपंचैतानिस
र्वाणि लिंगोक्तदेवतानि ॥ १८ ॥ अग्निर्मूर्द्धाग्नेयोनुवाकः प्रथमस्यृ
चोगायत्रोद्वितीयस्त्रैष्टुभौभुवस्तृतीयोजागतोऽयमिहचतुर्थआनु
ष्टुभः सखायःसं पंचमः प्रगाथएनावस्तत्रपूर्वा बृहती सतोबृहत्यु
त्तराताभ्यां तिस्रोबृहत्यः संपादिताः षष्ठऔष्णिहोग्नेवाजस्य गो
तमः सप्तमः पुनः ककुभः प्रगाथोभद्रोनस्तत्रपूर्वाककुप्सतोबृह
त्युत्तराभ्या तिस्रः ककुभः संपादिता अष्टमः पाक्तोग्निंतंपदपां

क्रोनवमोग्नेतमग्निꣳहोतारतिछंदाग्ध्यवसानाग्नेत्वंद्वैपदस्तृचः ॥
॥ १९ ॥ अयमग्निर्विरूपोबोधिबुधगविष्ठिरोजनस्य सुतंभरःसखाय
इषःसꣳसमित्संवननस्त्वांप्रस्कण्व एनावोवासिष्ठोग्नेवाजस्यगोत
मोभद्रोनः सौभरिरग्निंतंकुमारवृषौ येनाष्टावाग्नेय्यः पङ्क्त्रिष्टुभोद्वे
अनुष्टुभौ तदश्वर्तव्यंपरमेष्ठी सौरंप्रोथदश्वोवासिष्ठस्त्रिष्टुभमाग्ने
यीमायोर्द्वेस्वयमातृणदेवत्ये सहस्रस्यपंचाग्नेयानि ॥ २० ॥ इति०
संहितायांपंचदशोऽध्यायः ॥ रौद्रोध्यायः परमेष्ठिन आर्षं देवाना

वाप्रजापतेर्वाद्योनुवाकः षोडशर्च्च एकरुद्रदेवत्यः प्रथमागायत्री तिस्रोनुष्टुभस्तिस्रःपंक्तयः सप्तानुष्टुभोद्वेजगत्यौमानोद्वेकुत्सः ॥२१॥ अंत्यानुवाकेसप्तैकरुद्रस्तुतिः आद्योपरिष्टाद्बृहती द्वितीया जगती कुत्सस्य तृतीयानुष्टुब्द्वे त्रिष्टुभौद्वे अनुष्टुभावसंख्याता बहुरुद्रदेवत्यादशानुष्टुभोमंत्रा अवतानसंज्ञकास्ततोंत्यानित्रीणियजूंषि बहुरुद्रदेवत्यानि प्रत्यवरोहसंज्ञकामंत्राः ॥ २२ ॥ मध्ये सर्वाणियजूंषि हिरण्यबाहवइति तिस्रोशीतयोरुद्राणा तेषामु

भयतोनमस्कारा अन्येऽन्यतरतोनमस्कारा अपरेजातानामरु
द्राःसभाभ्यइत्यादयोनमोवः किरिकेभ्यइत्यग्निवायुसूर्यहृदयभू
ताः पंचव्याहृतयोबहुरुद्रदेवत्या ॥ २३ ॥ इति०संहितायाषो
डशोऽध्यायः ॥ अश्मन्मारुतमश्मँꣳस्तेश्मामय्याशीर्य्यंद्विष्म
आभिचारिकामिमामआग्नेयमृतवोबृहतीपंक्तिर्वा समुद्रस्यद्वे गा
यत्र्यावुपज्मं जगती त्रिष्टुब्वाऽपामिदं बृहत्यग्नेपावकसूयवः
सनोमेधातिथिरेआग्नेय्यौगायत्र्यौ पावकया जगतीं भरद्वाजो

नमस्ते बृहतीमाग्नेयीमृषिसुतालोपामुद्रा ॥ २४ ॥ नृषदे पं
चाग्नेयानि येदेवा जगत्यौ प्राणदेवत्ये प्राणदा बृहतीपंक्तिर्वाऽऽ
ग्नेय्याग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजोयइमा वैश्वकर्म्मणी
स्त्रिष्टुभोविश्वकर्माभौवनः ॥ २५ ॥ आशुरैंद्रीद्वादश त्रिष्टुभोप्र
तिरथोवसृष्टानुष्टुबिषुदेवत्याप्रतयोद्धृनृत्स्तौत्यनुष्टुबसौयामारुती
त्रिष्टुब्यत्रलिंगोक्तदेवता पंक्तिर्मर्म्माणि लिंगोक्तैवत्रिष्टुबुदेनंतिस्रो
नुष्टुभआद्याग्नेयीर्द्वितीयैंद्री तृतीया लिंगोक्तदेवता पंचादिशः पंच

यज्ञाग्निसाधनवादिन्यऽआद्येद्वे त्रिष्टुभौ तृतीया पंक्तिर्बृहती वा
चतुर्थीबृहत्येवांत्यात्रिष्टुब्विमानोद्वे आदित्यदेवत्ये आद्या विश्वा
वसोर्द्वितीयाप्रतिरथस्यदेवहूर्विधृतिरनुष्टुब्यज्ञदेवत्या वाजस्यैंद्र्य
नुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव ॥२६॥ क्रमध्वंपंचाग्नेय्यः आद्यानुष्टुप्
ततस्त्रिष्टुप्ततो बृहतीपिपीलिकमध्याततोनुष्टुप्त्रिष्टुबंत्याग्नेसह
स्राक्षविराडाग्नेयीसुपर्णोद्वेपंक्तित्रिष्टुभौता ॐसवितुःसावित्रीं त्रि
ष्टुभं पुरस्ताज्ज्योतिषं कण्वोददर्श विधेमाग्नेयीं गृत्समदस्त्रिष्टुभम

स. नु. स्यात्त्रिस्थानोग्निर्देवता प्रेद्धोविराडाग्नेयी वसिष्ठस्य चित्तिं वैश्व सू. अ.

॥५५॥ कर्मण्यतिजगती सप्तत आग्नेयीत्रिष्टुप्सप्तऽऋषीणाम् ॥ २७ ॥ शु २

क्रज्योतिः षण्मारुत्यः आद्या चतुर्थीचोष्णिग्द्वितीयातृतीयाचगा
यत्री पंचमीजगती षष्ठीगायत्र्युष्णिग्वैंद्रं दैवीर्मारुतमिमंत्रयोद
शर्च्चआग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वावसोर्द्धाराभि
वादिनी वा घृतंमिमिक्षेगृत्समदः समुद्राद्वामदेवश्चत्वारिशृङ्गा
यज्ञपुरुषदेवत्यऋषभोमंत्रः ॥ २८ ॥ इति० संहितायांसप्तदशोऽ ॥५५॥

ध्याय: ॥ वाजश्चमेदेवानामार्षम् एतैर्यजुर्भिर्यजमानोग्नेः कामा
न्याचते वाजप्रसवीयंऽसप्तर्चं विश्वेत्रैष्टुभं वैश्वदेवं लुशोधानाको
वाजोनस्तिस्रोन्नदेवत्या आद्यानुष्टुब्द्वे त्रिष्टुभौ संमाविराजावा
ग्नेय्यो सरस्वत्यै लिंगोक्तदेवतम् ॥ २९ ॥ ऋताषाड्गंधर्वाप्सरस:
सन: प्राजापत्या प्रस्तारपंक्ति: समुद्रोसि वायव्यानि त्रीणि रुच
माग्नेय्यनुष्टुप्ता वारुणीं त्रिष्टुभंऽशुन:शेप: स्वर्णाग्नेयानि पंचाग्निं
सुनज्म्याग्नेय्यास्तिस्र आद्येद्वे त्रिष्टुभौपंक्तिस्तृतीयादिवोद्वेआग्ने

स्यौ परोष्णिङ्महापदपंक्ती इष्टोयज्ञोद्व्यृचं यजमानाग्निदेवत्यं
गालवआद्योष्णिग्द्वितीयागायत्री ॥ ३० ॥ सदाकूतादष्टर्चमाग्ने
यम् विश्वकर्म्मणस्तृतीया दैवीवाद्याजगती तिस्रस्त्रिष्टुभश्चतस्रो
नुष्टुभोग्निरस्म्यश्यद्वैतवादिनीं त्रिष्टुभं देवश्रवादेववातश्च भारता
वृचोयजुर्यैंअग्नेयोनुष्टुबाग्नेयी ॥ ३१ ॥ वार्त्रहत्याय सप्तर्चमिन्द्रो
पश्यत् आद्येद्वे वार्त्रघ्न्यौ गायत्री त्रिष्टुभौ विश्वामित्रस्य चवि
नोनुष्टुम्मृगोनात्रिष्टुप्प्रथमाॐशासो भारद्वाजोद्वितीयां जयऐंद्रो

द्वैश्वानय्यौं गायत्री त्रिष्टुभौ पृष्टोदिवि कुत्सस्य चाऽऽयामद्वे
त्रिष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्य च वयंते कात्य
स्योत्कीलस्य च धामच्छदनुष्टुब्वैश्वदेवी ॥ ३२ ॥ इति० संहिता
यांअष्टादशोऽध्यायः ॥ अथ सौत्रामणी प्रजापतेरार्षम् अश्विनोः
सरस्वत्याश्च स्वाद्वींत्वानुष्टुप्सुरासोमदेवत्या सोमोसि चत्वारि
सौराणि परितोभारद्वाजः सौमीं बृहतीं वायोस्तृचोगायत्रः सौ
म्यआभूतेर्ब्रह्मक्षत्रं त्रिष्टुप्सुरासोमदेवत्या नानाहि जगती सुरा

सोमदेवत्या तेजोसि पयोदेवत्यान्योजोसि सुरादेवत्यानि याव्या
ग्रꣳहैमवर्च्चैरनुष्टुब्विषूचिकास्तुतिर्यदापिपेषाग्नेयी बृहती सम्पृच
स्थ पयोग्रहाविप्रचस्थ सुराग्रहादेवायज्ञंब्राह्मणानुवाकोविꣳश
तिरनुष्टुभःसोमसंपत् ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभं अश्विसरस्व
तींद्रदेवत्यं पितृभ्यः सप्त पित्र्याणि पुनन्तुमा नवर्च्चं पावमान
माद्येद्वे पित्र्येअनुष्टुभौ प्रजापतिस्तृतीया वैखानसआग्नेयीं गा
यत्रीं चतुर्थींलिंगोक्तदेवतानुष्टुप्पंचम्याग्नेयीगायत्री षष्ठ्याग्नेयी ॥५७॥

ब्राह्मी च गायत्री ब्राह्मयस्तृतीयःपादसौमीसावित्र्यष्टमी नवमी
त्रिष्टुब्वैश्वदेवी येसमानाअनुष्टुभौपित्र्याद्या द्वितीया यजमाना
शीर्द्वेसृती त्रिष्टुब्देवपानापितॄणाणौपंथानौब्रवीतीदꣳहविस्त्र्यवसा
नाष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरता त्रयोदशर्चैपैत्र्यं त्रैष्टुभꣳ
शंखएकादशी तु जगत्याच्याजानुदशर्चौनुवाकोनवपित्र्यादश
म्यैन्द्रीगायत्री तृतीया चतुर्थी नवम्योनुष्टुभास्त्रिष्टुभइतरा: सोमो
राजाष्टर्चंमाश्विसरस्वतीन्द्राऽ अपश्यन्नाद्यास्तिस्रोमहाबृहत्यउपा

स. नु. त्याचचतुर्थ्यन्ते अतिजगत्यौ शेषेअतिशक्वर्य्यौत्र्यवसाने सीसे सू. अ.
॥५८॥ नतंत्रमश्विसरस्वतींद्रदेवत्याः षोडशजगत्यः ॥ ३५ ॥ इति०संहि २
तायांएकोनविंशोऽध्यायः ॥ क्षत्रस्ययोनिर्द्विपदागायत्री आस
न्दीदेवताकामात्वाकृष्णाजिनं मृत्योरुक्मावश्विनोर्भैषज्येन लिं
गोक्तदेवतानि त्रीणि कोसिप्राजापत्या गायत्री शिरोमे पंचर्च
मिन्द्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यामहापंक्तिस्त्र्यवसा ॥५८॥
नानुष्टुभौत्याःप्रतिक्षत्रे वैश्वदेवं त्रयादेवा दैवीपंक्तिस्त्र्यवसाना

प्रथमाद्द्वितीयैर्वैश्वदेवमाशीर्लिंगं लोमान्यनुष्टुब्लिंगोक्तदेवता ॥
॥ ३६ ॥ यद्देवास्तिस्रोग्निवायुसूर्यदेवत्या अनुष्टुभः कूष्माण्डीर्य
द्ग्रामे लिंगोक्तदेवतꣳससूद्रेते द्विपदा विराडापीद्रुपदादिवानुष्टुबा
प्युद्वयꣳसौर्य्यनुष्टुप्प्रस्कण्वस्यापोऽआद्याग्नेयी पंक्तिरेधोसिसमिद्दे
वत्ये यजुषी समाववर्त्यनिरुक्ता गायत्री वैश्वानरज्योतिर्यजुर
भ्यादध्याग्नेयं तृचमानुष्टुभमाश्वतराश्विरꣳशुनासौर्य्यनुष्टुप्सिंचं
तिपरिसौर्यैन्द्रीचानुष्टुब्धानावंतमैन्द्रीगायत्रीविश्वामित्रस्य च बृह

स. नु. ॥५९॥

दिंद्राय बृहती नृमेधपुरुषमेधयोरध्वर्योगायत्री ॥३७॥ योभूताना

मात्मप्रवादापंक्तिर्नारायणीयाकौंडिन्यस्य प्राणपामे द्वे अनुष्टुबुप

रिष्टाद्बृहत्यौ लिंगोक्तदेवते समिद्धइंद्र एकादशाप्रीस्त्रिष्टुभआंगिर

सइध्मस्तनूनपान्नराशंसइडोबर्हिर्द्वारउषासानक्ता दैव्याहोता

रा तिस्रोदेवीस्त्वष्टा वनस्पतिः स्वाहाकृतयइत्येताआप्रीदेवता

आयातु सप्तत्रिष्टुभऐन्द्र्यआमन्द्रैर्बृहत्या यातु वामदेवस्त्रातारं ग

र्गं आमन्द्रैर्विश्वामित्रएवेद्वसिष्ठः ॥३८॥ अथहोत्रं त्रिपशोः

सू. अ. २ ॥५९॥

समिद्धोअग्निराप्रीर्द्वादशविदर्भिरश्विसरस्वतीन्द्र देवत्या अनुष्टुभो
श्विनाहविस्तिस्रोनुष्टुभएकैकाश्विसरस्वतींद्र देवत्यायइंद्रसवितृव
रुणदेवत्यास्तिस्रोऽनुष्टुभोविश्वनागोभिस्तिस्रोनुष्टुभो सुवंपुत्रमि
वानुष्टुप्त्रिष्टुभौ यस्मिन्नश्वास आग्नेय्यौ जगतीत्रिष्टुभावश्विनाते
जसैकादशर्चंछशस्त्रंगोमदूत्समदस्तृचमाश्विनं गायत्रं पावकानो
मधुच्छंदाः सारस्वतमिंद्रायाहीद्रंमधुच्छंदाएवानुक्तमानुष्टुभम
श्विसरस्वतींद्रदेवत्यम् ॥ ३९ ॥ इति॰संहितायांविंशोऽध्यायः ॥

स. नु.

॥६०॥

इमंमेगायत्रीत्रिष्टुभौवारुण्यौशुनःशेपः त्वन्नस्त्रिष्टुभावाग्निवारु
ण्यौवामदेवोमहीमूषुत्रिष्टुबादित्यासुत्रामाणंगयःप्लातः सुनावत्रौ
स्वर्ग्यागायत्र्यानोमैत्रावरुणींगायत्रींविश्वामित्रः प्रबाहवावसिष्ठ
स्त्रिष्टुभं६ समिद्धोअग्निरेकादशाप्रमानुष्टुभं६स्वस्त्यात्रेयस्यार्षं व
योधाइंद्रोदेवता वसंतेनऋतुना षडृचामानुष्टुभंलिंगोक्तदेवतं६होता
यक्षद्द्वादशाप्रैषाः प्रैषाअश्विसरस्वतींद्रदेवत्या अश्विनौछागस्यस
र्लिंगोक्तदेवताः प्रैषावनस्पतिमभियूपोग्निं०स्विष्टकृदग्निर्देवंब

सू. अ.

२

॥६०॥

हिरैकादशानुयाजप्रैषाआश्विसरस्वतीन्द्रदेवत्याऽ अग्निमद्यसूक्त
वाकप्रैषोलिंगोक्तदेवतोलिंगोक्तदेवतः ॥ ४० ॥ इति०संहितायां
एकविंशोऽध्यायः ॥इतिसर्वानुक्रमणिकायांद्वितीयोध्यायः ॥ २॥
ॐ अथाश्वमेधश्चतुरोध्यायान्प्रजापतिरपश्यत् तेजोसिसौवर्णं
निष्कमिमामगृभ्णन्संवत्सरो यज्ञपुरुषास्त्रिष्टुभममभिधालिंगोक्ता
नि योअर्वन्तंगायत्र्यर्द्धेनाश्वस्तुतिःपरोर्द्धेलिंगोक्तोग्नयेलिंगोक्ता
न्येव हिंकारायेत्यश्वस्यैकान्नपंचाशच्चेष्टितानि हिरण्यपाणिंपंच

स. नु. ॥६१॥

र्चं६सावित्रं गायत्रमाद्या मेधातिथिराग्निं स्तोमेनाग्नेयंतृचंगाय सू. अ.
त्रं६सुतंभरोविश्वामित्रोविरूपोयथासंख्यमजीजनोहिपावमानीं ३
कृतिंपिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसदस्यूर्विभूरश्वदैवतं देवा
दैवमिहरंतिराग्नेयानि चत्वारिकायौद्गृभणानिलिंगोक्तान्याब्रह्म
लिंगोक्तान्येवाध्यायात् ॥१॥ इति० संहितायांद्वाविंशोऽध्यायः ॥
प्रजापतयेप्राजापत्यम् यस्ते देवं यःप्राणतस्त्रिष्टुप्कायी हिरण्य
गर्भस्य युंजन्तिमधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्या ॥६१॥

श्वस्तुतिर्यद्वातोबृहतीमौ वसवस्त्वालिंगोक्तानिलाजी २ नश्वदेव
त्यंकःस्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्येहोतुब्रह्मणश्चवा
युञ्जा लिंगोक्तानि सक्ष्शितास्तिस्रोऽश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभो
स्निःपशुराश्वानि त्रीण्यंबेनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारिलिंगो
क्तानि॥३॥ उत्सक्थ्यागायत्र्याश्वी एकादशर्चमानुष्टुभं द्वितीया
तूपरिष्टाद्बृहत्यध्वर्य्वादीनां कुमार्य्यादिभिरश्लीलभाषणं ताएव
देवता दधिक्राव्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभमाश्वीं

गायत्रीॐषडृचमाश्वमुष्णिगाद्याश्चतस्रोनुष्टुभौंत्यात्रिष्टुप्कस्त्वा
षडृचमाश्वमाद्यागायत्रीपंचानुष्टुभः कःस्विदष्टादशर्चं ब्रह्मोद्यं
होत्रादीनां प्रश्नप्रतिप्रश्नभूतमाद्याश्चतस्रोनुष्टुभः कास्विदाद्याश्चत
स्रश्चांत्यादशत्रिष्टुभः सुभूरनुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजाप
त्यः प्रैषः प्रजापतेर्हिरण्यगर्भः प्राजापत्यांत्रैष्टुभं ॥४॥ इति॰संहि
तायांत्रयोविंशोऽध्यायः ॥ अश्वस्तूपरइत्यादयः पशवोध्यायेनो
क्ता देवतावापर्यंग्यास्तथारोहितादयोगुणयुक्ता आरण्याश्च कपिं

जलादय आध्यायाच्छादंदद्भिरित्यादित्वगित्येतदंतं द्रव्यदैवतमु
क्तम् अश्वस्तूपरोब्राह्मणोध्यायः ॥४॥ इति०संहितायांचतुर्विंशोऽ
ध्यायः ॥ शादंदद्भिस्त्वचांतश्चजुंबकायवारुणीं द्विपदां मुंडिभओ
दन्यएषा चाघनाशन्यंतर्ज्जले यस्येमे कार्य्यौत्रिष्टुभौ हिरण्यग
र्भः प्राजापत्यआनोदशर्च्चं जागतं वैश्वदेवं गोतमः स्वस्तिनोविराट्
स्थाना भद्रंकर्णेभिस्तृचं त्रैष्टुभं मानोश्वस्तोमीयंदीर्घतमास्त्रैष्टुभं
द्वाविंशत्यृचमश्वस्तुतिस्तृतीयाषष्ठ्यौ जगत्याविमानुद्वैपदं वै

श्वदेवं तृचं भौवनआप्त्योवासाधनभौवनोवा ॥ ५ ॥ इति॰संहि
तायांपञ्चविंशोऽध्यायः ॥ अग्निश्चसप्तलिंगोक्तानि प्रियोदेवाना
लौगाक्षिरनुष्टुभमनवसानां बृहस्पतेगृत्समदोब्राह्मीं त्रिष्टुभमिंद्र
गोमन्नैंद्र्यौगायत्र्यौरम्याक्षिर्ऋतावानं प्रादुराक्षिर्वैश्वानरीयां वै
श्वानरस्य त्रिष्टुभं कुत्सोग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौ
महाँ २ ऽइंद्रो माहेंद्रीवसिष्ठस्त्वं ऐंद्रींपथ्याबृहतींनोधागोतमो ॥६३॥
यद्वाहिष्ठं वसुयवआग्नेयीमनुष्टुभमेहिभरद्वाजोगायत्रीमृतवस्ते

बृहतीत्युपह्वरेवत्सो गायत्रीं ॥६॥ उच्चाते गायत्रं तृचꣳसोम्यमाम
हीयवोनुवीरैर्मुद्गलोयज्ञपुरुषस्त्रिष्टुभमग्नेपत्नीर्मेधातिथिराग्नेयीं
गायत्रीमभियज्ञं द्व्यृचमृतुदैवतं मेधातिथिस्तवायमैंद्रींत्रिष्टुभंवि
श्वामित्रोमेवनोजगतीं गृत्समदःस्वादिष्ठया मधुच्छंदाः सौम्या
वनुक्तानांगायत्रम् ॥ ७ ॥ इति॰संहितायांषड्विंशोऽध्यायः ॥
समास्त्वाग्नेकोध्यायः प्रजापतेरार्षꣳसामिधेन्यो नवाग्नेय्यस्त्रिष्टु
भोग्निनादृष्टा अग्निर्ऋषिः कर्मांगभूतमग्निꣳस्तौत्यूर्द्ध्वांद्वादशर्च

माप्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यदग्निर्हि
प्रजापतित्वेन संस्तूयते तेन प्राजापत्यम् ॥ ८ ॥ पीवोअन्ना द्वे
वायव्ये त्रिष्टुभौवसिष्ठः आपोहद्वे प्राजापत्ये हिरण्यगर्भः प्राजा
पत्यः प्रयाभिर्द्वे वायव्ये वसिष्ठोनियुत्वान्वायव्याः षड्वायोशु
क्रोनुष्टुबेकयाच त्रिष्टुबंत्यागायत्र्यो नियुत्वाचायोपेगृत्समदोवा
योशुक्रः पुरुमीढाजमीढौ तववायोव्यश्वआङ्गिरसोभित्वा वसि
ष्ठऐंद्रंप्रगाथं प्रथमाबृहती द्वितीयासतोबृहती त्वामिदेवङ्शंयुर्बा

र्हस्पत्यः कयानऐंद्रं तृचं गायत्रं वामदेवोऽत्यातु पादनिचृद्यज्ञा
ऊर्जोनपातङ्शंयुः पाहिनोगर्भः प्रागाथएतं तृचं प्रागाथमाग्नेयं
द्वेबृहत्यौ तृतीयासतोबृहती संवत्सरोस्याग्नेयम् ॥ ९ ॥ इति०
संहितायासप्तविंशोऽध्यायः ॥ इंद्रामिडःसौत्रामणिकोध्यायः ए
कादशप्रयाजप्रैषाऐंद्रा आप्रीदेवत्या आद्येनुवाके देवंबर्हिरनुया
जप्रैषाऐंद्राएकादशैवाग्निमद्यैन्द्रः सूक्तवाकप्रैषस्त्वामद्य प्रतीक
उभयत्रापि समिधानंमहद्वायो धसआप्रियएकादशप्रयाजप्रैर

वास्तथैव देवंबर्हिरनुयाजप्रैरवा अग्निमद्यवायोधसः सूक्तवाकप्रै
षः ॥ १० ॥ इति० संहितायांअष्टाविंशोऽध्यायः ॥ समिद्धोअ
ञ्जनाश्वमेधिकोध्यायः आद्या आप्रीस्त्रिष्टुभएकादशाश्वस्तुतिर्बृ
हदुक्थोवामदेव्योददर्शाश्वोवासामुद्रिर्य्यदक्रंदस्त्रयोदशाश्वस्तुति
स्त्रिष्टुभोभार्गवोजमदग्निर्ददर्शदीर्घतमाश्च समिद्धोऽअद्यद्वादशा
प्रीस्त्रिष्टुभोजमदग्निः ॥ ११ ॥ केतुंकृण्वन्नाग्नेयीमनिरुक्तां गाय
त्रीं मधुच्छन्दाःजीमूतस्येव पायुर्भारद्वाजःसंग्रामांगान्यृक्षौस्तौ

पीत्सन्नाहंकार्मुकंगुणमार्त्नीतूणं जगत्यर्द्धेनसारथिमर्द्धेनरश्मीन्
हरीन् रथगोपायितॄन् जगत्यालिंगोक्तदेवता द्वाभ्यां त्रिष्टुबनु
ष्टुब्भ्यामिषुमनुष्टुभाकशां ततोहस्तघ्नं ततस्तृचौ रथदुंदुभिदेव
त्यावैंद्रोर्द्धचौत्यः सर्वास्त्रिष्टुभोनुक्ताआग्नेय्यः कृष्णग्रीवइत्याद्या
एकादशिन्योर्द्वयोः पशुदेवता अग्नयेगायत्रायेति दशहविषोवे
ष्टेर्देवता ॥ १२ ॥ इति० संहितायाएकोनत्रिंशोऽध्यायः ॥ देवस
वितुर्द्वावध्यायौ पुरुषमेधोनारायणः पुरुषोददर्श विश्वानिदेव

गायत्री॑सावित्री॑इयावाश्वोविभक्तारंमेधातिथिर्ब्रह्मणेब्राह्मण
मिति द्वे कंडिके तपसेनुवाकश्च ब्राह्मणम् ॥ १३ ॥ इति॰ संहिता
यांत्रिंशोऽध्याय: ॥ सहस्रशीर्षाषोडशर्च्चमानुष्टुभं त्रिष्टुबंत्यंपुरुषो
जगद्बीजमन्त्रदेवताद्दभ्य:षड्डचउत्तरनारायणोमंत्र आद्यास्तिस्र
स्त्रिष्टुभो द्वे अनुष्टुभावंत्यात्रिष्टुप् ॥ १४ ॥ इति॰ संहितायांएक
त्रिंशोऽध्याय: ॥ तदेवसर्वमेधोध्याय: आत्मदैवत: सप्तमेहनि सर्व
होमे विनियुक्त: सर्वमेधं ब्रह्म स्वयंभ्वैक्षत तदीयं मंत्रगणं प्रवा

युमच्छेत्येतस्मादाद्येद्वे अनुष्टुभौ नतस्य द्विपदागायत्री हिरण्य
गर्भश्चतस्त्रोमामाहिंसीद्यस्मान्नद्वे एताः प्रतीकचोदिता ब्रह्मय
ज्ञेध्येयाः सर्वत्रैवमेषोह चतस्त्रस्त्रिष्टुभ आपोहयश्चित्प्रतीकचो
दिते ॥ १५ ॥ वेनस्तत्पंचत्रिष्टुभः सदसस्पतिं तृचेन मेधाकामो
मेधा याचते प्रथमा गायत्री लिंगोक्तदेवता द्वितीयाग्नेय्यनुष्टुप्
तृतीयालिंगोक्तदेवतानुष्टुबिदंमे मात्रवर्णिक्यनुष्टुबेतयादेवेभ्यःश्री
कामोयाचते श्रियम् ॥१६॥ इति॰ संहितायाद्वात्रिंशोऽध्यायः ॥

अस्याजरासः सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमेहनि पुरोरुच
आग्नेय्य आद्ये द्वे ऐंद्रवायवस्यास्याजरासोवत्सप्रीर्हरयोधूमकेत
वो विरूपोयजमानोद्वे मैत्रावरुणस्य यजमानोगोतमोद्वे विरूपे
शुक्रस्य कुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणे त्रीणिशता विश्वा
मित्रऐंद्राग्नस्याग्निर्वृत्राणि भरद्वाजो वैश्वदेवस्य विश्वेभिःसोम्यं
मेधातिथिरायन्मरुत्वतीययोर्द्वे आयत्पराशरः शाक्त्योऽग्नेशर्द्धा
त्रिदुहिताविश्ववारा त्वाॐहि भरद्वाजस्त्वे अग्नेद्वे बृहत्यावादि

त्यस्य त्वे अग्ने वसिष्ठः श्रुधिप्रस्कण्व आदित्यग्रहग्रहणे विश्वेषा
मदितिर्वामदेवोगोतमो महोअग्नेः सावित्रस्य लुशोधानाकोऽनु
त्कगायत्रंत्रैष्टुभम् ॥ १७ ॥ इन्द्रस्तुत्युक्थ्येद्वितीयेहनि ऐंद्यः पु
रोरुचोद्वादशप्रतीकचोदिते च द्वे तिस्रश्चापश्चिद्वसिष्ठो गावउप
पुरुमीढाजमीढौ यदद्य वसिष्ठआसुते सुनीतिरातिष्ठतं विश्वामि
त्रः प्रवः सुचीकोबृहन्नित्रिशोकइंद्रेहि मधुच्छंदा इंद्रोवृत्रविश्वामि
त्रः कुतस्त्वमगस्त्य आतद्यौरिवीति शाक्त्यइमान्ते कुत्सोजग

 तीमनुक्तं गायत्रं त्रैष्टुभं ॥ १८ ॥ सूर्यस्तुत्युक्थ्येतृतीयेहनि सौ
 र्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ता विभ्राड्बृहज्जगतीं विभ्रा
ट्सौर्यं उदुत्यं तिस्रः प्रस्कण्व आनोगस्त्यो यदद्य श्रुतकक्षःसुतं
कक्षौ तरणिःप्रस्कण्वस्तत्सूर्य्यस्य द्वे कुत्सोबण्महाँ २ द्वे जमदग्नि
र्बृहती सतोबृहत्यौ श्रायंतइव नृमेधोबृहतीमत्यद्यादेवाः कुत्स
आङ्कृष्णेन हिरण्यस्तूप आङ्गिरसोनाख्यातꣳसौर्यं गायत्रं त्रैष्टुभं
॥ १९ ॥ वैश्वदेवस्तुतिचतुर्थेहनि वैश्वदेव्यः पुरोरुचएकादश षट्

च प्रतीकोक्ताः प्रवावृजे वसिष्ठस्त्रिष्टुभं इंद्रवायूबृहस्पतिंद्वे मेधा
तिथिरधिनः कुसीदीकाण्वोग्नइन्द्रप्रतिक्षत्रइन्द्राग्नीमित्रावरुणा
जगतीं काश्यपो वत्सारोऽस्मेरुद्राः प्रगाथोर्वांचोअद्यकूर्म्मोंगा
र्त्समदोविश्वेअद्य लुशाधानाकोविश्वेदेवाः सुहोत्रोदेवेभ्योहि वा
मदेवोजगतीमनुक्तं गायत्रं त्रैष्टुभम् ॥ २० ॥ अथाऽनारभ्याधी
तंमंत्रगणं अर्वांकिपतृमेधादादित्य याज्ञवल्क्यौ ददृशतुः प्रवायुं
पंचदशर्च्चः पुरोरुग्गणोद्वे च प्रतीकोक्ते प्रवायुमृजिश्वोमित्रःहुवे

द्वे मधुच्छन्दामित्रं लिंगोक्तादस्राद्युवाकव आश्विनीं विदद्यद्यैन्द्रीं
कुशिको नहिस्पशं विश्वामित्रोवैश्वानरींमुग्रावि घनिनैन्द्राग्नीं
भरद्वाज उपास्मै सौमीं देवलोसितोवा येत्वा विश्वामित्रो जनि
ष्ठाउग्रोगौरिवीतिरातु वामदेवस्तृचमैन्द्रं त्वमिंद्रैद्योनृमेधःप
थ्याबृहतीसतोबृहत्यौ यज्ञोदेवानां कुत्सोदब्धेभिः सावित्रीं ज
गतीं भरद्वाजः ॥ २१ ॥ प्रवीरयापंचदशर्च्चः पुरोरुग्गणाः द्वे च
प्रतीकोक्ते प्रवीरया वसिष्ठोवायव्यां काव्ययोराजानेषु दक्षस्तिर

श्रीनः परमेष्ठीं प्रजापतिर्भाववृत्तं तृचमारोदसीं जगतीं विश्वा
मित्रउक्थेभिर्वृत्रहंतमावसिष्ठ उपनः सुहोत्रोवैश्वदेवीं ब्रह्माणि
मेगस्त्योद्वे इंद्रमरुत्संवादेतादिदाथर्वणोबृहद्दिव इमाउत्वा द्वे बृह
त्यौमेधातिथिरयं सहस्रं मेधातिथिः सतोबृहतीं ॥ २२ ॥ आन
स्त्रयोदशर्चः पुरोरुग्गणः चतुर्ऋचं प्रतीकचोदितं चानोवायव्यां
जमदग्निरिन्द्रवायूसुसन्दृशैंद्रवायव्या तापसऋधगित्थामैत्राव
रुणीं जमदग्निरायातमाश्विनीं वसिष्ठः प्रैतुवैश्वदेवीं कण्वश्चन्द्रमा

अप्स्वैन्द्रीमाहुतीपरिणामवादिनीं त्रितआस्योदेवंदेवंवो मनुर्वैव
स्वतोवैश्वदेवीं दिविपृष्ठोमृधएैन्द्रइन्द्राग्नीअपात्सुहोत्रोदेवासोहि
मनुरपाधमद्वेनृमेधोस्येन्मेधातिथिर्दशम्येकादश्यंत्याचसतोबृह
त्यः शेषाबृहत्यः शेषाबृहत्यः ॥ २३ ॥ इति० संहितायात्रय
स्त्रिंशोऽध्यायः ॥ इति० सर्वानुक्रमणिकायातृतीयोऽध्यायः ॥३॥
यज्जाग्रतः षडृचं मानसं त्रैष्टुभं६शिवसंकल्पः पितुन्नुष्णिहमग
स्त्योन्नस्तुतिमन्विच्चतुर्ऋचमानुष्टुभं द्वयोरनुमितिर्द्वयोः सिनी

वालीसरस्वत्यौ सिनीवालीपृथुष्टुके द्वे गृत्समदस्त्वमग्नेद्वे आग्नेय्यौ
जगत्यौ हिरण्यस्तूप आंगिरस उत्तानायांद्वे देवश्रवादेववातश्च
भारतावाद्यात्रिष्टुब्द्वितीयानुष्टुप्प्रमन्महेनोधाद्यचमैन्द्रं त्रैष्टुभमि
च्छन्तित्वा द्यचमैन्द्रंत्रैष्टुभमेव देवश्रवादेववातश्च भारतौ ॥ १ ॥
अषाढंयुत्सु गोतमः चतुर्ऋचं त्रैष्टुभं६सौम्यमष्टौव्यख्यच्चतु
र्ऋचं त्रैष्टुभं६सावित्रमांगिरसोहिरण्यस्तूपो द्वितीयाजगत्युभापि
बतमाश्विनं तृचमुभापिबतं प्रस्कण्वोगायत्रीमभ्रस्वतीमाश्विना

स. नु. त्रिष्टुभौ कुत्सआरात्रिपथ्याबृहतीं रात्रिदेवत्या कशिपाभर सू. अ
॥७३॥ द्वाजदुहितोषस्तदुषस्यापरोष्णिहं गोतमः प्रातरग्निं वसिष्ठः सप्त ४
चंमाद्याजगती बहुदेवत्या पंचभगदेवत्यास्त्रिष्टुभोंत्योषस्याः ॥
॥ २ ॥ पूषन्तवसुहोत्रः पथस्पथः परिपतिमृजिश्वैतेपौष्ण्यौ गाय
त्रीत्रिष्टुभौ त्रीणिपदावैष्णव्यौ गायत्र्यौ मेधातिथिर्घृतवती भुव
नाना भरद्वाजोद्यावापृथिव्यां जगतीं येनोलिंगोक्तदेवतां त्रिष्टु ॥७१
भं विहव्यआनासत्या हिरण्यस्तूप आश्विनीमेषवोमारुतीं त्रि

ष्टुभमगस्त्यः सहस्तोमा ऋषिसृष्टिप्रतिपादिका त्रिष्टुभं यज्ञःप्रा
जापत्य आयुष्यंवर्च्चस्यं तृचं दक्षउष्णिक्शक्करीत्रिष्टुभोहिरण्य
स्तुतिरुतनऋत्विजो बहुदेवत्यात्रिष्टुभमिमागिरः कूर्मोंगात्र्सेमद
आदित्य देवत्यांत्रिष्टुभक्सप्तऋषयोध्यात्मवादिनी जगत्युत्तिष्ठं
तृचोब्रह्मणस्पत्यआद्ये बृहत्यौ कण्वोघोरोंत्यांत्रिष्टुभं गृत्समदो
यइमा चतुर्ऋचं प्रतीकोक्तम् ॥ ३ ॥ इति० संहितायांचतुस्त्रिं
शोऽध्यायः ॥ अपेतोऽध्यायः पित्र्यआदित्यस्य देवाना वाद्या

गायत्री परं यजुःसवितातेे गायत्री वायुःपुनातु चत्वारि लिंगो
क्तानि सवितातें गायत्री परंमृत्यो संकसुकस्त्रिष्टुभं मृत्युदेवत्या
ॐशंवातोऽनुष्टुप्बृहत्यौ वैश्वदेव्यावश्मन्वतीसुचीकस्त्रिष्टुभं वैश्व
देवी मपाघंलिंगोक्तदेवतामनुष्टुभ८श्शुनःशेपोदुःष्वप्ननाशनीमन
ड्वाहमानडुह्यनुष्टुबिमंजीवेभ्यः संकसुकोमृत्युदेवत्यां त्रिष्टुभमा
युष्मानग्नआग्नेयीं त्रिष्टुभं वैखानसः परीमेनुष्टुभमैंद्रीं भारद्वा
जः शिरिंबिठः क्रव्यादमग्निं त्रिष्टुभमाग्नेयींदमनोवहवपाजात

वेदसी त्रिष्टुप् स्योनापृथिवी मेधातिथिः पार्थिवीं गायत्रीमस्मा
त्त्वमाग्नेयी गायत्र्यनिरुक्ता ॥ ४ ॥ इति० संहितायापञ्चत्रिंशोऽ
ध्यायः ॥ ऋचंवाचं पंचाध्यायीं दध्यङाथर्वणोददर्शाग्निकाश्वमे
धिकवर्ज्जमाद्योऽध्यायः शांत्यर्थोवैश्वदेव आद्यानि यजूꣳषि स
न्मे बार्हस्पत्या पंक्तिः कयात्वमैन्द्र्यनिरुक्ता गायत्रींद्रोविश्वस्य
विराड् द्विपदा शन्नोद्वे अनुष्टुभावहानि द्विपदागायत्री शन्नइन्द्रा
ग्नी त्रिष्टुब् गायत्र्यावंत्याशीर्द्यौः शातिर्यजूꣳषि नमस्ते अस्त्व

नुष्टुभौ तच्चक्षुः पुरउष्णिक्सौरी ॥ ५ ॥ इति० संहितायाषट्त्रिंशोऽ
ध्यायः ॥ आददेनारिरस्याभ्रिर्दैवतम् देवीद्यावापृथिव्यं देव्यो
वश्यो वल्मीकवपेयत्यग्नेवराहविहतमिंद्रस्यौजआदाराः प्रैतु म
खस्याश्वस्यर्ज्जवेषमायदेवस्त्वार्चिरसि घर्मदेवत्यानि योघर्मस
आदित्योयएषतपत्यनाधृष्टापुरस्तात्सप्तपार्थिवानि यजमानाशी
र्मधुप्राणदेवत्यानि गर्भोदेवानामवकाशा मामाहिꣳसीरित्येतदं
ताघर्मदेवत्या घर्तादिव ऊर्ध्वबृहत्यपश्यंगोपां त्रिष्टुभं दीर्घतमा

ह्दे त्वा परोष्णिक्त्वष्टेमन्तः पत्याशीरहःकेतुना यजुषी घर्मदेव
त्ये ॥ ६ ॥ इति० संहितायांसप्तत्रिंशोऽध्यायः ॥ आददेदित्यै
रज्जुः इडएहि गौर्यस्ते त्रिष्टुभं दीर्घतमा इन्द्राश्विना वैश्वदेवानि
समुद्रायत्वा वातनामानि स्वाहाघर्माय घर्मदेवत्ये विश्वाआ
शा आश्विन्यनुष्टुब् द्विविधा घर्मदेवत्यमश्विनाघर्ममुष्णिगपा
ता ककुबमेन्द्यस्मेस्वरः स्वाहापूष्णे सप्तलिंगोक्तदेवतानि स्वाहासं
पयोदेवत्यं मधुहुतं घर्म्मौभीमं गायत्री बृहत्यावनवसाने अति

शक्करी वाग्नेयी समस्तात्र्यवसाना याते घर्मक्षत्रस्य बृहती चतुः
स्रक्तिर्महाबृहती घर्मैतदनुष्टुबचिक्रदत्परोष्णिग्यावतीद्यावापृथि
वी दधिघर्मौ मयित्यत्पंक्तिर्यजमानाशीः पयसोरेतोगायत्र्यनव
साना त्विषःसंवृग्दधि घर्मौनुक्तंघर्मदैवतम् ॥ ७ ॥ इति० संहि
तायाअष्टत्रिंशोऽध्यायः ॥ स्वाहाप्राणेभ्यो मात्रवर्णिक्योदेवता
मनसःकाममनुष्टुब्यजमानाशीः श्रीर्देवता प्रजापतिःसंभ्रियमा
णो यथाकालं प्रायश्चित्तदेवताः सविताप्रथमेहन्त्यहं क्रमेणोग्रश्च

मारुती गायत्री विमुखाख्यो मंत्रोग्नौविनियुक्तस्तस्मादाग्निकऽ
एवास्य ऋषिः परमेष्ठी प्राजापत्योवाग्निꣳहृदयेनाशोधिकानि
त्रीणि तंत्रोक्त एव ऋषिर्लोमभ्यःस्वाहेति प्रायश्चित्ताहुतयो द्विच
त्वारिꣳशत् ॥ ८ ॥ इति० संहितायाएकोनचत्वारिंशोऽध्यायः ॥
ईशावास्यमात्मदेवत्य आनुष्टुभोध्यायः अनेजदेकं त्रिष्टुप् सपरि
जगती वायुरनिलं यजुषी ॐ ३ मिति परमाक्षरस्य योगिनामा
लम्बभूतस्य परस्त ब्रह्मणः प्रणवाख्यस्यास्थूलादिगुणयुक्तस्य ब्रह्म

ऋषिश्छंदोगायत्रं परमात्मा देवता ब्रह्मारंभे विरामे च यागहो
मादिषु शांतिपुष्टिकर्मसु चान्येष्वपिकाम्यनैमित्तिकादिषु सर्वेषु
विनियोगो ऽस्यकृतोत्रिभिर्य्यजुर्भिरंते यज्ञान्योगी स्मारयत्य
श्नेनयान्तनमस्कारोक्तिर्हिरण्मयेनादित्योपासनमो ३ मिति ना
मनिर्देशो ब्रह्मणः खंब्रह्मेत्याकाशरूपमन्ते ब्रह्म ध्यायेत् ॥ ९ ॥
अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सवितानुष्टुभः सो
मोबृहत्या बृहस्पतिः पंक्तेर्वरुणस्त्रिष्टुभइन्द्रोजगत्या विश्वेदेवा

विराजोमित्रः स्वराजोरुणोतिछन्दसः प्रजापतिर्विछन्दसो वायु
र्द्विपदायाः पुरुष एकपदा या ब्रह्मा सर्वांऋच आग्नेय्यः सर्वाणि
यजूꣳषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणा
नि च स्वाहाकारस्याग्निर्वषट्कारस्य विश्वेदेवाः कर्मारंभे मंत्राणां
देवता वेदितव्याः संन्यस्त मनसि देवतां ततोहविर्हूयते देवता
मविज्ञाय योजुहोति देवास्तस्य हविर्न जुषन्ते स्वाध्यायमपि
योऽधीते मंत्रदेवतज्ञः सोमुष्मिंल्लोके देवैरपीड्यते तस्माच्च देव

ता वेद्या मंत्रे मंत्रे प्रयत्नतोमंत्राणां देवताज्ञानान्मंत्रार्थमधिग
च्छति मंत्रार्थज्ञानात्तुविधूतपाप्मा नाकमभ्येति न हि कश्चिदवि
ज्ञाय याथातथ्येन देवताः श्रौतानां कर्मणा विप्रः स्मार्तानां चा
श्नुते फलम् ॥ १० ॥ अनादिष्टमध्वरादौ सर्वांतकर्माणि परिभाषि
तं मंत्रगणं वक्ष्यामः सर्वमाग्नेयं गायत्रं गौतमी यद्दसर्वद्दसावित्र
मौष्णिहं भारद्वाजीयद्दसर्वद्दसौम्यमानुष्टुभमाथर्वणिकद्दसर्वं बार्ह
स्पत्यं बार्हतमाङ्गिरसद्दसर्वं वारुणं पांक्तमालंबायनीयद्दसर्वमैंद्रं

त्रैष्टुभं याज्ञवल्कीयꣳसर्वमादित्यदैवतं जागतं कौत्सम् ॥ ११ ॥
ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामोदीक्षायां भृगुरग्नाविष्णूगा
यत्री प्रायणीय आंगिरसोदितिरुष्णिक्त्रयेविश्वामित्रः सोमोनु
ष्टुबातिथ्ये वसिष्ठोविष्णुर्बृहतीप्रवर्ग्यै कश्यप आदित्यपङ्क्तिरुप
सत्स्वात्रेयउपसद्देवता त्रिष्टुबग्नीषोमीयेगस्त्योग्नीषोमौ जगती
प्रायणीयेतिरात्र आग्निवेश्योहोरात्रे अतिजगतीचतुर्विꣳशत्यहे
सौकरायणः संवत्सरः शक्वर्यभिप्लवेषडहेसौपर्णोर्द्धमासामासा

स. नु. श्वातिश्शक्करीपृष्ठ्येषडहे सायकायनऋतवोष्टिरभिजितिंप्रियघृतो सू. अ

॥७७॥ स्निरत्यष्टिः स्वरसामसु सरस्वत्यापोधृतिर्विषुवतिरौहिणायनआ ४

दित्योतिधृतिर्विश्वजिति सौभरइंद्रः कृतिर्गोआयुषोबाष्कलिर्मि

त्रावरुणौ प्रकृतिर्दशरात्र आचार्यो विश्वेदेवा आकृतिर्द्वादशरा

त्रिके पृष्ठ्ये षडहे भाल्लवेयो दिशोविकृतिश्छन्दोमेषुशौल्वाय

न इमे लोकाः संकृतिर्दशमेहनि पराशरसंवत्सरोभिकृतिर्महाव्र ॥७७

ते शैलिनः प्रजापतिरुत्कृतिरुदयनीयेतिरात्रेभौवायनोवायुश्छ

न्दाꣳसि सर्वाणि ॥ १२ ॥ ऋषिभिरुपलक्षितं वाक्यं ऋषयश्छं
दोभिरुपलक्षिता देवता मंत्रवर्णादृग्यजुषयोर्विनियोगतश्च विज्ञे
याः सर्वमेतच्छन्दोदैवतमार्षं च विज्ञाय यत्किंचिज्जपहोमादि
करोति तस्य फलमश्नुते ब्रह्मयज्ञारंभे यथाविधि स्नात्वा छन्दः
पुरुषमेनोनिर्णोदनꣳशरीरंन्यसेत्तिर्य्यग्बिलश्चमसऊर्द्ध्वबुध्नस्तस्या
क्षिणी गोतमभरद्वाजौश्रोत्रे विश्वामित्रजमदग्नीनासिके वसिष्ठ
कश्यपौ वागत्रिर्गायत्रीं छंदोग्निर्दैवताꣳशिरसि विन्यसेदेवमेवो

ष्णिहꣳसवितारं ग्रीवास्वनूकेबृहतीं बृहस्पतिं बाह्वोर्बृहद्रथन्तरे
द्यावापृथिवीमध्येत्रिष्टुभमिन्द्रꣳश्रोण्योर्जगतीमादित्यं मेढ्रेतिछं
दसं प्रजापतिं पायौ यज्ञायज्ञियं वैश्वानरमूर्वोरनुष्टुभं विश्वान्दे
वानष्ठीवतोः पंक्तिं मरुतः पादयोर्द्विपदाविष्णुं प्राणेषु विछंदसं
वायुं न्यूनातिरिक्तेष्वङ्गेषुन्यूनाक्षरं छंद आपोदेवतेत्येवꣳसर्वांगेषु
योजयित्वा वेदमयः संपद्यते शापानुग्रहसमर्थो भवति ब्राह्मं ते ॥७८॥
जश्च वर्द्धते नकुतश्चिद्भयं विन्दते ऋङ्मयो यजुर्मयः साममय

स्तेजोमयो ब्रह्ममयोऽमृतमयः संभूय ब्रह्मैवाभ्येति तस्मादेतन्ना ब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्त्रेऽनुब्रूयादने नाधीतेन चांद्रायणाब्दफलमवाप्नोत्यनेन च सम्यग्ज्ञानेन ब्रह्म णः सायुज्यꣳसलोकतामाप्नोत्याप्नोति ॥ १३ ॥ इति० सर्वानुक्र मणिकायांचतुर्थोऽध्यायः ॥ ४ ॥ अथछंदाꣳसिगायत्र्युष्णि क् अनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगती शक्वर्यतिशक्वर्यष्ट्य त्यष्टीधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृ

स. नु. तयश्चतुर्विंशत्यक्षरादीनि चतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरि सू. अ.
॥७९॥ जौ द्वाभ्यांविराट्स्वराजौ पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभा ४
वान्व्यूहेदाद्येतु सप्तवर्गेपादविशेषात् संज्ञाविशेषास्ताननुक्रामंत
एवोदाहरिष्यामो विराड्रूपाविराट्स्थानाश्चबहूनामपित्रिष्टुभ
एवेत्युद्देशस्तत्रदशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इ
ति संज्ञा अनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥ प्रथमंछ
न्दस्त्रिपदागायत्री पंचकाश्चत्वारःषट्कश्चैकश्चतुर्थश्चतुष्कोवापदं ॥७९॥

क्ति:षट्सप्तैकादशाउष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः
षट्कश्चेदतिनिचृद्दशकश्चेद्यवमध्या यस्यास्तुषट्सप्तकाष्टकाःसाव
र्द्धमाना विपरीताप्रतिष्ठा द्वौषट्कौसप्तकश्चेतिन्हसीयसी ॥ २ ॥
द्वितीयमुष्णिक्त्रिपदांत्योद्वादशकआद्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्क
कुप्त्रैष्टुभजागतचतुष्काः ककुम्न्यंकुशिरैकादशिनोःपरःषट्कस्त
नुशिरामध्येचेत्पिपीलिकमध्याद्यः पंचकस्त्रयोष्टकाअनुष्टुब्गर्भा
चतुःसप्तकोष्णिगेव ॥ ३ ॥ तृतीयमनुष्टुप्चतुष्पदाथपंचपंचकाः

षट्कश्चैकोमहापदपंक्तिर्जागतावष्टकश्चकृतिर्मध्येचेदष्टकः पिपीलि
कमध्यानवकयोर्मध्येजागतः काविराण्नववैराजत्रयोदशैर्नष्टरू
पादेकास्त्रयोविराडेकादशकावा ॥ ४ ॥ चतुर्थंबृहतीतृतीयोद्वाद
शकआद्यश्चेत्पुरस्ताद्बृहतीद्वितीयश्चेन्न्यंकुसारिण्युरोबृहतीस्कंधो
ग्रीवीवांत्यश्चेदुपरिष्टाद्बृहत्याष्टिनोर्मध्येदशकौविष्टाबृहती त्रिजा
गतोर्द्ध्वबृहती त्रयोदशिनोर्मध्येष्टकःपिपीलिकमध्यानवकाष्टकै
कादशाष्टिनोविषमपदाचतुर्नवकाबृहत्येव ॥ ५ ॥ पंचमंपंक्तिःपं ॥८०॥

चपदाऽथचतुष्पदाविराट्दशकाअयुजौजागतौसतोबृहतीयुजौचे
द्विपरीताद्यौचेत्प्रस्तारपंक्तिरंत्यौचेदास्तारपंक्तिराद्यांत्यौचेत्संस्ता
रपङ्क्तिर्मध्यमौचेद्विष्टारपंक्तिः ॥ ६ ॥ षष्ठंत्रिष्टुप्त्रैष्टुभपदा
द्वौतुजागतौयस्याः साजागतेजगतीत्रैष्टुभेत्रिष्टुब्वैराजौजागतौ
चाऽभिसारिणी नवकौवैराजास्त्रिष्टुभश्चद्वौवावैराजौनवकस्त्रैष्टुभ
श्चविराट्स्थानैकादशिनस्त्रयोष्टकश्च विराड्रूपाद्वादशिनस्त्रयोष्ट
कश्चज्योतिष्मतीयतोष्टकस्ततोज्योतिश्चत्वारोष्टकाजागतश्चमहा

बृहतीमध्येजागतश्चेद्यवमध्याद्यौदशकावष्टकास्त्रयःपंक्त्युत्तराविराट्पूर्वावा ॥ ७ ॥ सप्तमंजगतीजागतपदाष्टिनस्त्रयःस्वौचद्वौमहासतोबृहत्यष्टकौसप्तकःषट्कोदशकोनवकश्चषडष्टकावामहापंक्तिर्माध्यंदिनीयेवाजसनेयके सर्वानुक्रमणिकैषाकृतिर्भगवतःकात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य ॥ ८ ॥ इति सर्वानुक्रमणिकायांपंचमोऽध्यायः ॥ ५ ॥ कंडिकासंख्या ॥ १२४॥ समाप्ता ॥

॥ श्रीगणेशायनमः ॥ ॐअथानुवाकान् वक्ष्यामि ब्राह्मणा निर्मि
तान् पुरा ॥ शिष्याणामुपदेशाय यज्ञसंस्कार एव च ॥ विप्राणा
यज्ञकालेषु जपहोमार्चनादिषु ॥ १ ॥ इषेत्वैका वसोःपवित्रं ति
स्रोग्नेव्रतपते सप्त पवित्रेस्थोद्वे शर्मासितिस्रो धृष्टिरसिशर्मासिद्वि
कौ देवस्यत्वातिस्रो देवस्यत्वापंच प्रत्युष्टꣳरक्षास्तिस्रो दशैकत्रिꣳ
शत् ॥ १० ॥ ३१ ॥ १ ॥ कृष्णोसिषडग्नेवाजजित्तिस्रोमयीदमग्नी
षोमयोः पंचकावग्नेदब्धायोचतस्रः संवर्चसापंचाग्नयेकव्यवाहना

अनु. यषट्सप्तचतुस्त्रिंशत् ॥ ७ ॥ ३४ ॥ २ ॥ समिधाग्निंभूर्भुवःस्व सू. अ.
॥८२॥ श्चतुष्कावग्निज्योंतिर्द्वेउपप्रयंतः षड्विंशतिर्भूर्भुवः स्वश्चतस्रोगृ १
हामातिस्रःप्रघासिनःपंच पूर्णादर्विद्वेऽअक्षन्नमीमदंतपडेषतेसप्तद
शत्रिषष्टिः ॥ १० ॥ ६३ ॥ ३ ॥ एवंद्वेमहीनांपयश्चतस्रआकूत्या
ऋक्सामयोर्द्विकौव्रतंकृणुतषडेषातेचतस्रोवस्व्यसितिस्रएषतेद्वेशु
क्रंत्वाचतस्रोदित्यास्त्वगष्टौदशसप्तत्रिंशत् ॥ १० ॥ ३७ ॥ ४ ॥ ॥८२॥
अग्नेस्तनूरापतयेचतुष्कौतप्तायनीद्वेइन्द्रघोषास्तिस्रोयुंजतेष्टौदेव

स्यत्वाचतस्रोदेवस्यत्वापंचविभूरसिचतस्रोज्योतिरसिषडुरुविष्णो
तिस्रोदशत्रिचत्वारिꣳशत् ॥ १० ॥ ४३ ॥ ५ ॥ देवस्यत्वाषडु
पावीरसिपंचमाहिःषट् संते तिस्रःसमुद्रंगच्छहविष्मतीर्द्विकौत्व
देत्वापंचदेवस्यत्वाष्टावष्टौसप्तत्रिꣳशत् ॥ ८ ॥ ३७ ॥ ६ ॥ वाच
स्पतयऽउपयामगृहीतोसित्रिकावावायोयंवाद्विकौयावामेकातंप्र
त्नथाचतस्रोयंवेनोयेदेवासस्त्रिकाविन्द्रायमूर्द्धानंद्विकौयस्तएका
प्राणायतिस्रोमघवइन्द्राग्नीआगतमाघौमासश्चर्षणीधृतोविश्वेदे

६१

अनु. वासऽ आगतेंद्रमरुत्वोमरुत्वंतंवृषभंमरुताात्वौजसेसजोषाइंद्रम सू. अ.
॥८३॥ रुत्वाँ २ इन्द्रमहाँ २ इन्द्रोमहाँ २ इंद्रंएकैकोदुत्यमष्टौपंचविं० १
शतिरष्टाचत्वारिंशत् ॥२५॥ ४८ ॥ ७ ॥ उपयामगृहीतोस्यादि
त्येभ्यः पंचवाममद्यद्वेसुशर्मास्येकाबृहस्पतिसुतस्यद्वेहरिरसिचत
स्रः समिन्द्रणोष्टौमाहिरेजतुदशमास्यः पंचकावातिष्ठसुक्ष्वाहीं
द्रमिदेकैकायस्मान्नद्वे ऽग्नेपवस्वोत्तिष्ठन्नद्दश्रमुदुत्यमेकैकाजिघ्रद्वे ॥८३॥
विनइन्द्रवाचस्पतिंविश्वकर्मन्नेकैकाग्नयेत्वाचतस्रइहरतिस्तिस्रः

परमेष्ठीदशत्रयोविंशतिस्त्रिषष्टिः ॥ २३ ॥६३॥८॥ देवसवितश्चत
स्रइंद्रस्यवज्रः पंचदेवस्याहंदशापयेतिस्रोवाजस्येममष्टावग्निरेका
क्षरेणैपतेचतुष्कौसविताद्वेअष्टौचत्वारिंशत् ॥८॥४०॥ ९॥ अपो
देवाश्चतस्रः सोमस्यत्विषिःपंचावेष्टाः सप्तसोमस्यत्वाचतस्रइन्द्र
स्यवज्रःपंचस्योनासिचतस्रःसवित्रेकाश्विभ्यांचतुस्त्रिंशत् ॥ ८ ॥
॥३४॥१०॥ युंजानएकादशप्रतूर्तंषोडशदेवस्यत्वादशापोदेवीर्द्वा
दशापोह्येकादशादितिश्चापंचाकूतिमष्टादशसप्तत्र्यशीतिः ॥ ७ ॥

अनु. ॥८३॥११॥ इशानःसप्तदशादिवस्परिद्वादशसमिधाग्निंपंचदशापे सू. अ.
॥८४॥ तसप्तदशाऽसुन्वन्तंत्रयोदशयाओषधीःसप्तविंशतिर्मामाषोडश १
सप्तसप्तदशंशतं ॥७॥११७॥१२॥ मयिगृह्णामिपंचदशदशध्रुवा
सिमध्रुवाताएकादशकौ सम्यक्स्रवंतिनवेमंमाषडपांत्वैकाऽयंपु
रःपंचसप्ताष्टापंचाशत् ॥७॥५८॥१३॥ ध्रुवाक्षितिः षट्सजूर्ऋतुभि
र्मूर्ध्वावयोर्द्विकाविन्द्राग्नीआयुर्मेषट्कावाशुस्त्रिवृद्देकाऽग्नेर्भागोस्ये ॥८४॥
कयाचतुष्कावष्टावेकत्रिंशत् ॥८॥३१॥१४॥ अग्नेजातान्पं

चरश्मिनासत्यायचतस्रोराज्यस्ययंपुरः पंचकावग्निर्मूर्द्धैकोनत्रिंश

शतृयेनऋषयोष्टौतपश्चनवसप्तपंचषष्टिः ॥७॥६५॥१५॥ नमस्तेषो

डशहिरण्यबाहवऽउष्णीषिणेतक्षभ्योज्येष्ठायपंचकाःस्रुत्यायच

तस्रःशंभवायैकापाऽर्य्यायपंचद्रापेअंधसोविंशतिर्नवषट्षष्टिः ॥

॥९॥६६॥१६॥ अश्मन्नूर्जंदशनमस्तेपंचाग्निस्तिग्मेननवचक्षुषः

पिताष्टावाशुःशिशानः सप्तदशोदेनंऋमध्वमग्निनापंचदशकौशुक्र

ज्योतिःसप्तेमᳬंस्तनंत्रयोदशनवैकोनशतम् ॥९॥९९॥१७॥

अनु. वाजः सप्तमूर्क्चतुष्काअश्माग्निस्त्रिकावछंशुः पंचैकाचतस्रोवा सू. अ.
॥८५॥ जायद्देवाजस्यत्वष्टावृताषाड्त्रयोदशाग्निंयुनज्मिसप्तयदाकूताद्द्वा १
त्रिंहत्यायदशकौत्रयोदशसप्तसप्ततिः ॥ १३ ॥ ७७॥१८॥ स्वाद्वींत्वै
कादशदेवायज्ञंविंशतिःसुरावंतंसप्तदशोदीरतांत्रयोदशाच्या
जानुर्दशसोमोराजाष्टौसीसेनतंत्रंषोडशसप्तपंचनवतिः ॥ ७ ॥
॥ ९५ ॥ १९ ॥ क्षत्रस्ययोनिस्त्रयोदशयद्देवादशाभ्यादधाम्यष्टौयो
समिद्धोअग्निर्द्वादशाश्विनाहविस्त्रयोदशाश्विनातेजसैकादशनवन ॥८५॥

वतिः ॥ ९ ॥ ९० ॥ २० ॥ इमम्मेसमिद्धोअग्निरेकादशकौवसन्तेन
ऋतुनाषड्ढोतायक्षत्समिधाग्निंद्वादशाऽश्विनौछागस्यसप्त देवंब
र्हिश्चतुर्द्दश षडेकषष्टिः ॥ ६ ॥ ६१ ॥ २१॥ तेजोसिपंचाग्नयएकाहिं
कारायद्वेतत्सवितुर्द्दश विभूर्मात्रैकाकायद्वेआब्रह्मँस्त्रयोदश शेषा
देकैकोनविंशतिश्चतुस्त्रिंशत् ॥ १९॥३४॥२२॥ हिरण्यगर्भोयः
प्राणतोद्विकौयुंजंत्यष्टौवायुश्चपंचप्राणायतिस्र उत्सक्थ्याद्वादश
गायत्रीकस्त्वाषट्कौकःस्विदष्टौकास्विद्दशसुभूःस्वयम्भूस्तिस्र एका

अनु· दशपंचषष्टिः ॥ ११ ॥ ६५ ॥ २३ ॥ अश्वस्तूपरोधूम्रान्वसंतायसमु
॥८५॥ द्रायशिशुमारान्मयुःप्राजापत्योदशकाश्चत्वारश्चत्वारिꣳशत् ॥ सू· अ
॥ ४॥४०॥ २४॥ शादंदद्भिर्नवैकैकाहिरण्यगर्भश्चतस्रआनोदश १
मानोमित्रोयदश्वस्याष्टकौयत्तेषडिमानुकंद्वेपंचदशसप्तचत्वारिꣳ
शत् ॥ १५ ॥ ४७ ॥ २५ ॥ अग्निश्चपंचदशोच्चातएकादशद्वौषड्विꣳ
शतिः ॥ २ ॥ २६ ॥ २६ ॥ समास्त्वादशोर्द्धाअस्यपीवोअन्नाद्वाद
शकावभित्वैकादशचत्वारःपंचचत्वारिꣳशत् ॥ ४ ॥ ४५ ॥ २७ ॥ ॥८६॥

होतायक्षदेकादशदेवंबर्हिर्द्वादशपुनरप्येवंचत्वारःषट्चत्वारिꣳश
त् ॥ ४ ॥ ४६ ॥ २८ ॥ समिद्धोअंजन्नेकादशयदक्रंदस्त्रयोद
शसमिद्धोअद्यद्वादशकेतुंकृण्वँश्चतुर्विꣳशतिश्चत्वारःषष्टिः ॥ ४ ॥
॥ ६० ॥ २९ ॥ देवसवितःषट्तपसेकौलालꣳषोडशद्वौद्वाविꣳशतिः
॥ २ ॥ २२ ॥ ३० ॥ सहस्रशीर्षाषोडशाद्भ्यःसंभृतःषट्द्वौद्वाविꣳ
शतिः ॥ २ ॥ २२ ॥ ३१ ॥ तदेवसप्तवेनस्तन्नवद्वौषोडश ॥ २ ॥ १६ ॥
॥ ३२ ॥ अस्याजरासःसप्तदशापार्थिवद्वादश विभ्राट्चतुर्दश प्रवा

अनु. ॥८७॥

वृजएकादशप्रवायुप्रवीरयापंचदशकावानस्त्रयोदशसप्तसप्तनव सू. अ.
तिः ॥ ७ ॥ ९७ ॥ ३३ ॥ यज्जाग्रतःपंचनद्यःसोमोधेनुमाकृष्णेन १
पूषंतवदशकानतदष्टौषडष्टापंचाशत् ॥६॥५८॥३४॥ अपेतोदशा
द्यंद्वादशद्वौद्वाविंशतिः ॥२॥२२॥३५॥ ऋचंवाचंषोडशद्यौःशां
तिरष्टौद्वौचतुर्विंशतिः ॥ २ ॥ २४ ॥ ३६॥ देवस्यत्वादशयमायत्वै
कादशद्वावेकविंशतिः ॥२॥२१॥३७॥ देवस्यत्वाष्टौयमायत्वाक्ष ॥८७॥
त्रस्यत्वादशकौत्रयोष्टाविंशतिः ॥३॥२८॥३८॥ स्वाहाप्राणेभ्यःष

डुग्रश्चसप्तद्वौत्रयोदश ॥ २ ॥ १३ ॥ ३९ ॥ ईशावास्यमष्टावंधंतमोन
वद्वौसप्तदश ॥२॥ १७॥४०॥ ॥दशाध्यायेसमाख्याताऽनुवाकाःस
र्वसंख्यया ॥ शतंदशानुवाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तषष्टि
श्चितोज्ञेयासौत्रेद्वाविंशतिस्तथा ॥ अश्वएकोनपंचाशत्पंचत्रिंश
त्खिलेस्मृताः ॥२॥ शुक्रियेषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकी
कृत्यसमाख्यातंत्रिशतंत्र्यधिकंमतम् ।३। इत्यनुवाकसूत्राध्यायः ॥

इदं पुस्तकं न्यग्रोध (बलसाड) पुरनिवासिना शुक्लावटंकेन कल्याणजीतनुजेन वल्लभरामशर्मणा संशोधितम् । तच्च मोहमय्यां
निर्णयसागरयंत्रालयाधिपतिना तुकाराम जावजी इत्यनेन स्वीये मुद्रणालये प्रकाशितम् ।
संवदब्दाः १९६४ । शकाब्दाः १८२९ । सनाब्दाः १९०७ ।

इति याज्ञवल्क्यशिक्षा-प्रतिज्ञासूत्र-सर्वानुक्रम-
अनुवाकसूत्रसमाप्तिः ॥

इति शुक्लयजुर्वेदमाध्यंदिनीसंहिता समाप्ता ॥